व केवलाऽष्टम्याऽष्टमी वक्ष्यते ॥ अत्र ज्येष्ठां देवीं पूजयेत् ॥ तदुक्तं कालादर्शे ॥ नाद्रशुक्लाष्टमी
ज्येष्ठानक्षत्रेण समन्विता ॥ महती कीर्तिता तस्यां ज्येष्ठां देवीं प्रपूजयेत् ॥ उपचारैर्बहुविधै दू
रलक्ष्मीविनिवृत्तये ॥ इति ॥ लिंगपुराणे कन्यार्केयाष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता ॥ अ
लक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेदिति ॥ पूजामंत्रश्च ॥ ज्येष्ठायै ते नमस्तुभ्यं श्रेष्ठायै ते
नमो नमः ॥ शर्वाय ते नमस्तुभ्यं शंकराय नमो नमः ॥ इति ॥ प्रतिवर्षं क्रियमाणं ज्येष्ठाव्रतं न
क्षत्राभावे तिथावेव कार्यं ॥ अन्यस्यां ज्येष्ठानक्षत्रयुक्तायां यस्यां कस्यां वि तिथौ नक्ष
त्रप्राधान्येन व्रतं क्रियते तत्केवलनक्षत्रे एव कार्यं ॥ तदुक्तं मत्स्यपुराणे ॥ प्रत्याब्दिकं

द४ दिति दे

तिथावुक्तं पक्षेऽप्येतादिव्रतं। प्रतिपद्यष्टाव्रतं यत्तु विहितं केवलो द्युनि तथात्वेवाष्टदाष
द्वितीयंकेवलंव्रतः॥ इति॥ सद्भक्ताः नन्दाव्रतः॥ प्रतिपद्यष्टाव्रतं॥ ०॥ अथाश्विने मासि कृष्ण
पक्षाष्टम्यां दोषचतुष्टयरहितायां महालक्ष्मीव्रतं कार्यं। तच्चन्द्रोदयकालव्यापिन्यामेव।
चंद्रोदय एव पूजाविधिप्रतिपादनात्। दक्षप्रांतदलस्थे सूर्ये तद्व्रतं समापयेत्। तदुक्तं।
पुराणसमुच्चये। कन्यागतेर्के प्रारभ्य कर्तव्यं तत् त्रियोऽङ्गने। दक्षप्रांतदलास्थे के तद्व्रत
तं समापयेदिति। ब्रह्मांडपुराणेपि। सप्तमी पुष्यसंयुक्ता कर्तव्या चाश्विनाष्टमी।
दुर्गासि वसितपक्षे वक्कुला श्रीव्रते शुभे। इति। अथ सप्तमीपुष्यसंयुक्तेपि तिवक्कु
लाष्टम्या विशेषणं। सिताष्टम्यां पुष्यनक्षत्रासंभवात्। आश्विनसिताष्टम्यां दुर्गो
त्सवः कार्यः। इत्येतावन्मात्रमत्र विधीयते। तथा च। अर्धरात्रमतिक्रम्य वर्त्तते यात्र
रात्रिषु। तदा तस्यां तिथौ कार्यं महालक्ष्मीव्रतं शुभमिति। दोषचतुष्टयवर्जनं ५२
पुराणसमुच्चये प्रोक्तं। पूजनीया प्रयत्नेन ह्यदृष्टेऽनाष्टमी प्राप्तपि सित्रिया। दो

वासपेत ४

षिथवुर्निःसा युक्ता सर्वसंपत्करी तिथिरिति। दोषाश्च तत्रैवोक्ताः॥ पुत्रसौभाग्यराज्या
युर्नाशिनी सा प्रकीर्तिता। तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥ विशेषेण परित्या
ज्या नवमी दूषिता यदी। ति तत्र कन्यागते रवौ निषेधव्रतास्त विषयः। तथा च। त्रिदिन
चावमदिने अष्टमी नोपमावसेत्। पुत्रदा नवमी विद्धा स्वघ्नी दशम्यादिग रवौ। धर्मघ्नी नि त्रि
पि५ दिने त्याज्या प्रोक्ता चैवावमेऽपि चेति। स्कंदव्यं दंतीति स्वघ्नी। नवमीवेधः। रवेर्दक्षोत्तरदल
गतत्वं त्रिदिनं अवमदिनं चेति दोषचतुष्टयं त्रिदिनाऽवमदिनयोर्लक्षणं रत्नमाला
याद्युक्तं। यत्रैकस्पृशति तिथिद्वयावसानं वारश्चेदवमदिनं द्वयं च नष्टमिति। एतद्दोष
वर्जनमुपक्रमोद्यापनयोरेव प्रायेण ज्ञेयं। अन्यथा षोडशवर्षसाध्यव्रतस्यांतरा
दोषसंभवे अकरणं प्रसज्येत। अन्यदा मतिभं न वदोषवर्जनं चोनत्तु नियमाऽक्रमव
ष्टः। यः स्पृशेद्व्यतितिथित्रयं स साक्षात्त्रिपुनरिदं। तथा चोक्तं। श्रियार्चनं भाद्रपदे सिता
ष्टमी प्रारभ्य कन्यार्द्धगतेन सूर्ये। समापयेत्तत्र तिथौ च यावत्सूर्यस्तु पूर्वार्द्धगतो युवत्यां सा
तदुक्तं माघे यस्परिशात् नवति तिथिचित्र यस्य सा आर्त्रीतिथिः सा स्पृक् सपुनारिदं ५ त्यते

द्दा नवमीवेधनिषेधेपि परदिने चंद्रोदयादर्वाक् ज्ञेयः। चंद्रोदयादूर्ध्वं त्रिमुहूर्त्तव्यापि
न्यत्वात्तत्र नवमीविद्धापि कार्या। तदुक्तं। पूर्वविद्धापरविद्धा वा ग्राह्या चंद्रोदये सदा। त्रि
मुहूर्त्तापि सा ग्राह्या परतश्चोर्ध्वगामिनी। चंद्रोदयादूर्ध्वगामिनी त्रिमुहूर्त्ताऽष्टमी चेत्तदा त
दा परा कार्या नित्येतत्पूर्वैर्विचार्यतः। इति श्रीमहालक्ष्मीनिर्णयः॥ ०॥ तथाश्विने मासि
शुक्लाष्टमी निर्णीयते। सा च नवमीयुक्ता ग्राह्या उपवासादिषु ग्राह्या। तदुक्तं व
सुरंध्रयोरिति। तथा चाष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता। नवम्या सह कार्या स्या
दष्टमी सर्वतो बुधैरिति। तथा चाष्टमी नवमीयुग्ममहदाद्यादेमहोत्सव इति। तथा च
अष्टम्यां च नवम्यां च जगन्मातरमंबिकां। पूजयित्वाश्विने मासि विशोको जायते नरः॥ सप्तम्या अष्टमी सर्व[illegible]
त्यादिति वाक्यैः नवमीयुक्तायां प्राशस्त्यात् निधनात् सप्तमीयुक्ता त्वसमर्थैस्तिसं न वसर्व
थावर्जनीया। तत्र दोषश्रवणात्। तथा। पुरंदतिपंस्त्रनुदतिदंतिराष्ट्रं सराज्यकं हंति
जातान् अजातांश्च सप्तमीसहिताष्टमी। तस्मात्सर्वप्रयत्नेन सप्तमीवेधसंयुता व ५२

८ तथा च। अष्टमी सप्तमीयुक्ता सप्तमी नाष्टमीयुता। नवम्या सह कार्या

ति

र्ज्जनीयाष्टमी चाथ तु वोराद्यमनी स्मृतिरिति। तथा च। सप्तमीशल्यसंविद्धा वर्ज्जनी
या सदाष्टमी। स्तोकापि सा धिः प्रदायस्यां सूर्योदये न वेदिति। तोज्जराडीय त्नीमपरा
क्रमेपि न दिवा न निशापि हि विष्टिं हिता। नवसप्तमिशल्यसमोपिहिता। यदि वाऽष्ट
मिश्रा घन वा नवमी त्रमारेपि पूज्यतमा नवमीति। इयं नवमी तोमवाल्लणच युक्ताप्र
पि शस्ततरा। तदुक्तं। अष्टम्यां तु दिने सूर्ये दिनांते नवमी भवेत्। कुजवारो न वेत्तत्र स्फुटनी
या प्रयत्नत इति। इयमष्टमी मूलनक्षत्रेण पूर्वाषाढया वा युक्ता महानवमी प्रोक्ता।
तथोक्तं। अश्वयुक्शुक्लपक्षे च याष्टमी मूलसंयुता। पूर्वाषाढया सार्द्धं [illegible] युक्ता
तथा। सा महानवमी प्रोक्ता त्रैलोक्येपि सुदुर्लभा। तथा च। कन्यागते सवितरि शु
क्लपक्षेष्टमी तु या। मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता इति। मूलनक्षत्रसंयुक्तापि
सप्तमी लेशसहिता चेदुष्टैव। यदुक्तं। वर्जनीया प्रयत्नेन मूलेनापि च संयुक्ता सदा याऽष्ट
मी बुधैः। लेशमात्रेण सप्तम्या सा यदि स्पृष्टिता इति। नवमीयुक्तायां प्राशस्त्यं देवी

ख।१

राणेप्रोक्तं। संतर्पयंती क्ष्णं कारैः खड्गोस्या न परापरा। नवम्यां पूजिता देवी ददात्यानं
देवं फलं। साउण्या सा पवित्रा च साधकस्याखिलप्रदायिनी। तस्यां संपूजनीयाश्च चामुंडा मुं
डमालिनीति। तथा च। मूलपूर्वाषाढयोः खड्गपूजा प्रशस्ता। उत्तराषाढायां तु निषिद्धा।
तदुक्तं। रूपनारायणीये। मूलेन पूजयेद्देवी तथा सलिलदैवते। विश्वदेवे तु नच्छेत्पू
जिता दुःखदा भवेदिति। उत्तराषाढनिषेधश्च सति संभवे ज्ञेयः। तदुक्तं द्वयोरपि वेत्र
मूला नावेत्र कर्त्तव्या अष्टमी तोयसंयुता। विश्वयुता तु कर्त्तव्या अष्टमीनवमीयुत
ति। तथा च। प्रतिपदादारतुषड्ढितीयायां धृतं धनुः। तृतीयायां कारचक्रं चतुर्थ्यांसि
र्मनिर्मलं। पंचम्यां तु दारकं शूलं षष्ठ्यां तु परश्वथं तथा। गदां च बिभ्रत्सप्तम्यां अष्टम्यांश
प्तें क्रिशुतमां। नवम्यां च सदा देव्या मूर्त्तिर्दिव्यविनाशिनी। अत एव हि सा पूज्या।
अष्टमीनवमीयुतेऽति। अत्रैव यथा तारविशेष उक्तः॥ यथा। मूलेनागमनं देव्याः प्र ५४
वषाढासु पूजनं। उत्तरायां बलिं दद्याच्छ्रवणे चापराजिता। एवं नवमीयुक्ताऽष्टम्यां



देवीसंपूज्योदयव्यापिन्यां बलिं दद्यात्। तदुक्तं देवीपुराणे। सूर्योदये परे रिक्ता पू
सस्यादपरायदि। बलिदानं प्रकर्त्तव्यं न त्र देशः शुभावहः। बलिदाने कृतेऽष्टम्यां पु
त्रनाशो भवेन्नृपेति। तथा। अष्टम्यामुदिते सूर्ये दिनांते नवमी भवेत्। प्रभाते बलि
दानेषु क्रियमाणेषु अपि नश्यतो नवमी तत्र संपूज्या दुर्गार्त्तिनाशिनीति। न तु तत्रा
पि विरुद्धानि वाक्यानि श्रूयंते। यथा। अर्द्धरुद्राच नडादं नावयोरंतरं कवित्तु सर्व
सिद्धिप्रदा स्यामिनञ्जायामपितिप्पदं। नञ्जायां तद्काल्याश्च मध्ये स्यात् दर्शनक्रिया।
तस्मात्सदैव सप्तमीविद्धा कार्या। दुर्गाष्टमी बुधैरिति। विष्टिं च कामसहाष्टम्यां मम
पूजां करोति यः। तस्य पूजाफलं न स्यात् पुनाद् भवमानि तेति वाक्यैः सप्तमीविद्धा
यामेव दुर्गायाः सविविधानात् विरोध इति चेत्। सत्यं। यदि चाष्टमी सप्तमीविद्धा सती
द्वितीयादितिथिक्षयवशान्नवर्द्धते तद्विषये चात् पूर्वविद्धाविधायकवाक्यानां त
दुक्तं। स्मृतिसंग्रहे। यदा सूर्योदये न स्यान्नवमी वापरे दिने। तदाऽष्टमी प्रकर्त्तव्या स

ष्टम्यासदितां नृपेति। तथाच। दुर्गोत्सवोत्तरा स्थिथ्योयत्र त्वयंयां तिनराधिप। पूर्वाष्टमी
नदाकुर्यादन्यथावश्तु नवोदितीयानि पुनः स सप्तम्यासुदिते सूर्ये परतोचाष्टमी भवे
त्तत्र दुर्गोत्सवं कुर्यान्निकुर्यादपरदिने। यदाष्टमी तु संप्राप्यास्तं याति दिवाक
रः। तत्रचैवं दुर्गोत्सवं कुर्यान्निकुर्याद्यदिपारदिने। दुर्गितं तत्र जानीयान्नवम्यां यत्र पूज्य
ताइति। त्र्यादिनवमीयुक्ताऽष्टमीनिषेधकवाक्यानि। तानि तत्पक्षे नवम्यां विहिते
दिवाप्रबोधनदंगत्वेन तत्राष्टम्यां क्रियमाणदेवीपूजाविषयाणि। तत्पक्षेऽष्टमीसै
व तत्पक्षे चतुर्दशी। त्यादिवाक्येन तत्राऽष्टम्याः पूर्वविद्धाया एव प्राशस्त्यविधानना
त्तु तत्पक्षे नवम्यां देवीप्रबोधनं अष्टम्यां तु पूजनं। देवीपुराणे यथोक्तं। यथा। क
न्यायां तत्पक्षेतु पूजयेच्चाऽबोधनेपिवा। नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैरिति
तत्रपूजयिचेति पूजनक्रियायाः समानकर्तृकयोः पूर्वकाल इति क्त्वाप्रत्ययस्य न
वम्यां बोधयेदिति बोधनं क्रियाकालान्नवमीरूपात् पूर्वकालेऽष्टमीरूपे विधानात्तु ५५

आर्द्रेपि वेद्याद्रान्हत्रेम पयोगानिषिद्धानु

क्त्वाप्रत्ययसामर्थ्यात् दिवाष्टम्यां पूजा निश्चीयते। किं चोऽएवमन्यान्यप्येवंविधानि वाक्या
नि तत्तद्विषय एव योजनीयानि। अविरोधः। किं च। अष्टमीद्वयेपि देवीपूजनं अविशेषेण
देवीमाहात्म्ये प्रोक्तं। यथा। अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः। श्रोष्यंति चैवये भक्त्या
मम माहात्म्यमुत्तमं। इति। अत्राष्टम्याऽमिथ्याविशेषेऽष्टम्यामुपादानात्तु। स्तोत्रपाठस्य
पूजापूर्वकत्वात् तत्राष्टम्यामेव देवीमाहात्म्यस्तोत्रपाठः। अतश्च विरुद्धवाक्यानि तत्रा
ष्टमीविषयाण्येव। विच्चलमतिप्रपंचे दुर्गोत्सवः। रूपनारायणभोजराजीयादिति निरस्यम्॥
ग्रंथ एतान्यंतरालिङ्कतानि वाक्यानि स्मृतिविरुद्ध इत्यादिनारायणीयानि। महाष्टम्यांवि
नेमासि शुक्ला कल्याणकारिणी। सप्तम्या युता कार्या मूलेन तु विशेषत इति। मूलयो
र्वैशिष्ट्यविधिरिति। द्व्यसप्तम्यापि युक्ता कार्येति निषिद्धापि सप्तमीयुता चेत्तु। कार्ये
नि मूलयोगावैशिष्ट्यविधिरर्थवादरूपमिति। अपिशब्दात् प्रतीयते। यथा। विषादेव
नक्षत्रे पूजिता दुःखदा तवेदिति तत्तराषाढयोगनिषिद्धविद्धयुक्तापि कर्तव्या। अष्ट

तु श्राद्धान
दुर्गोत्सवादौ
ष्टम्यामेव
सप्तत्वात्त्राष्ट
म्यां पूजा नव
म्यां पूजा प्रबो
धः स्यादिति
ग्राम्यनीति॥

॥ स

मीनवमीयुक्तेति नवमीयुतावधेः प्रशंसार्थं पुनर्विधिः। एवमत्रापि सप्तमीशल्यसंविद्धाच
र्कनीयामहाष्टमीति सप्तमीविद्धाया निषेधः। पिमूलायोगविधेः प्रशस्त्यार्थं पुनर्विधिः। ध्य ३
किं। त्वासप्तमीविद्धाविधिस्तत्पक्षे सिद्धत्वादनुवादो मूलयोगप्राशस्त्यविधेः सार्थं स्यमि
ध्यर्थं उपदिश्यत इत्यर्थः। तथा चोक्तं मीमांसकदेशिना। भूतभव्यसमुच्चारणे भूतं भव्योप
दिश्यत इति। भूतमनुवाद्यं भव्यं साध्यं। तयोः समुच्चारणे सान्निध्ये भूतं भव्यसिध्य
र्थं उपदिश्यत इत्यर्थः। तथाचार्यः परः शास्त्रः शास्त्रार्थ इति अनुवादस्य विधेयप्रायतात
यान्निधनात्। सप्तमीविद्धाविधेर्मूलयोगावशिष्टस्य विधिपरत्वमेव न्याय्यं। न सप्तमी
विद्धाविधानावचनं। महाष्टम्यां भगवती नन्दायामपि पूजिता। ददाति चायुरारोग्यं।
यतो नन्दास्वरूपिणी॥ अत्र नन्दाराशी न सप्तमीवचनं। किञ्च। विष्टिकरणवचनात्। तत्र संग्र
स्तिष्टम्यां दिवा विष्टिसंभवात् दिवारात्रिविदिते पूजा उदये दिवा पूजा सकलकार्यविरुद्ध ५८
पि विष्टिकरणे कार्यमित्यर्थः। तदतिक्रमणे प्रत्यवायश्रवणात्। यथा॥ विष्ट्यां यच्चकामहाष्ट

एषा मम सदा पूजां करोति तिथिः। तस्य पूजाफलं नस्यात्तेनादमवमानिता। इति। पूजोदयविधा
नं च पुराणे प्रसिद्धं। यथा। न विष्णोर्नारायत्र यस्यां नन्दकालोदयं विनाशनी। प्राडुर्भू
ता महाघोरा योगिनीकोटिसंविता। इति निःसद। अतोऽर्थं पूजनीया सा तस्मिन्दिने मान
वैरिति। अत्रोदयनीति श्रवणात्पूर्वापूजा प्रतीयते तथा। निशायां पूजिता देवी विफला पाप
नाशनी। तस्मात्सर्वप्रयत्नेन अष्टम्यां निशि पूजयेदिति। यत्तु गौडराजीयं वचनं। न दि
वा न निशापि च विष्टिदिने न च सप्तमीशल्यसमोपेता। इदं तु सप्तमीशल्यनिषेधपरं।
सप्तमीविद्धाया एवं दिवारात्रौ च विष्टिदूषितत्वसंभवात्। न केवलं दिवा विष्टिदूषिता। यावन्नन्दा
वपि विष्टिदूषिता न कार्येत्यर्थः। इदं च संभवाभिप्रायो विदितव्यं। अत एव यान्यान्यप्येवंवि
धानि वाक्यानि तान्येकविषयत्वेन योजनीयानीति। न किंचिद्विरूपवाक्यानां
त्वविशिष्ट्यैव रूपनारायणादिभिरष्टमीसामान्यनिर्णयवाक्यान्यवलिखिता
नि न महाष्टमीविशेषनिर्णयवाक्यानीति च नाशंकनीयं। यतः। अथ शुक्लपक्षे

युताष्टमी मूलसंयुता॥ इति। कन्यागते सवितरि शुक्लपक्षेऽष्टमी तु या॥ इति। तथा। मूलेनापि च
संयुक्तां सदा त्वाद्याष्टमी बुधैः। लवमात्रेण सप्तम्या अपि स्याद्यदि दूषितेति। इत्यादि
वाक्यानि तत्रैव लिखितानि। तानि न सामान्यनिर्णयपराणि। आश्वयुजीति कन्यागत
ति। मूलसंयुक्तत्वादिविशेषलिंगमहाष्टम्या एव प्रतिपदविधानात्। अत्र तथा अनंतरद्दा
दिषु महाष्टम्यादिविशेषनिर्णयो निरस्त इति च शंकनीयं। तेषां यौथिकदीनामियं शैली।
यत्र सामान्यनिर्णये नैव विशेषनिर्णयो दोषाभावमहाष्टम्यादिषु स तु न प्रपंचितः। इ
ति। अतश्च तदुक्तः कश्चिद्विशेषो नाधुनिकनिबंधकारैरुक्त इति मंतव्यं। एवं च सति चि
रंतनानंतरं जेदानिर्णयानां स्मृतिमूलत्वात् विरुद्धनिर्णयस्य प्रमाणत्वादुपेक्षणीय
इति। अलमतिविस्तरेण॥ ७॥ इति। अथात्रैव कश्चिद्विशेषो लिख्यते। यदुक्तं विश्वरूप
निबंधे। आश्विनस्य सिते पक्षे प्रारब्धे नवरात्रके। शावसूतके समुत्पन्ने क्रियाः कार्याः क ५७
थं बुधैरिति प्रश्ने सूतकं वर्तमाने च तत्रोत्पन्नं यदा भवेत्। देवीपूजा प्रकर्तव्या पशुय

ज्ञविधानतः। तत्र नवरात्रे च वर्तमाने सूतकं यदोत्पन्नं न वेदित्यत्ययः। तथा। सूतके पूजनं
प्रोक्तं दानं चैव विशेषतः। देवीमुद्दिश्य कर्तव्यं तत्र दोषो न विद्यते॥ इति। अत्र च प्रारब्धे
देवीपूजादिके सूतकादिपाते सति। स्वयमेव पूजादि कुर्यादिति विधानेन प्रारब्धे नाग्नि
होत्रादिव कारयितव्यमिति॥ ७॥ अथ नवरात्रेषु देवीपूजाविधिः क्रिया लिख्यते। यथा
आश्विनशुक्लप्रतिपदि कृतस्नान एकनक्तादिनियमस्थो वा नवमीयावद्वक्ष्यमाणलक्षणे मं
डपवक्ष्यमाणलक्षणां देवीं संस्थाप्य वक्ष्यमाणविधिना देव्या महापूजां कुर्यात्। तन्मंडपल
क्षणं च विष्णोत्तरे प्रोक्तं। कुड्ययुक्तं प्रकर्तव्यं चतुरस्रं सुशोभनं। एकस्तंभास्थिका घेष्ट्या च वि
तं वस्त्रमंडितं। गोमयमृज्जोमयाभ्यां चलिप्तं शास्त्रसमन्वितं। तन्मध्ये वेदिका कार्या खद्दस्रावसमा
श्रुता। तस्यां सिंहासनं हैमकं वलाजिनसंयुतां। तत्र दुर्गां प्रतिष्ठाप्य सर्वलक्षणसंयुतां।
सर्वहेममयीं प्रौढयौवनोन्मदशालिनीं। भुजैश्चतुर्भिरुचिरैर्दशभिर्वा विभूषितां। तप्तहा
टकवर्णाभां त्रिनेत्रां शशिशेखरां। पीतांबरधरां पीनां नीलकौशेयसंयुतां। ग्रैवेयहारके

यूरनूपुरारणान्वितां। नानारत्नविचित्रेणमुकुटेनविराजतां। अनेककुसुमाकीर्णसंकि
पर्दनसुशोभितां। नितंबतटसंबद्धकिंकिणीकणनादिनीं। शूलपाशदंडशक्तिवज्रचापासिध
रितां। घंटाडमरुमालाकरकपालपात्रलसत्करां। तदग्रेछिन्नशिरस्संमहिषंरुधिराप्लुतं।
निष्क्रांतार्द्धतनुंकंठनालार्द्धमसिधारिणीं। देवीकरधृतयावंशूलेनोरसिताडितां। महाक
रालदंष्ट्रास्यंविघ्नकपिशमूर्द्धजं। नागपाशेनविद्धिमंदुर्धर्षेणापिविद्रुतं। वमद्रुधिरवक्त्रो
एधुन्वतापुरुषारुषा। ऊर्द्ध्वलांगूलदंडेन। देव्याधिष्ठानशोभनं। सर्वतोमातृचक्रेणसेव्य
मानांसुरेश्वरीं। पूजयेत्तुप्रयतोदेवींनरोनियममास्थितः। इति। अथनियमाः। आदिवैदेवीप्रो
क्ताकंन्यासंस्थेरावोज्ञाकभुक्तमारन्यांनंदिकां। अयाचीचथ्यावकाशीनक्काशीवाध्यतः
सुचिः। नंदिकांप्रतिपदं। मार्कंडेयपुराणेपि। निराहारोजितात्मानाविद्युक्तवातु। शाक्तोस
यांनिराहारावास्यात्तु। विध्यंतरंचतुर्थ्यांस्वप्रोक्तं। मोक्षीयतोऽकुमारीं तोजयेन्मुदा। व ५८
स्त्रालंकारदानैश्चसंतोष्यप्रतिवासरंबलिंचप्रत्यहंदद्याज्ञोदानंमांससमघवत्तु। त्रिका

नू२ नवमी२

लंघयेद्देवींजपस्तोत्रपरायणः इतिजपोपरूपदिष्टविधिनामंत्रस्यस्तोत्रंसप्तशतिका
दि। तत्रसप्तशतिकापाठविधिर्डयोमिवप्रोक्तः। यथा। सुस्नानःप्रक्षालितवस्त्रःपरिधाय
चंदनमृगमदकुसुमैःसर्वांगमनुलिप्यत्रिपुंड्रंकृत्वापूर्वाभिमुखोदेवीमुपावासमु
पविश्यतत्पद्मदपाणिराचम्याभिमतकामनाप्राप्त्यर्थंसप्तशतिकायाःपाठंकरिष्यइति
संकल्पकार्यमानसंभाषणादिपरिहार्यदिशोनवलोकयेद्देवीमनसाध्यानचासंस्प
र्शस्थिरोच्चारणतत्परःपदमात्राक्षिप्तविवेकज्ञानवान्पठेदिति। नवरात्रेषुशुक्ल
प्रतिपदमारभ्यनवमीपर्यंतंप्रतिदिनमेकैकंकुमारीमेकोत्तरवृद्ध्यादिगुणवृद्ध्यावात्रि
गुणवृद्ध्यावाप्रतिदिनंनवनवापिचैकोनुवाविन्नवसारेणसंपूज्यभोजयेत्तु। तदुक्तंस्कं ५४
दपुराणे। एकैकांभोजयेत्कन्यामेकवृद्ध्यातथैवच। द्विगुणंवात्रिगुणंवाप्रत्येकंनवकं
तथा। नवाभिमतनूमिमेश्वर्यां। द्विगुणेनवाएकवृद्ध्याभवेत्तोलक्ष्मेकैनस्मियंलभेताए
कवर्षातुयाकन्यापूजार्थंतांविवर्जयेत्तु। गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते। द्वि

तत्र२ के२

कमातृ। पूजये सर्वकार्ये भयथाविध्यफकमायान्ति। कुमारिका
वर्षा। सिरन्पद शावषविधिः चतुर्वर्षा तु कल्याणी पंचवर्षा तु रोहिणी। षड्वर्षा तु नवे
स्या २ द्विवर्षा तु त्रि त्रिमूर्ति त्रिश्च कथ्यते। चतुर्वर्षा तु नवी चतुर्यात्सा नवनिःस्मृता। दशवर्षा तु भद्रे
काली सप्तवर्षा तु चंडिका। अष्टवर्षा तां नवी चतुर्यात्सा नवनि। सर्वकार्येषु वर्जिता। दुःखदारिद्र्यनाशा
तिनामभिः परिकीर्तिता। अतः कन्यास्तियाकन्या सर्वकार्येषु वर्जिता। आयुःकामस्त्रिम्न स्त्रि ५
यशत्रूणां नाशनाय च। आयुष्यबलवृद्ध्यर्थं कुमारीं पूजयेन्नरः। आयुःकामस्त्रिमूर्तिं
त्रिसु त्रिवर्ग्स्यफलाप्तये। अपमृत्युव्याधिपीडादुःखानामपि नये। सोख्यार्थमन्यारो
रं ग्यार्थं पुत्रपौत्रप्रवृद्धये। कल्याणीं पूजयेद्धीमान्स्त्रियं कल्याणवृद्धये। आरोग्यसुख
कामी च जयमैश्वर्यमेव वा। यशःकामी नरो नित्यं रोहिणीमपि पूजयेत्। विद्यार्थी वान
यार्थी च राज्यार्थी च विशेषतः। शत्रूणां च विनाशार्थी कालिकां पूजयेन्नरः। ऐश्वर्यार्थिन
कामी चक्षुत्र कामी च यो नरः। सयामजयकामी च चंडिकां परिपूजयेत्। दुःखदारिद्र्यना ५९
शाय नृपसंमोहनाय च। महापापविनाशाय च तां नवीं च प्रपूजयेत्। सर्वलोकस्पाशत्रु

णां च क्षयसाधनकर्मणि। दुर्गां दुर्गतिनाशाय पूजयेत्प्रयतो बुधः। सोनाप्यधनर्धन्यादि वांछि
तार्थफलाप्तये। सुभद्रां पूजयेन्मर्त्यो दासीदासविवृद्धये। वश्यार्थं सर्वशत्रूणां वशसाधन
कर्मणि। पूजामंत्राश्चतत्रैवोक्ताः। प्रातः प्रातर्विशेषेण कृतासंगो विशेषतः। आवाहयेत्ततः कन्यां
मंत्रेणानेन नायवीमंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं। नवदुर्गात्मिकां साक्षात्क
न्यामावाहयाम्यहं। आवाहनमंत्रः। ततः संपूजयेद्धीमान्मंत्रैरेतैः पृथक् पृथक्। जगत्पूज्यां
गस्रवं सर्वशक्तिस्वरूपिणी। पूजां गृहाण कौमारि जगन्मातर्नमोस्तु ते। इति कौमारीपूजा॥ इति त्रि
त्रिपुरां त्रिपुराधारां त्रिवर्गां ज्ञानरूपिणीं। त्रैलोक्यवंदितां देवीं त्रिमूर्तिं पूजयाम्यहं॥ इति त्रि
मूर्तिपूजा॥ कालात्मिकां कलातीतां चारुपद्मकरां शिवां कल्याणजननीं नित्यं कल्याणीं पूज
याम्यहं। इति कल्याणीपूजा॥ अणिमादिगुणाधारामकाराद्यक्षरात्मिकां। अनंतशक्तिं
कां लक्ष्मीं रोहिणीं पूजयाम्यहं॥ इति रोहिणी पूजा॥ ४ कालीपूजा॥ चंडवीरां चंडमायां
चंडमुंडप्रभंजनीं। पूजयामि सतां देवीं चंडिकां चंडविक्रमां। चंडिकापूजामंत्रः। सदानंदकरीं
कामचारीं शुभां कांतां कालचक्रस्वरूपिणीं। कामदां करुणोदारां कालीं संपूजयाम्यहं। इति २

शांतां सर्वदेवनमस्कृतां। सर्वभूतात्मिकां लक्ष्मीं शांभवीं पूजयाम्यहं॥ इति शांभवी पूजा॥
दुर्गमे दुस्तरे कार्ये भवदुःखविनाशनीं। पूजयामि सदा भक्त्या दुर्गां दुर्गार्त्तिनाशनीं॥ इति
दुर्गापूजामंत्रः॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीं। सुभद्राजननीं देवीं सुभद्रां
पूजयाम्यहं। एवमभ्यर्च्य कर्त्तव्यं कुमारीणां प्रयत्नतः। कंचुकैश्चैव वस्त्रैश्च गंधपुष्पा
क्षतादिभिः। नानाविधैर्भक्ष्यभोज्यैर्भोजनीयाश्च नामभिः॥ इति कुमारी पूजा॥ अत्र पंच
तत्रैव निरूपितं॥ हीनाधिकांगीं कुष्ठीं च विलासिकुलसंभवां। ग्रंथिस्फुटितवसांगीं रक्त
पुष्पव्रणांकितां। जात्यंधां केकरां काणीं कुरूपां तनुरोमजां। संत्यजेद्रोगिणीं कन्यां दासी रा०५
गर्भसमुद्भवां। अरोगिणीं सुपुष्टांगीं सुरूपां व्रणवर्जितां। एकवंशसमुद्भूतां कन्यां सम्य
क् प्रपूजयेत्। ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजां। लाभार्थे वैश्यवंशोत्थां मतार्थे शूद्र
संभवां। दारुणे चांत्यजातीनां पूजयेद्विधिना नरः॥ इति नवरात्र देवी पूजा प्रकरणं साम
थमि लीष्टम्यां च कुर्यात्। तदुक्तं ब्रह्मपुराणे। अत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी। प्रा ६०

दुर्भूता महाघोरा योगिनीकोटिभिः सह। अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैः॥
उपोषितैर्वस्त्रधूपदीपमाल्यानुलेपनैः। आमिषैर्विविधैः शाकैर्होमैर्ब्राह्मणतर्पणैः।
बिल्वपत्रैः श्रीफलैश्च चंदनेन घृतेन वा। नवम्यां तु घृतस्नानैः पूज्यास्ते ब्राह्मणा इति। अथा
श्ववृष्टे चापि राश्विने शुक्लप्रतिपदमारभ्य महानवमीं यावद्देवदिशां तिपस्सायनं।
कार्यं तदा तेषां दिने दिने। धर्म्यं तत्रार्तकं कथं कृत्वा सिद्धार्थकाश्च तथा। पंचवर्णेन सूत्रेण यं
थितं तेषां तु बंधयेत्। वायव्ये वारुणैः सौरैः शाक्रैर्मंत्रैः सावित्रैः। विश्वदेवैस्तथाग्नेयैर्होमैः का
योदिने दिने। उरंगारक्षणीयाश्च पुरुषैः शस्त्रपाणिभिः। रत्नताड्याः कवित्तत्रनचवाद्याः
कथं चनेति। तथा लविष्याज्ञरोपि विशेषतः। कन्यागते सवितरि शुक्लपक्षे तु याष्टमी।
मूलनक्षत्रसंयुक्ता सा महानवमी स्मृता। तस्यां सदा पूजनीया चामुंडा मुंडमालिनी। त
स्यां ये प्रत्युत्पंते प्राणिनो महिषादयः। सर्वे ते स्वर्गतिं यांति निघ्नतां पापं न विद्यते। या
वल्लावधुतजा त्रं पशुस्नावल्लहन्यते। न तथा बलिदानेन पुष्पधूपविलेपनैः। तथा संत

ष्पात तेन महिषं विंध्यवासिनीं। बलिदानं मधुमांसमाषसहितोदनेन क्रियमाणं।
एवं च विंध्यवासिन्यां नवरात्रोपवासतः। एकनक्तेन नक्तेन यथाशक्त्या याचितेन वा। पूजनी
या ज्ञानदेवी स्थाने स्थाने पुरे पुरे। स्नातः प्रमुदितैर्हृष्टैः ब्राह्मणैः क्षत्रियैर्नृपैः। वैश्यैः शू
द्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः। स्त्रीभिश्च कुरुशार्दूल तद्विधानमिमं शृणु। जयाभिला
प्रति ५ षी नृपतिः पत्न्या दैवतिक्रमात्। लोहाभिसारिकं कर्म कारयेद्यावदष्टमी। इति। लोहाभि
सारिकविधानं तत्रैवोक्तं। प्रागुदक्प्रवणे देशे पताकाभिरलंकृते। मंडपं कारयेद्दिव्यं
नवसप्तकरं परं। षोडशहस्तप्रमाणमित्यर्थः। आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभि
तं। मेखलात्रयसंयुक्तं योन्या चैव छंदलान्वयोः। राजचिह्नानि सर्वाणि शस्त्राण्यस्त्राणि यानि
वा। आनीय मंडपे तानि सर्वाण्यधिवासयेत्। ततस्तु ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः।
ॐकारपूर्वैर्मंत्रैस्तैर्लिंगवद्भिः क्रियात्तु वि। लोहनामाऽभवत्पूर्वं दानवस्तु महाबलः। स ६१
देवैः समरे क्रुद्धैः खंडशः कल्पितस्ततः। तदंगसंभवं सर्वं लोहं यद्दृश्यते क्षितौ। शस्त्रमं

त्रैस्तु होतव्यं पायसं घृतसंप्लुतं। कृते होमे चतुरंगाणि राजा तत्सुपहारयेत्। लोहाभिसारिकं
कर्म तेन नृपतिभिः स्मृतं। तस्य दक्षिणतो न्यस्यास्वसमलंकृतान्। आमयेल्लगानिच्यं
ल्लादीघोषपुरस्कृतान्। प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः। पूजयेच्चापि चिह्नानि
तमाल्यानुलेपनैः। तस्याभिसारणायैव विजयः सर्वदा कृतः। पूजामंत्रानुप्रवक्ष्यामि
पुराणोक्तानहं तव। ये पूजिताः प्रयच्छंति कीर्तिमायुर्यशोबलं। अत्रादौ छत्रमंत्रः। यथां
बुदश्छादयति शिवायेमां वसुंधरां। राज्ञां त्वं विजयाया स्तु छत्र राज्यविवृद्धये। अथ चामर
मंत्रः। शशांककरसंकाश क्षीरडिंडीरपांडुर। प्रोत्सारयाशु दुरितं चामरामरदुर्लभ। ति
ब्रह्मणः सत्यवाक्येन सोमस्य वरु
अथाश्वमंत्रः। गंधर्वकुलजातस्त्वं मा भूयाः कुलदूषकः। ब्रह्मणः सत्यवाक्येन सोमस्य वरु
णस्य च। प्रभावाच्च हुताशस्य वर्धय त्वं तुरंगमान्। तेजसा चैव सूर्यस्य मुनीनां तपसा तथा। रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन वा। स्मर त्वं राजपुत्रत्वं स्मर त्वं परावरं। सूर्या
तिं ब्रह्मदानं दत्तं न्याटवापि हृदा यथा। तुमि दाहतवा तीर्थ च स्त्री स्याया परा ज्ञुषं। सूर्या

चंद्रमसौ वायुर्यावत्पृथ्वी स्यंतिष्ठंतु तावद्ध्वजाग्र्ये नांगतिर्हि प्रजयं पापप्रवेगतः। निःत
तायद्दिवा च नो हृद्ध्वनि त्वरंगमाः। रिपून्विजित्य समारसहनं त्वाखिषीत्वेति। अथध्व
जमंत्रः। शक्रकेतोर्महावीर्य त्रपामवत्सर्द्धिया म्यहे। ध्वजराज नमस्तेऽस्तु तथा नारायणध्व
ज। गरुत्मन्मारुतगतीवपिसन्निहितायतः। ध्वजत्वं युध्यमानस्य रक्षमां च रिपून्दहेति।
अथ पताकामंत्रः। हिरण्यकशिपोर्युद्धे युद्धे देवासुरे तथा। कालनेमिवधे यद्वत्तद्वत्त्रिपु
रघातने। शोभितासि यथैवाद्य शांतयस्मां त्वं संस्मरोद्भूत नारवती नाम्ना कालरात्रि
र्यया स्मृता। त्वं ददस्वारिपून्सर्वान्पताके त्वं मया र्चिता। हस्तिमंत्रः। कुमुदैरावणः पद्म
पुष्पदंतोथ वामनः। सुप्रतीकोंजनो नील एतेष्टौ विशयोनयः। तेषां पुत्राश्च पौत्राश्च वन्या
न्यष्टौ समाश्रिताः। मंदो भद्रो मृगश्चैव गजाः संकीर्णयोनयः। वने वने प्रसूतास्ते स्मृत्या नि
सुमहाराश्च था पांडवाः वसवो रुद्रा आदित्याः समरुद्गणाः। भर्तारं सदयं नागेंद्र स्वामिव
प्रतिपाल्यतां। आज्ञां बुद्धि जयं यद्वज्जमनसह स्वस्ति नो व्रजेति। अथ खड्गमंत्रः।। असिर्विशा

१ बयादिक्तादितास्ति द्विद्वैयानां प्रतिपादिता। स्वयतिर्यांगम्लू तासिसयाक्लिनित्यारिण

सनः खड्गस्तीक्ष्णधारो दुरासदः। श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च। एतानि तव ना
मानिश्चयबद्धान्निवधसा। हिरण्यं च शरीरं ते धाता देवो जनार्दनः। पिता माता महादेवः
सर्वायुधमहामात्र सर्वदा अरिसूदन खड्ग
सन्मां पालय सर्वदा। इति। अथ चापमंत्रः। सर्वायुधानां प्रथमानि निर्मिता विश्वकर्म
मां सर्वदा रक्ष सायकैः सततमरिति। अथ छुरिकामंत्रः।। सर्वायुधानां प्रवत्तासि सर्वदुष्टनिबर्हणी।
कं.ला णा। शूलायुधानि दिनिःसृतयत्नचामुष्टिग्रहांगुला। चंडिकायै प्रदत्तासि सर्वदुष्टानां साधुसं
डारिके रक्षमां नित्यं संनिधच्छन्नमोस्तुते। अथ कनकदंडमंत्रः। प्राणधारणाय दुष्टानां नियंतारं वरूप
वरणाय चाब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये। यशादे दिशुषे दे हि जयदो भव रूप
ते। लाडयश्च रिपून्सर्वान्नियमदंडनमोस्तुते। अथ दुंदुभिमंत्रः। दुंदुभेत्वं सपत्नानां घोरो
न्मुदयवर्द्धनः। उवत्त्वमपि सैन्यानां तथा विजयवर्द्धनः। यथा जीमूतघोषेण प्रहृष्यंति
वर्द्धिणः। तथा स्तुत वशब्देन हृषेस्माकं मुदावह। अथ शंखमंत्रः। पुण्यस्त्वं पुण्यप्रशंख
नां मंगलानां च मंगलं। विष्णुना विधृतो नित्यमतः शांतिप्रदो भवेति। अथ सिंहासनमंत्रः।।

विजयो जयदो जेतारिपुघाती शुभंकरः। दुःखहा धर्मदः शांतः सर्वारिष्टविनाशनः। एते
ष्टौ संनिधेयस्य तव सिंहा महाबलाः। तेन सिंहासनेनेति मंत्रैर्वै देव्यागीयते। नमस्तेस्त्व
वतारेदजेदेदोनवरूपते। त्रिलोकजय सर्वश्च सिंहासननमोस्तु ते। तथैव कर्म विज्ञा
निश्वा निपुडपा निशल्पितिः। लोपहा निसारिकं कर्मश्चैवं मतु प्रपूर्वकं। नियमस्तेचातथाः
ष्टम्यांपूर्वह्निस्नानं समाचरेत्। कुंकुमसंपकचंदनवतः। चर्चितिगात्रौ। दवीकुसुमैरभ्यर्च
येत्तवकृत्तिः कुसुदैः सपुष्पैः सदधूपदीपैः सहानवेद्यैर्मा सिद्धल्सुपहास्थमंगलशब्दैः
सस्तु। ब्रवितेः। विद्धंतरुक्षवैर्यानिस्पंदनलोलकैः। नवद्याः सर्वमिवनगवद्याः। पूजामंत्रः॥
जयंती मंगला काली जडकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाधास्वाहास्वधानमो
स्तुते। बिल्वपत्रीमंत्रः। अमृतोद्भवश्री वृक्षमहादेवप्रियसदा। बिल्वपत्रं प्रयच्छामि प
वित्रं परमेश्वरी॥ दुर्गासिंहासनी यावत दिनप्राणपुष्पकेः। साचानीदासुरे तस्यां रूबा
यतो व्रतः। ततः खड्गं नमस्कृत्य शत्रूणां वधसिद्धयोऽध्येत दिजयं राजे पेत्तनिसंचात्मनोष्टमा। ६२

पुनः पुनः प्रणम्यायस्मिंस्मरन् हृदये शिवं। सर्वं ददाति कौरव्या अष्टम्यां जागरं निशि। नटन
र्तकगीतैश्च कारयेच्च महोत्सवं। एवं च सा निशां नीवा प्रभाते अरुणोदये। घातये महिषान् छा
गं संहिता नरकं धरानू। शतमर्द्धशतं वापि तदर्द्धं वाथ वेच्छया। सुरायाः संहृतेः कुंभे प्रार्पयेत्
परमेश्वरी। कालिकायास्तदा देयं जलदिदीप हृद्धकैः। भूतेभ्यस्तु बलिं दद्यात् मंत्रेणानेन सामि
षं। सरक्तं सजलं चान्नं गंधपुष्पाक्षतैर्युतं। चतुरधपिशलेन दिग्विदिक्षु करेद्बलिं। बलिं ह
रंतु विमे देवा आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः। असुरा यातु
धना नाथ पिशाचोरगराक्षसाः। डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः। दिक्पाला लोक
पालाश्च ये चान्ये विघ्ननायकाः। जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः। माविघ्नो मा च मे पा
पं मास्तु परिपंथिनः। सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः। इति महानवम्यां येतु छाग्लो
चा दुर्गा महोत्सवं। ते सर्वपापनिर्मुक्ता यांति गंगावनीं पुरीं। इत्येतत्सर्वमाख्यातं दुर्गादेवीमहो
त्सवं पवित्रं श्रेयसां वापि दुःखनाशननिवारणं॥ इति महाष्टमीनिर्णयः॥ ८॥ अथ दुर्गाप्रवसर्ग

गादशम्यामपराजितायां पूजा लिप्यते। यथा दशम्याम् अपराजिता ह्य चामृन्मयीं वा राजनी। क
लशे तोयमादाय चतुर्भुण तथा मा आकर्तव्यसाधनेन दशम्यां च पूजयित्वा अपराजितां नी
राजनमंत्रश्चात डरंगबलं महत् निररिष्टं व्रज निद्दा विजयं मम सर्वत्र अस्तु अमः प्रसादतः॥ इ
ति दुर्गासवः॥ ७॥ कार्त्तिकशुक्लाष्टमी गोपाष्टमी कथ्यते॥ तत्र गोपूजा कार्या। तत्र कूर्मपु
राणे॥ शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः। तत्र पूजां कुर्यात् जीवां पूजां गोग्रासं गोप्र
दक्षिणां। गवानुगमनं कार्यं सर्वान्कामानवाप्नुयात्॥ इति॥ ८॥ अथ पौषशुक्लाष्टमी। महेश्वर
पूजादिकं कार्यं। तदुक्तं भविष्यत्पुराणे। पौषमासि तयादेवी शुक्लाष्टम्यां बुधैर्नवै नदा
सा शुभदा पुण्या महातन्त्रेति कीर्तिता। तस्यां स्नानं तपो होमस्तर्पणं विप्रभोजनं। मत्स्ये तथ
महादेवी विधिवद् कुर्वतां तदेतानि अक्षयमेव न ... त्रयाणी डण्पंती प्राक्ता। व्यतिरिक्तं पर्वणि तथ
ता। अथ शुक्लाष्टमीत्... चतुर्दशीपर्व चाति ... अष्टमी ... चतुर्दश्यो अपि विहि ६४
तो नाभोजननिषेधस्तत्रास्यार्थं पर्वणीत्युक्तं। कृताष्टम्योरिति पुनर्वचनोपलक्षणयगता ... स

र्वाघ्रष्टमीति विष्णुपरचाच्छिवपूजा। अष्टम्यांच चतुर्दश्यामिष्या एकक्कमेवं। स्थितेसतिशुन
कायेवेद्धः। परापारघामिष्यैकक्कमेवा तथा। मिथुनकन्याश्छेरवावष्टमी दद्या। अष्टम्यांशिवि
योगिः प्रतिवसंति। अतस्तत्रयात्रा कार्यैकक्कमेवा। इतिश्रीसूर्यसेनविरचिते निर्णयामृते अष्ट
मीनिर्णयः॥ ७॥ अथ नवमी निर्णीयते। नवमी तिथिरुपवासा। द्विष्णु अष्टमीयुतैव ग्राह्या। यदु
क्तं वसुरंध्रयोरिति। तथा। अष्टम्या नवमी युक्ता नवम्या चाष्टमी युतेति। तथा। प्रतिपन्नव
मीचैव कर्तव्या सन्मुखी तिथिरिति। तथा व्रतेचैवं। अष्टम्या नवमी विद्धा कर्तव्या पारलौकि
की। इत्यष्टमी वधमतो। तथा कुर्यान्नवमीं विद्धां दशम्यां वा कदाचन। तथा। नवमी दशमी मि
श्रा नोपोष्याः परसंयुतेति। परविद्धानिषेधश्च नवम्यष्टमीयुतैवोपोष्येति सिद्धान्तः। अ
थ वैशाखमासे तु नवम्यामुपवासेन खंडिकां पूजयेत्। तदुक्तं विष्णोनारो वैशाखमा
सि संप्राप्ते नवम्यां पक्षयोर्द्वयोः। उपवासपरो न्याय पूजयेच्चंडिकां महाकंदेदुसं
काशां जपाकुसुमसन्निभो। विमानवरमारूढो देवलोके महीयते। इति। ज्येष्ठशुक्लनव

म्यां ब्राह्मणी नाम्नी त्रिमासं पूज्या ब्रह्मा नाम कुमारस्तु यथाशक्तितो भोजयेत्। तदुक्तं। भवि-
ष्योत्तरे। उपवासपरो भक्त्या नवम्यां पूजयेत् कुमारीं। ब्राह्मणीतिथिविनाशाय रूपेण विरूपि-
णी। ज्येष्ठमासि त्रिपंचाष्टनक्षत्रपाविष्ट्या नक्षत्रं विविधम्। ज्ञात्वा मन्त्रपयसोपेतं च यथैवं
ह्वीनवायतः। कुमारीं भोजयेच्चापि यथाशक्त्या ब्राह्मणांस्तथा। अथाषाढनवमी च य अष्टम्यां
पंचगव्यस्नानं उपोषितो ऐरावणगतां देवीं ऐन्द्रीनाम्नीं प्रपूजयेत् चान्नं कुर्यात्। तदुक्तं
भविष्योत्तरे। उपवासपरो भक्त्या नवम्यां पक्षयोर्द्वयोः। आषाढमासि राजेन्द्र यः कुर्यान्नि
कन्याभोजनं। पूजये ब्राह्मणान् दुर्गां ऐन्द्रीनाम्ना तु नामतः। ऐरावणगतां शुभ्रां श्वेतरूपेण दूषि-
तां। स ऐरावतमारूढ रुद्रदेवस्य तु वरोत्र वदेदिति। श्रावणनवम्यां कौमारीनाम्नीं दुर्गां पू-
ज्य अहोरात्रं भजन्तं चंडीति। तदुक्तं भविष्योत्तरे। श्रावणमासि संप्राप्ते नक्तं यः कुर्यात् कन्याभोजनं।
क्षीरषाष्टिकं नक्तेन सर्वकृत दितरः। उपवासपरो वीर नवम्यां पक्षयोर्द्वयोः। कुमारी
विति विनाम्ना चंडिकां पूजयेत्सदा। धर्मचार कामयी पीता घोरा विपाप नाशनी। कर- ६५

न १

वीरसपुष्पैश्च गंधधूपागरुचंदनैः। धूपेन च दशांगेन मोदकैश्चापि भोजयेत्। कुमारीभो-
जयेच्छक्त्या। कार्तिकशुक्लनवमी युगादिः। तदुक्तं। नवम्यूर्जे युगादयः॥ अथ मार्गशुक्ल-
नवमी नंदिनी ख्याता। तस्यां त्रिरात्रोपोषितो देवीं संपूज्याश्वमेधफलमाप्नोति। तदु-
क्तं भविष्योत्तरे। मासि मार्गे विरवीर शुक्लपक्षे तु या भवेत्। नवमी परिकीर्तिता। यस्तस्यां
पूजयेद्देवीं रात्रौ वैपोषितो नरः। सोऽश्वमेधमवाप्नोति विष्णुलोके महीयते॥ ॥ अथ शु-
क्लमाघनवमी महानंदा प्रोक्ता। तस्यां स्नानादिकमक्षयं भवति। तदुक्तं भविष्योत्तरे।
माघमासे तु या शुक्ला नवमी लोकपूजिता। महानंदेति सा प्रोक्ता महानंदकरी नृ-
णां। तस्यां स्नानं तथा दानं जपहोमादिकं उपोषितः। सर्वं तदक्षयं प्रोक्तं यस्यां यत्पूजयते न-
रैरिति। सर्वासु नवमीतिथिषु परत्वेन सरस्वती पूज्या। तदुक्तं। सरस्वत्या नवम्यां चेति। अथ
सिद्धविरुद्धादिकं लिख्यते। नवमी शनिवारेण सोमवारेण सिद्धा। शनौ नवमी चतुर्थी तृति
सोमे तु नवमी पुष्य श्रवणरोहिणीमृगः। एतानि सर्वदा सिद्धिदानि शुभकर्मस्विति। बुधवारेण

× दक १

विरुद्धा। नवमी द्वितीयामेवा नवम्यां शात्रुवं धनादिक्षयकर्म न कार्यं। चतुर्दश्यां नवम्यां वारि
मर्दनं इत्यादि। अथ दंतकाष्ठमपि वर्जयितुं। तदुक्तं व्यासेन। प्रतिपत्पर्वषष्ठीषु नवम्यां
द्वादशी तथा। दंतानां काष्ठसंयोगो दहत्यासप्तमं कुलमिति। अत्रापि प्रतिपद्वद्युग्मेति। सं
न्मुखाश्वरूपां दिशि यात्रा न कार्या। वृश्चिकस्थे क्रूरग्रहे नवमीदशम्यां यातु त्यालवति। उक्तं
प्रयाः पारपामित्यादि। नवम्यां तुंबीफलं न भक्ष्यते। दुग्धकमेव॥ श्री सूर्यमित्रम्॥ श्रीमत्पं
डित॥ इति श्री सूर्यमित्रमदं विरचिते श्रीनिर्णयामृते नवमीनिर्णयः॥ ०॥ अथ दशमी नि
न नवमी र्णीयते। दशमी तिरुपवासादिषु नवमीयुतैव ग्राह्या। तदुक्तं पंचीनसिना। पंचमी सप्तमी
चैव दशमी च त्रयोदशी। प्रतिपन्नवमी प्रोक्ता पूर्वा कर्त्तव्या सन्मुखीति। धिरिति। आपस्तंब
नाप्युक्तं। अष्टमी नवमी विद्धा कर्त्तव्या फलकांक्षिभिः। दशमी तु प्रकर्त्तव्या दुर्गा विद्धा
द्विजोत्तमेति। यत्तु वचनं। संपूर्णा दशमी कार्या परया पूर्वयाथवा। युक्ता न दूषिता तस्मा ६६
यतः सा सर्वतो मुखीति। तत्तु पूर्वविद्धायाः अलाभे तत्कालव्यापिनी या स्यात्तद्विषयं परा अ

दैव ४

युतदशमी नवमीयुतैव कार्या तस्या अलाभे तत्तत्कालव्यापिनी या स्यात्। अथवा एकादशी
व्रतं व्रतांगं च क्रियमाणं। दशम्यकन्तकादिकं परविद्धायां कार्यमिति सिद्धांतः॥ ० ॥ अथ
चैत्रे दशम्यां यमपूजा कार्या। यथा देवीपुराणे। चैत्रमासि तिथिक्रमे धर्मराजं दशम्यां तु
शुक्र ३ पूजयित्वा सुगंधाद्यैः। विगतारिर्निशातंकः इह चांते परं पदमिति। प्राप्नुयादिति शेषः। अत्र
ज्येष्ठस्य शुक्लदशमी दशहरा उच्यते। यथा स्कंदपुराणे। ज्येष्ठस्य शुक्लदशमी संवत्स
रमुखी स्मृता। तस्यां स्नानं प्रकुर्वीत दानं चैव विशेषतः। यां कांचित्सरितं प्राप्य दद्याद्दर्भ
तिलोदकं। मुच्यते दशभिः पापैः सुमहापातकोपमैः इति। तत्रैव ब्रह्मपुराणे विशेष उक्तः।
ज्येष्ठमासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि तस्माद्दशहरा स्मृतेति
यथा। ज्येष्ठस्य शुक्लदशम्यां च भवेद्भौमदिनं यदि। ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहराति
थिरिति। वाराहपुराणे। दशमी शुक्लपक्षे तु ज्येष्ठमासे कुजे दिने। अवतीर्णा यतः स्वर्गा
हस्तर्क्षे च सरिद्वरा। हरते दश पापानि तस्माद्दशहरा स्मृता। इति स्कंदपुराणे दश

हरायां दशयोगा उक्ताः। यथा। ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः। व्यतीपाते गरा
नंदे कन्याचंद्रे वृषे रवौ इति। अत्र वाराहपुराणे। उक्तो वा नवयो योगि उक्तः। स्कंदपुराणे
बुधवारयोग इति विशेषात्। स च कल्पव्यवस्थया परिहरणीयः। यथाब्रवतीर्णा सहरि
ति। तस्यां दशम्यां गंगाऽवतारिता। कस्मिंश्चित्कल्पे तु भौमवारयुक्तायां दशम्यां गंगावतीर्णा।
कस्मिंश्चिद्बुधवारयुक्तायामित्यविरोधः। दशपापानि च मत्स्यपुराणे प्रोक्तानि। परद्रव्येष्व
भिध्यानं मनसानिष्टचिंतनं। वितथाभिनिवेशश्च मानसं त्रिविधं स्मृतं। पारुष्यमनृतं चै
व पैशुन्यं चापि सर्वशः। असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं। अदत्तानामुपादानं हिं
सा चैवाविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतं। इयं दशहरा यात्रैव योगबा
हुल्यं तत्रैव कार्या। इति दशहरानिर्णयः। अस्यां दशम्यां गंगाजले स्थितः दशहरास्तो
त्रपूर्वकं स्नानं कुर्यात्। तदुक्तं स्कंदपुराणे। तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थि
तः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि वाक्षमः। सोपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः। ६७

पुनरैः सप्याद ६

इति। गंगायाः असंनिधाने तीर्थांतरेष्वप्यनेनैव विधिना स्नानं कार्यं। न घांन ह्यंतर
स्मृतिनिषेधस्तु गंगाव्यतिरिक्तविषयः। यथोक्तं स्कंदपुराणे। स्नानकाले व्यतीपातेऽप्य
तेजः कवीजले। विना विष्णुपदेनापि समर्थमघशोधनमिति। अघमर्षणविधौ श्रुति
रप्पाहाहमं मे गंगायमुनासरस्वतीत्यादि। अत्र गंगायमुनासरस्वतीशतद्रूणां स्मर
णं तीर्थं निरोपितं तु ष्पाति। अथाश्विनशुक्लदशम्यां नवमीयुक्तायां श्रवणयुक्ते
कार्यां चापराजितापूजां चाप्रस्थानं कुर्यात्। तदुक्तं दशम्यां चैव पूजनीयापराजिता।
ऐशानीं दिशमाश्रित्यापराप्रयत्नतः। तथाथर्वणे नवमीयुक्ता तस्यां पूज्यापराजिता। दे
माथं विजयार्थं वा प्रसिद्धविधिना नरः। नवमीशेषयुक्तां दशम्यां चापराजितां ददाति विज
यं देवी अपराजिता जयवर्द्धनी। तथा आश्विनशुक्लपक्षे तु दशम्यां पूजयेन्नरः। एकादश्यां न कुर्वीत
पूजनं चापराजितायाः। स्कंदपुराणेपि। दशम्यां यः समभ्यर्च्य प्रस्थानं कुरुते नृपः। तस्य संसर्वं वि
धराहौ [illegible] न वदिति। इदं वचनं दशम्यामेव प्रस्थानं कार्यं न चालस्यादिना

५४ ६३

च न क्षा धावनं यो इदं मि समुद्रार्थमित्यस्याद मन्ति संधिः। नरा विजयार्थ निषेधार्थमपि सं-नायोत ताके वराके।
त्यि लिवयो विरोध्यकर स्त्रमिति नियमाद्, तव युक्ते। नितु तर्हि कथं नवमीयुक्ते च विधि स्नाह।
नवमीयुक्तेत्यं लिति। अवगास्न वदति अवदेश मां यो गागावव वे दुर्गेष। न तु नयपत्रा भावंश ति एके।

मे जेना गमनं देवाः सर्वाणि का
कुसरो न अपरा सर्व लिंद घाद्यं

मेवापराजिता पिन्यां र
तिथिः प्रमाणं प

अपराजिता पिन्या मिति तन्मयश्रवणसंबंधे वेदितव्यं एकैव श्रवणो
मेघ पा तथा मेव ... पराजिता पत्नी नव नमा वे ति ... जयस्य पराजि
वपलस

दशमी तु चेयमेकादश्यां कार्यमिति नियमार्थं। नवमीयुक्तं च श्रवणासंयुतं वेदित
व्यं॥ श्रवणसंयुते श्रवणयुक्ता या दशम्यां प्रस्थानं पराजिता इडा चोत्तमं उक्तं। श्रवण
पूर्वा र्क्षे तु पूर्वायां काकुत्स्थः प्रस्थितो यतः। उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति। तथा
श्रवणे चापराजितेति च। श्रवणान्तावेतद्दशम्यामेव कार्यं तदुक्तं लल्लेन तिथिः प्राणस्या यि
था॥ तिथिः शरीरं तिथिरेव कारणं तिथिरेव साधनमिति॥ इति विजयदशमीनिर्णयः॥छ॥
पक्षद्वयगतासु सर्वास्वपि दशमीषु तिथिपतिर्यमोऽन्तकः पूज्यः। यदुक्तं। दशम्यामन्तक
स्यापीति॥ अथ सिंहविरुद्धादिकं निरूप्यते॥ यथा गुरो दशमी पंचम्यावीति। दशम्यां नौ
मवास्के मकचयोगः। दशम्यां पंचम्यां मांगल्यादिकं विवाहादिकं कार्यमित्युक्तमेव।
सिंहकन्यावृश्चिकधनुःस्थिते क्रूरयदे दशमी अशुभा न भवतीत्युक्तमेव। सिंहवृश्चिकके
सूर्ये दशमी दुष्टा न भवति। दशम्यां तृतीयादित्रयो वर्ज्याः अभ्यंगस्नानं न कुर्युः। तदुक्तं
त्रयोदश्यां द्वितीयायाममायादिना लाक्षाकं सर्वापि नाघात्। तदुक्तं चोक्तं शीर्षकपालां ६८

दशम्या।

त्राणीति। दशम्यां च रदिग्गमनं न कुर्यात्॥ श्रीसूर्य॥ श्रीमत्पंडि॥ इति श्रीनिर्णया
मृते दशमीनिर्णयः॥छ॥ अथैकादशी निर्णीयते। एकादशी तिथिरूपवासरूपेण द्वा
दशीयुक्तेति सुगमवाक्येपि द्वादशीयुतैव प्रशस्ता। तथा च। वृद्धिह्रासान्यां प्रपंचः दर्शयि
ष्यति। न चात्र एकादशीव्रतविषये नित्यविधायकानि वाक्यानि काम्यं च विधायकानि
वाक्यानि श्रूयन्ते। तत्र नित्यत्वे यथा। गारुडपुराणे। उपोष्यैकादशी नित्यं पक्षयोरुभयो
रपि। सनत्कुमारोपि। एकादशी सदा पोष्या पक्षयोः शुक्लकृष्णयोः। विष्णुरहस्येपि।
द्वादशीन प्रेमोक्त्याया यावदायुः प्रवर्तते इति। आग्नेयपुराणेऽपि। उपोष्यैकादशी राज-
न्यावदायुः प्रवर्तते। कण्वोपि। एकादशीमुपवसेन्न कदाचिदपक्रमेतु। इति। विष्णुस्मृ
तिरपि। एकादश्यां न भुंजीत कदाचिदपि मानवः। परमानंदमापन्नो दासवासमुपस्थिते।
सूतके मृतके वापि न त्याज्यं द्वादशीव्रतमिति। अकरणे प्रत्यवायोपि सनत्कुमारेण दर्शि
तः। न करोति हि यो मूढ एकादश्यामुपोषणं। स नरो नरकं याति रौरवं तमसावृतमिति। न

प्या। एकादश्यां तु निश्रेष्टयो भुंक्ते मूढचेतनः। प्रतिग्रासमसौ भुंक्ते किल्बिषं श्वादिवि
ट्समिति। तथा। अघपापं नु निश्रेष्टपातेव नरकं व्रजेदिति। एकादश्यन्नकामस्तु पि
त्वृतिः स्वदमज्ञतीति। नारदीयेपि। यानि कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रि
त्य तिष्ठन्ति संप्राप्ते हरिवासरे। तानि पापान्युपभुंक्ते भुंजानो हरिवासरे इति। स्कंदपुरा
णेपि। मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा। एकादश्यां तु यो भुंक्ते पक्षयोरुभयोर
पि। तथा। वरं स्वमातृगमनं वरं गोमांसभक्षणं। वरं हत्या सुरापानं नैकादश्यां तु भो
जनमिति। उपक्रम्याकरणेपि। विष्णुरहस्ये दोष उक्तः। समाश्रय विधानेन एकादशी
व्रतमुत्तमं। तस्य भंगं नरः कृत्वा रौरवं नरकं व्रजेदिति। इत्यादीनि वाक्यानि नित्यता
विधायकानि वाक्यानि। अथ काम्यत्वविधायक वाक्यानि। यथा। विष्णुरहस्ये। य
दीच्छेद्विष्णुसायोज्यं श्रियं संपदमात्मनः। एकादश्यां न भुंजीत पक्षयोरुभयोरपि
ति। कात्यायनोऽपि। इत्यादिकाम्यत्वविधायकानि वाक्यानि। एवं च सतीदमेकादशीव्र ६९

स्पदेति। अग्रे वक्ष्या।

तनित्यं च विधायकवाक्याश्रवणादकरणे प्रत्यवायश्रवणाच्च। किं नित्यं किं वा काम्यं व्र
विधायकवाक्यश्रवणा काम्यमिति। अत्र कश्चिदाह। नित्यं काम्यमिति। तच्चायुक्तं स
हं काम्यमिति यदेव नित्यं तदेव काम्यमिति कर्मधारयसमासस्यार्थः। अत्रोच्यते। नित्य
त्वं नाम फलानपेक्षत्वं। काम्यत्वं च फलापेक्षत्वं। न ह्येकस्यैव फलापेक्षत्वं फलानपेक्ष
त्वं च संभवति। भावाभावयोः समाधिकरण्याभावात्। न तु एकादश्यां नित्यत्वं काम्यत्वं चेति
व्रतद्वयं विधीयते। नन्वेकस्मिन्नेकादशीरूपे काले व्रतद्वयं विधातुमशक्यमिति चेत्। नो
कर्तुं न दृशक्यत्वात्। तथा च। उपवासे कामी निःकामस्तु नरो तिथौ एकव्रतद्वैके दि
३५४ न विधायकं कदाचिदपि नोपपद्यते। तथा एकादशीव्रतांगं नियमे पि त्याज्यंतं कौकाम्ये नित्ये
त्मक चतुष्टयमित्यादिना दर्शितः। अतश्च निःकामोऽपि विधिना नित्यैकादशीव्रतं कुर्या
त्। काम्यैकादशीव्रतं कुर्यादिति सिद्धं। अथैकादशीव्रताधिकारिणः प्रदर्श्यन्ते। यदाह
कात्यायनः। अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः। एकादश्यामुपवसेत् पक्षयोरुभ

= नद्दुक्तं कूर्मपुराणे एकादश्यां न भुंजीत पक्षयोरुभयोरपि ... मभीष्टकामेष = पक्षद्वये ।

= सदाग्रहीणी स्वैर्वैरोपि ।

योरपि इति। एवं च पक्षद्वये एकादशीव्रतस्य पक्षद्वैकादशीव्रतस्य सर्वत्र प्राप्तौ व्यवस्था

या विशेषः कालादर्शे लिखितः। यथा। विधवाया वनस्थस्य यतेश्चैकादशीद्वये। उपवासो ऽथ

गृहस्थस्य शुक्लायामेव पुत्रिणः। भुंजे निषिद्धः कृष्णायां सिद्धश्चास्य न तो व्रतमिति। अतएवैका

व४ दशी व्रतं न त्यजति विधवा कदाचित्। विधवाया वनस्थस्य यतिसमानधर्मत्वं गरुडपुराणे प्रोक्तं।

यथा। पुनः प्रस्तात्समभ्ये घटिकैकादशी न वेतु। तत्रोपवासो विहितो वनस्थस्य यतेस्तथा।

था। विधवाया सुतत्वे च परतो द्वादशी न चेतु। इति। सकामः पुत्रवान्गृहस्थस्तु शुक्लामेव वा।

पवसेत्। कृष्णायामशन निवृत्तिमात्रं कुर्यात्। एकादश्यां न भुंजीत पक्षयोरुभयोरपी

ति। वानप्रस्थो यतिश्चैव शुक्लामेव सदा यही ति। शुक्लैकादश्यां पुत्रैरुक्तीत्युपवास नि

षेध दर्शनान् निवृत्तिमेव कुर्यान्न व्रतमिति गम्यते। शुक्लैकादश्यां पुत्रिणा उपवास नि

षेधः। कूर्मपुराणे। संक्रांतौ कृष्णपक्षे च रविशुक्रदिने तथा। एकादश्यां न कुर्वीत उपवा

सं च पारणमिति। अत्र पुत्रवद्ग्रहस्थपरतां कात्यायनोपि एकादशीषु कृष्णासु रविसंक्र १०

उपवासः प्रवत्सरं नमध्यद्वादशीनो ...

= नन्वेत्तके एकादश्यां वा ... विषया ।

मणे तथा। चंद्रसूर्योपरागे च न कुर्यात् पुत्रवान्व्रतमिति। व्रतमुपवासमित्यर्थः। गो

तमोऽपि। आदित्ये हनि संक्रांत्यामसिते एकादशीषु च। व्यतीपाते च नते आहुपुत्रीणां प

वसन्नदीति। नन्वेषु वचनेषु एकादश्यां कृष्णायां संक्रमे ग्रहणेपि चोपवासं नक्क

वीतयदी पुत्रधनक्षयादित्यादि वाक्यैः संक्रांतिरविवारादिषु कृष्णायां शुक्लैकादश्या

मपि उपवास निषेधः प्रतीयते इति चेन्न। संक्रांत्यादिनिषेधस्तु संक्रांत्यादिविहितोप

वासविषयः। तदुक्तं हेमाद्रिणा। तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः। नान्योप

गन्तोयाग्लो यतो नित्यमुपोषणमिति। तन्निमित्तस्य संक्रांत्यादिनिमित्तस्योपवासस्य

निषेधः। अनुषंगतस्तु संक्रांतियोगे च तत्रैकादश्युपवासे निषेधने यास्यः। काम्यसं

क्रांत्याद्युपवासनिषेधान्नित्यैकादश्युपवासविषयोऽपि वर्तीयर्थः। अतएव शुक्लैका

दश्यां पुत्रवान्गृही नित्योपवासं न कुर्वीत। काम्योपवासस्तु विशेषाद्वर्ज्यते। न चैवं

वाक्येषु कृष्णैकादश्यां उपवासो निषिद्धः। नत्वेतोऽनन्निवृत्तिरुक्ता। तत् कथमुच्यते।

कृष्णैकादश्यामशननिवृत्तिमात्रमित्यादि सद्यौ। कूर्मपुराणादिवचनबलात्तु नशो
रवेन पिबेत्तोयं न खादेन्न स्पृशेत्करो। एकादश्यां न भुंजीत पक्षयोरुभयोरपीति। इति
विष्णुधर्मोत्तरेपि। स ब्रह्मघ्नः स गोघ्नश्च स्तेयी च गुरुतल्पगः। एकादश्यां च यो भुंक्ते पक्षयो
रुभयोरपीत्यादिवाक्यैस्तेन नित्यत्वेन पक्षद्वयैकादश्योः प्रतिपादितत्वात्। तथा चास पृ
क्रांत्यां कृष्णपक्षे चेत्यादिवाक्यैः कृष्णपक्षे उपवासनिषेधश्च गृहस्थानां शुक्लामेव सदा गृहीत्या
दिवाक्यैः शुक्लैकादश्यामुपवासविधानाद्ग्रसकाम्यैर्गृहिभिः शुक्लैकादश्यामुपवा
स व्रतं कार्यं। तदुक्तं। शयनीबोधनीमध्ये या कृष्णैकादशी भवेत्। सैवोपोष्या गृहस्थेन
नान्या कृष्णा कदाचन। इति। पुत्री नोपवसेद्दीति पुत्रवतो गृहस्थः। कृष्णैकादश्यां तूप
वासनिषेधस्सोपि शयनीबोधनीमध्ये कृष्णैकादशीषु किं विहितं संकल्पयितोपवा
संकुर्यात्। तदुक्तमनंतरं हीयो उपवासनिषेधे तत्र तु किंचित्तु प्रकल्पयेत्। न तच्च वि
द्याविषयेदर्शितं। अविद्यानामलाने तु पयो दधि फलानि वा सक्तु देवाल्पमश्नीयात् ७१

नो।
पवासस्तु सोपि न भवेदिति। वायुपुराणे तु विशेष उक्तः। नक्तं हविष्यान्नमथोदनं वा फलं ति
लाः क्षीरमथांबु चाज्यं। यत्पंचगव्यं यदि वापि वायुः प्रशस्तमत्रोत्तरमुत्तरं चेति। यानि
पुनर्यथोत्तरवादकिलोवाप्यनेन परिकीर्तितं। तुल्यं पुण्यमवाप्नोति द्वादश्योरुभयोर
पि इति तथा। सोमसूर्यग्रहे पुण्ये तथैव वसुभिः स्मृतौ। तथा सितासिते पुण्ये द्वादश्यौ दि
ष्टुतुष्टिदाविति। कूर्मपुराणे। नारदीयपुराणादिवचनानि पक्षद्वये उपवासविष
यकानि तानि यतिवानप्रस्थविषयाणि ज्ञेयानि। कृष्णविशेषेण विधानात्। अन्यथा शुक्ला
मेव सदा गृहीत्यादिवाक्यविरोधः स्यात्। अयं नित्यैकादश्युपवासनिषेधो गृहस्थस्याका
म्यस्य कामनानुसारेण निर्णयः। संति चोत्तरैकादश्युपवासे भिन्नानि फलानि। यथा कू
र्मपुराणे। यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः। एकादश्यामुपवसेत् पक्षयोरुभयो
रपीति। गोभिलोऽपि। एकादश्यां सिते पक्षे यस्तु कुर्यादुपोषणं। स विष्णुलोकं व्रजति
कृष्णपक्षे विष्णुरित्यादिवाक्यैः फलविशेषाभिधानात्। तत्तत्फलापेक्षया नयेका

दशपोरंतरेकादश्यांवाप्युपवासं कुर्यादित्यलमतिविस्तरेण॥ अथोपवासस्वरूपं
निरूप्यते। यदुक्तं वै विष्णुधर्मोत्तरे। उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह। उ
पवासः स विज्ञेयो सर्वभोगविवर्जितः॥ इति। अत्र पापेभ्यो निवृत्तिः स्यादित्युक्तं। निराक
राणि पापानि ध्यत्र खुमंतराह। विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः। निषिद्धसेव
नं चैव वर्जनीयानि यत्नतः॥ हारीतोपि पतितैः पाषंडनास्तिकादिसंभाषणमनृता
लीलादिकं चोपवासे वर्जयेदिति। विष्णुपुराणे तस्मात् पाषंडिभिः पापैरालापं स्पर्शनं
तु। विशेषेण क्रियाकाले यज्ञादौ वापि दीक्षित इति। कूर्मपुराणे वदियमांद्यग्राहे
नः पतितं सरजस्वलां। नस्पृशेन्नाभिभाषेत नेक्षेत व्रतवासर इति। पाषंड्यादिस्पर्शनि
रनि विषये प्रायश्चित्तमपि पुराणे एवोक्तं। यथा स्पर्शने निःस्नानं चाख्य विरादित्यद
र्शनात्। संभाषणे तु सविषदं चिंतयेदच्युतं बुधः॥ इति। तेषामालोकने सूर्यं पश्ये
न्मतिमान्नरः॥ इति। सविषदंस्तु विष्णुपदं। विष्णुधर्मोत्तरेपि। असंभाष्यान् संभाष्य ७२

उपवासादुपवसन्नमधद्वादशीतोर्द्ध छे

दृष्ट्वा स्पृष्ट्वा व्रती नरः। आमलकाफलं पारणे प्राश्य शुध्यतीति। गुणैः सहेति गुणा एवमिति चोक्तं तत्र
गुणाश्च विष्णुधर्मोत्तरे उक्ताः॥ यथा॥ तज्जप्यजपनं ध्यानं तत्कथाश्रवणादिकं। तदर्चनं च तस्यैव
कीर्तनश्रवणादयः। उपवासकृता ह्येते गुणाः प्रोक्ता मनीषिभिरिति। न स्पष्टेन प्रकृतत्वाद्विष्णुसंबं
निधीयते। अथोपवासकृता नियमाः उच्यंते। उपवासव्रते दंतधावनं प्राणिहिंसनं चौर्यं। असत्प्र
लपानं च मज्जनं बुलनहरणं स्त्रीसंयोगं दिवास्वापं मांसं च परिवर्जयेत्॥ तदुक्तं॥ वृद्धवशिष्ठेन उ
पवासे तथा श्राद्धे न खादेद्दंतकाष्ठकं। दंतानां काष्ठसंयोगो हंति सप्त कुलं नर इति। उपवासादि
षु दंतकाष्ठनिषेधे तु कल्पो व्यासेनोक्तः। यथा। अलाभे दंतकाष्ठानां निषिद्धायां तिथावपि। अपां
द्वादशगंडूषैः पात्रैर्वा दंतधावनमिति। दंतधावने प्रायश्चित्तं विष्णुधर्मे प्युक्तं। आद्योपवासदि
वसे आदित्यो दंतधावनं। गायत्र्याः शतशः पूतं मंत्रं प्राश्य विशुध्यतीति। हिंसाचौर्ययोः प्रायश्चि
त्तं स्मृतिसंग्रहे प्रोक्तं। कृत्वा हिंसां कृत्वा स्तेयं दिनं सनवन्नरः। प्रायश्चित्तं जपं कुर्यात् कृपेन्द्रा
मत्रानत्रयं इति नामानि विष्णुनामानि। मिथ्यावादे दिवास्वापे बहुशो जलपाने च प्रायश्चित्तं का
त्यायनेनोक्तं। मिथ्यावादे दिवास्वापे बहुजलनिषेवणे। अष्टाक्षरं व्रतं जप्त्वा शतमष्टोत्तरं शुचिः

इति। अष्टाक्षरं तु। ॐ नमो नारायणायेति। तांबूलचर्वणस्त्रीसंभोगमांसभक्षणेषु पैठी
नसिना प्रायश्चित्तमुक्तं। तथा। तांबूलचर्वणस्त्रीसंभोगमांसनिषेवणे। व्रतलोपो न चेत्कु
र्यात्तत्सव ऋतुं विवर्ज्जनमिति। अत्र सामान्येन स्त्रीसंभोग इत्युक्तेः। पि स्वेषु दारेषु ऋतु
कालगमनादिषु व्रतलोपो नास्ति। तदुक्तं कात्यायनेन। रतःसेकात्मकं भोगं ऋते चैत्र त्यजेः स्व
तइति। रतःसेक ऋतुकालगमनं भिन्ननिमित्तं। तदात्मकं संभोगं वर्ज्जयित्वान्यत्र संभोगेष्व
तस्याच्चय इत्यर्थः। ऋतुकालेपि षोडशनिशानिर्देशात्। तदतिक्रमे दोषश्रवणात्। अन्य
निशासु व्रतादिवसे नाद्येपि गमनाभिने षोडशनिशापर्यंतं। कालांतरेपि कर्तुं शक्यत्वात्।
नातिक्रमदोषः। अन्यास्व षोडशात्मक एव ऋतुकालः। तत्र रतःसेक व्रतभंगो नास्तीत्यर्थः।
स्वदारव्यतिरिक्तास्त्रीप्रेक्षणस्पर्शनादिभिरपि ब्रह्मचर्यभंगो भवति। यथा। स्त्रीणां संप्रेक्ष
णात्स्पर्शात्तासां संकथनादपि। विघटेद्ब्रह्मचर्यं हि स्वदारेष्वप्यसंगमादिति। अत्र सं
प्रेक्षणादिकं सरागमेव। ततश्च मात्रादिस्वल्पदर्शनेन न दोषः। ऋतुसंगमादितिरुक्तरपि ७३

उ॰ ...दुपवनमथ द्वादशीनोर्द्धं से मि

षोडशनिशाया अर्वाचीनः सावकाशात्। ऋतुकालाङ्गेयाः। अन्यथा कात्यायनवचनविरो
धस्तु। अतश्च स्वदाराणां स्पर्शनादिभिरपि ब्रह्मचर्यभंगो नास्तीत्यर्थः। इत्युक्तनियमस्थितः प्रातस्ना
नानंतरं उपवासकल्पं कृत्वोपवासं कुर्वीत। तेन चानिश्चये मनसैव मंत्रेणासंकल्पयेत्। एकादश्यां
निराहारः स्थित्वा चैवापरेऽहनि। भोक्ष्ये पुंडरीकाक्ष शरणं मे भवाच्युतेति। काम्ये तूपवासेऽल
संकल्पं तत्र कुर्यात्। तदुक्तं देवलेन। इह
सन्पूर्वोक्तमंत्रेण संकल्पयेद्बुधः। इति। अत्र यथा
प्रसूतताम्रपात्रं दक्षिणे हस्ते धृत्वा उदङ्मुखः। उपवासं तु गृह्णीयाद्यथासंकल्पयेद्बुधः। विपि अयं काम्योप
औदुंबरपात्रं वारिपूर्णमुदङ्मुखः। उपवासं चोच्यते। अतश्च काम्यादिषु दाशा संगतं स्यात्। अथो
संकल्पयेदिदमनेन संकल्पानां बाहुल्यं चोच्यते। यथासंकल्पयेदिदं सायंप्रा
वासविधिरिति ज्ञायते। नित्यसंकल्पनेदानावात्। यथासंकल्पयेत्केवलमेकादश्यां नित्योपवासे
पर्वासु नियमे नित्यकाम्यनेदेव विशेषांतरस्यच्यते। नित्योपवासे केवलमेकादश्यां। तदुक्तं कात्यायनेन। नित्योपवासी
तस्य तोऽनवर्जयेत्। दशमीषा दश्योर्निकन कनियमः। संप्राप्ते हरिवासरे इति। विप्र इति सर्व
योम च्यः सायंप्रातर्द्विजक्रियां। संध्यादेस्मतिमात्रिपसंप्राप्ते हरिवासरे इति।

वर्ज्योपलक्षणं। काम्योपवासे तु दशम्यां द्वादश्यां चैकनक्तं कार्यं। एकादश्यां उपवासः का
र्यः। तदुक्तं देवलेन। सायमाद्यंतयोरह्नोः सायंप्रातश्च मध्यतो। उपवासफलप्रेप्सुर्जह्या
द्भुक्तिचतुष्टयमिति। अत्र फलप्रेप्सुरिति विशेषणेन काम्यविषयत्वं ज्ञापयति। काम्यं एव
विशेषांतरं कात्यायनेनोक्तं। अष्टाक्षरेण मंत्रेण त्रिरभ्यस्तेनाभिमंत्रितं। उपवासफलप्रेप्सुः पि
बेत्पात्रगतं जलमिति। काम्योपवासे दशम्यादिदिनत्रयं कांस्यादि विवर्जयेत्। तदुक्तं मत्स्यपु
राणे। कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभाषणं। अयाच्यनोपवासं च दिवास्वापं च मैथुनं। ति
लपिष्टं मसूरं च दशम्यादि विवर्जयेत्। विष्णुधर्मोत्तरेपि। कांस्यं मांसं मसूरं च पुनर्भोजनमै
थुने। द्यूतं मद्यं बुपानं च फलप्रेप्सुर्विवर्जयेत्। इति। अत्र मद्यमांसयोर्येषां प्राप्तिस्तेषामे
व निषेधः। अंबुपानमत्रासकृदन्निषेधः। स्कंदपुराणे। कांस्यं मांसं मसूरं च चणकं कोरदूष
कं। शाकं मधु परान्नं च वदन्नुरष्टाविमफलमिति। शाकक्षुपादिकं। व्रतप्रारंभे चान्यदि
रंतः शोधनं प्रायश्चित्तं च कार्यं। शारीरमंतःकरणोपघातं वाचस्य विष्णुर्भगवानशेषं। ५४

उ ...दुपवासनमथद्वादशीनोर्ध्वे ...

ममो

शामंनयाशुमिमे दशामनूयाननं तेह दिसं निविष्टो। अंतःशुद्धिं बहिःशुद्धिं सिद्धोधमस्मियो
च्कतः। सकरोतु ममैतस्मिन्नुष्ठविरवाप्नु सर्वदेति। अनेन मंत्रेण शुद्धिं च योक्तनियमो
येतत्र उपवासं कुर्यात्। ७। इदानीमुपवासानुष्ठानसिद्ध्यर्थं शुद्धा विद्धा दिनेदेन एकाद
श्यामष्टादशते दाः त्र्यं तेन तत्र शुद्धैकादशी न्यूनाधिक्ययोगात्त्रिधा। सा त्रिविधापि द्वादशी
समा न्यूनाधिक्ययोगात् प्रत्येकं त्रिधा भवति। एवं शुद्धायाः नवभेदा यथा। शुद्धसमा द्वादशी
न्यूना शुद्धसमा। १ द्वादशीसमा। २ शुद्धसमा द्वादश्यधिका। ३ शुद्धन्यूना द्वादशी समा। ४ शुद्ध
न्यूना द्वादशी न्यूना। ५ शुद्धन्यूना द्वादश्यधिका। ६ शुद्धाधिका द्वादशी समा। ७ शुद्धाधिका
द्वादशी न्यूना। ८ शुद्धाधिका द्वादश्यधिका चेति। ९ एवं विद्धापि साम्यन्यूनताधिक्ययोगात् त्रि
विधा। सापि द्वादशी साम्यन्यूनताधिक्ययोगात्प्रत्येकं त्रिविधा। एवं विद्धाया अपि नवभेदाः।
तथा। विद्धसमा द्वादशी समा। विद्धसमा द्वादशी न्यूना। विद्धसमा द्वादश्यधिका। विद्धन्यू
ना द्वादशी समा। विद्धन्यूना द्वादशी न्यूना। विद्धन्यूना द्वादश्यधिका। विद्धाधिका द्वादशी समा।

विद्धाधिका द्वादशी न्यूना। विद्धाधिका द्वादश्यधिका चेति। एवं मिलित्वाष्टादशभेदा भवं
ति। अत्र सर्वेष्वपि भेदेषु एकादशीद्वादश्योः समत्वं नाम षष्टिघटिकात्मकत्वं न्यून
त्वं न्यूनत्वं। आधिक्यं आधिक्यं विज्ञेयं। अत्र शुद्धसमा द्वादशीसमादिषड्भेदेषु सर्वै
रुद्दिश्य तिथिः पूर्वैवापोष्या। तदुक्तं स्कंदपुराणे। शुद्धा यदा समा हीना समा चाक्षीणा
त्तराधिका। एकादशीमुपवसेन्न शुद्धां वैष्णवीमिति। शुद्धा एकादशी यदा समा। उत्त
रा द्वादशी समा च क्षीणाधिका वा। तथा शुद्धा यदा हीना उत्तरा च पुनस्तथा। विद्धेति शुद्ध
समा। इदं तेदत्र ये चैकादशीमुपवसेत्। न शुद्धां वैष्णवीं द्वादशीमित्यर्थः। यत्तु ब्रह्म
पुराणवचनं। एकलिप्याच संपूर्णा यदि वृद्धिपरा तिथिः। अथ चैकादशी नास्ति दश
म्या वाथ संगता। द्वादशी तु कला काष्ठा यदि स्यादपरेऽहनि। द्वादश द्वादशीर्हंति पूर्व
स्यां पारणं कृतमिति। अस्यार्थः। तिथिवृद्धिपरत्वे एकादशी परदिने एककला मात्रा वाऽस्ति अ ९५
थवा परदिने नास्तीत्युत्तरोऽस्तु यत्राऽपि त्रयोदश्यां द्वादशीसद्भावात् शुद्धद्वादश्यामेवोप

ऽस्तादुपवासनमध्यद्वादशीनोईये

वसेदिति। इदं तु विद्धसमाया द्वादश्यधिकशुक्लाया विषये समर्थकं। न तु शुद्धसमाशुद्ध
हीनाविषये। अन्यथा न शुद्धां वैष्णवीमिति वैष्णवीवचनविरोधः स्यात्। द्वादशीसाम्यशुक्ला
शुद्धाधिका द्वादशी हानिशुक्ला शुद्धाधिका च पूर्वा यदि दक्षैरुपोष्या। चेतितिसूचारतिव्यव
स्था। यदुक्तं मार्कंडेयपुराणे। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। पूर्वामुपवसेत्कामी
निष्कामस्तूत्तरां सदेति। अत्र कामात्कामपदाभ्यां गृहीयतऽन्यते। प्रायेण गृहीणां स
कामचाद्यतीनां निष्कामत्वाच्च तथा। एकादशी प्रवृद्धा चेच्छुक्ले कृष्णे विशेषतः। तत्रोत्तरां
यतिः कुर्यात्पूर्वामुपवसेद्गृहीति। स्कंदपुराणे। संपूर्णैकादशी यत्र प्रभाते पुनरेव सा।
तत्रोपोष्या परा त्वेका परतो द्वादशी यदि। सूर्योदये न तरपि। संपूर्णैकादशी यत्र प्रभाते पुन
रेव सा। वैष्णवी च त्रयोदश्यां घटिकैकापि विद्यते। गृहस्थोऽपि परां कुर्यात् पूर्वां नोपवसेत्
तत्र द्वादशी साम्यशुक्ला विद्धसमा। द्वादशीदानिक्षं
दिति।। अथ विद्धादिने दूष्यन्ते।। तत्र द्वादशी साम्यशुक्ला। तदुक्तं पुराणसमुच्चये। दश
विद्धसमा। पूर्वा गृहस्थैरुपोष्या। परा यतिभिरिति व्यवस्था।

मी। मिश्रिता पूर्वा द्वादशी चाविलुप्यते। एकादश्यां सदा ब्रह्मन्नुपवासः कथं भवेत्। इति प्रश्नो
शुद्धैव द्वादशी रात्रौ तूपोष्या मोक्षकांक्षिभिः। सकामैस्तु द्विजैः पूर्वा विद्धापीति विनिश्चय
इति। विद्धसमायां द्वादश्याधिक्यवत्यां तु एकादश्याम् एकादशीसद्भावात्। सर्वेषां पूर्वैवोप
वासः। तथा च विद्धहीना द्वादशी सामान्यमुक्ता द्वादश्यधिका च सर्वैरपि पूर्वैवोपोष्या। त
दुक्तं स्मृत्यंतरे। एकादशी न लभ्येत सकला द्वादशी भवेत्। उपोष्या द्वादशी विद्धा त्वृषिरुद्दा
लकोऽब्रवीत्। इति। ऋष्यशृंगोपि। सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः। प्रातर्भवेत्तुमा
वाघ्रवो नियमुपोषणमिति। विद्धाधिका द्वादशीसमाविद्धाधिका द्वादश्यधिका च सस सर्वै
रपि परैवोपोष्या। तदुक्तं विष्णुधर्मोत्तरे। एकादश्यष्टमी चैव द्वितीया च चतुर्दशी। अमा
वास्या तृतीया च उपोष्याः स्युः परान्विताः। इति। अत्र द्वादश्याधिक्यवत्यां विद्धसमायां विद्धा
धिकायां चेति। द्वितीयदिने एकादशीसद्भावात् परत्रैवोपवासः। दशमीवेधश्च निषेधश्चोत
दा नारदेन। नोपोष्या दशमीविद्धा सदैवैकादशी तिथिः। तामुपोष्य नरो हन्यात् पुण्यं वर्ष ३६

उपवासादुपवासनमथ द्वादशी नोर्द्ध्वमेति प्रश्नात् अत्र द्वितीया...

शतोद्भवमिति। तथा च दशम्यनुगता यत्र तिथिरेकादशी भवेत्। तस्यापत्यं विनष्टं स्याद्
परत्र नरकं व्रजेदिति। दशमीशेषसंयुक्ता गांधार्याः समुपोषिता। तस्याः पुत्रशतं नष्टं त
स्मात्तां परिवर्जयेदिति। एवं विद्धहीनात्रयेऽपि दशमीवेधनिषेधो नाशंकनीयः। तत्र त्रयोदश्यां
पारणा द्वादश्यसंभवात्। तदुक्तं ऋष्यशृंगेण। पारणाहे न लभ्येत द्वादशी कलयापि चेत्तदा
नीं दशमीविद्धाप्युपोष्यैकादशी तिथिरिति। अत्रापि घटिकाद्वयमिति पारणपर्याप्तवोप
लक्षणं वायुपुराणेऽपि। एकादशी यदा विद्धा द्वादशी च द्वयं गता। दशमीमिश्रिता न तूपो
ष्यास्तु सर्वैर्द्विजोत्तमैरिति। विद्धानिषेधवाक्यानि सर्वाण्यपि द्वादश्याधिक्यवत्यां विद्धसमायां वि
द्धाधिकायां च ज्ञातव्यानि। न तु द्वादशीसमवत्यां द्वादशीहानिमत्यां च विद्धहीनायां त्रयोद
श्यां पारणायाश्च द्वादश्यप्रव विद्धायामेवोपवासो युज्यते। द्वादश्याधिक्यवत्यां विद्धहीना
यां त्रयोदश्यां पारणायां द्वादशीसंभवात्। विद्धद्वादश्यामेवोपवासस्त्विति चेत्। तस्यां
विकल्पासदृचेनोपवासायोग्यचान्लक्ष्मीकारः। यथा किं सूर्योदयादर्वाचीनद्वादशीनागेन

पवासः॥ किंचोदयादुत्तरस्मिन् द्वादशी नागेनाद्यः। तस्यैकाद्यास न त्वेष्कपवासायोग्यत्वा
तू नाधिद्वितीयः। तस्योपवासयोग्यत्वेप्येकादश्यैश प्रत्यासन्नत्वात्। अतश्च विद्धानिषेधवाक्या
एपनवद्येक्तौ विद्धाधिकाद्वादशीदीनातुष्टद्वैः पूर्वोपोष्यायतिन्निरुत्तरोरिति व्यवस्थात
डुक्तं। एकादशी द्वादशी वरा त्रिशेषे त्रयोदशी। उपवासं न कुर्वीत पुत्रपौत्रसमन्वि तद्गतो हि
एः परत्र उपवासनिषेधस्तु उपवासस्य नित्यत्वेनावश्यकत्वात्। पूर्वविद्धैवोपवासो वक्ष्यीयते।
परविद्धाव्यापकवाक्यसामर्थ्याद्दिनीनां परत्रैवोपवासो वक्ष्यीयते। यथाह संपूर्णा द्वादशीय
त्रि त्वनवद्येकादशीकला। दिनक्षयेपि साश्रुण्यान दशम्या युता क्वचिदिति। तथाचोक्ता कल्पाप्य
कादशी यत्र द्वादश्यनुगता न वेत्तु। दिनक्षयेपि साश्रुण्यायतीनामुत्तरा तिथिरिति। यस्त्वने
प१ तन्दवाक्ये यतिदृष्टस्याप्युपलक्षणं। न तर व्याहत्यर्थी। तथासति प्राप्य भावेन पुत्र
[illegible]२ चतोष्ट[illegible]पवासनिषेधानुपपत्तिरित्युक्तं। ततो नागवता[illegible]तु पद्धयातेनेति गम्यते। यतः ५५
सर्वेषां शब्दानां सजातीयोपलक्षकत्वा[illegible]ति पदस्य विजातीयदृष्टोपलक्षैवेष्टसिद्धिविरोधात्।

इतरव्यावृत्त्यर्थत्वे सतीत्यर्थः २

उ[illegible]नुपपत्त[illegible]मध्ये द्वादशी नोर्द्धमेति प्रज्ञाज्यात्र द्वितीयामुपवसेत्तु नः ६

किं चानियमं मद्यं ब्राह्मणे[illegible] यदि द्विजा दौ वाक्यांतरा[illegible] प्राप्तमेव मद्यपानादिकं निषिध्यते। एव
म[illegible]त्रापि पितृव्रत गृहस्थस्य वाक्यांतरा[illegible] प्राप्तोऽपि कामतः श्राद्धे[illegible]पवासो निषिध्यत इति निषे
धस्योपपद्यते। किंच। ततेरेवसंपूर्णैकादशी[illegible]त्यादि विज्ञानेश्वरसंयदसंमतिं दर्शयित्वा स्वपद्य वि
द्धायाद्यपाश्वविद्धेति तस्येषां संमति निर्दर्शिता। एतत्संमतिश्रोकालि[illegible]ने। संपूर्णैकादशी[illegible]
व [illegible]यात्नवति परतः सासमावासमासन्नपि नाचान्यन्यनाथवैनास्त्रिवाष्विप्रजनोऽहरिद्दिनं द्वादशीवापि
चार्ह्यं सर्वे कुर्युः एवमन्येतु सर्वे यद्येषा पूर्वविद्धा नवति परतः सासमा वासमा ईवा सर्वे कुर्युः
द्वितीयामथ हरिदिवसः पूर्वविद्धापि या[illegible]यतु। द्वादश्यां सा[illegible]स्पृश्यदि नवति परं सा द्विीणपूर्व
मन्येय द्वावि वैत्तरोत्तरपरस्य परित्तवेद त्रस सर्वे परस्मात् पूर्वं विद्धयसानन्नवति परमाद्वादशी
साऽपि सा वैकयतित्राप परिष्टान्तु निर्ज्ञान निकरः एवमन्ये वसवैर्विद्धां प्रातर्दशम्यां हरिदिनम
द्वादशी थव[illegible]रात्रिशेषे सर्वैः पूर्वं तदानीमुपवसेतु जनः प्रीतये केशवस्येति अत एव भा
गवतमतानुसारिणां नंतभट्टव्याख्यानमिति प्रतीयते। स्मार्त्तमते तु विज्ञानेश्वराद्युक्तौ वयदि य
द्यविविक्ते वयलमतिप्रपंचेन। अथ प्रकृतमनुसंधीयते। न च एकादशी यदा विद्धा द्वादशी च क्षयं गता।

त्रिदिनं तस्य विज्ञेयं तत्र पुण्यमनंतकं। दानं वाप्येकभक्तं वा तदा कुर्याद्यथाचितं। इति। द्वाद
शीद्वये नक्तादिकं विहितं। ननु कथं द्वयं दियतिविषयत्वेन व्यवस्थोक्तेति चेत्। सत्यं। एकादशी
व्रतस्य नित्यत्वाद्व्यवस्था सिद्धिः। अविद्धाप्यनिषिद्धा चेन्न लभ्यते तत्र यदा तिथिः। शुक्ले वैः पंचमि
विद्धायाप्येकादशी न वेदिति। पंचमुहूर्तविद्धा या अपिग्रहणान्नैकभक्तादि विषयस्तु
शाकविषयं। नक्तादिविधेयस्तु वादकाद्यनुविशेषो मनुयतीनामुत्तरैकादश्यामुपवास
क्यक्तो। तदा त्रयोदश्यां पारणं स्यान्न तु निषिद्धं। यथा कलाकाष्ठामुहूर्त्तैर्वा यदि चेन्न परे
हनि। द्वादशी द्वादशीं हंति त्रयोदश्यां तु पारणमिति। तथा चाप्येकादशीमुपोष्यैव द्वादश्यां
पारणं स्मृतं। त्रयोदश्यां न तत्कुर्याद्द्वादशद्वादशीक्षयात्। इत्यादिनिर्मत्स्यपुराणादिति
वाक्यैस्त्रयोदश्यां पारणनिषेधः कथमुत्तरोपवास इति चेत्। सत्यं। त्रयोदशीपारणवि
धस्य एकवाक्यबलादिति ब्रूमः। तदुक्तं वायुपुराणे। कलाप्येकादशी यत्र परतो द्वादशी
नवतु। पुण्यं क्रतुशतं तस्योक्तं त्रयोदश्यां तु पारणमिति। तथा च। एकादश्यां तु विद्धायां नो ३८

यवासार्द्धेनादिकं। द्वादश्यामेव तत्कुर्यात् त्रयोदश्यां तु पारणमिति। शतयज्ञाधिकं पुण्यं मुक्ति
रेव परं फलमिति। तर्हि विरोधेन विप्रपत्तिरिति चेत्। त्रयोदशीपारणविधिर्निःकामविषयः। त्र
योदशीपारणनिषेधः सकामविषयः। इत्यविरोधः। तदुक्तं स्कंदपुराणे। पारणं तु त्रयोदश्यां नि
कामानां विमुक्तिदमिति। गरुडपुराणेऽपि। पारणं तु त्रयोदश्यां न कर्त्तव्यं फलार्थिभिरिति। न चै
वं व्यवस्थितानामेकादशीपारणव्यवस्थासु यत्र शुद्धा दशी साम्यवत्यां विद्धादिकायां द्विरुत्त
रत्रैवोपवासः। तत्र कथं सदुपपत्तिरिति चेत्। सत्यं। तत्र तत्र परैकादशीविषयकवाक्यबलाद
व त्रयोदश्यां पारणोपपत्तिरिति न किंचित्कष्टं। यथा त्रयोदशीपारणनिषेधवाक्यानि पारणप
र्याप्तद्वादशी संभवतामतितिक्रम्य त्रयोदश्यां पारणं कार्यं। इत्येवंपरत्वेन वर्णनीयमिति। न
ह्यतिक्रमदोषश्रवणात्। यथा। यदि किंचित्त्रयोदश्यां द्वादशी वोपलभ्यते। द्वादश्यां पारये
त्तत्र वर्जयित्वा त्रयोदशीं। महादानिकरी ह्येषा द्वादशी लंघिता नरैः। करोति धर्महरणमस्ना
त्वसरस्वती। न तु द्वादशी घटिकामात्रा द्विघटिका वा भवति। तदाल्पायां द्वादश्यां प्रात

मध्याह्निकमैककर्मानुष्ठानासंभवात् कथं द्वादश्यां पारणोपपत्तिरिति चेत्। सत्यं। मध्याह्
ह्निकं कर्मापि प्रातरेव पश्चात् पारणं कार्यं। तदुक्तं गरुडपुराणे। यदा त्वल्पा द्वादशी स्या
त्तत्रापकृष्य तु क्रियेत। विधिर्मध्याह्निकस्यापि तत्र स्यादपकर्षणमिति। स्कंदपुराणे
पि। यदा न वर्तते वाल्पा द्वादशी परतो दिने। उषाकाले द्वयं कुर्यात् प्रातर्मध्याह्निकं सदे
ति। यदा अल्पायां द्वादश्यामह्निः पारणं च ह्यान्हिककर्मानुष्ठानानंतरं भोजनं कुर्यात्।
तदुक्तं कात्यायनेन। विधादितरुचिनिर्थं पारणानिमित्तः। अद्भिस्तु पारयित्वा तन्नित्यका
र्यं तु निर्वर्तयेत्। देवलोऽपि। संकटे विषमे प्राप्ते द्वादश्यां पारयेत्कथं। अद्भिस्तु पारणं कुर्यात् पु
नर्भुक्तं न दोषकृदिति। पारणे मंत्र एवं कृत्वोपवासं स्वयं निवेद्य कुर्यात्। तदाह का
त्यायनः। मंत्रं पठित्वा देवस्य निवेद्योपोषणं व्रती। द्वादश्यां पारणं कुर्याद्धविर्जैर्यथाह्यपा
दकीमिति। उपोदकी शाकविशेषः। मंत्रः। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद
सुमुखो नाथ ज्ञानदृष्टिप्रदो भव। तम्लत्वम्लत्ता पालुत्तम गतीनां गतिर्भव। संसारार्णवम ३९

ज्ञानां प्रसीद मधुसूदनेति। द्वादश्या आद्याः पंचदश नाडिकाः हरिवासरसंज्ञाः। ताश्च
तिक्रम्य पारणं कुर्यात्। तदुक्तं विष्णुधर्मोत्तरे। द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः।
तमतिक्रम्य कुर्वीत पारणं विष्णुतत्पर इति। उपवासाशक्तौ वृद्धातुरादिक उपवासा
चकूलमेकनक्तादिकं वा द्वादश्यामेवोपवासे समापयेत्। तदाह कात्यायनः। उप
वासे चाशक्तानामशीतेरूर्ध्वं विना। एकनक्तादिकं कार्यमाह बौधायनो मुनिरिति।
कूर्मपुराणेऽपि। एकभक्तेन नक्तेन क्षीणवृद्धातुरः क्षिपेत्। नातिक्रामेद्द्वादशीं तु उपवा
स व्रते भवति। मार्कंडेयोऽपि। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन दानेन
न निर्द्वादशिको भवेत्। इति वायुपुराणेऽपि। अपि वा विप्रमुख्येभ्यो यो दानं द्याच्छशाक्ति
नः। उपवासफलं तस्य समग्रं संभविष्यति। तत्र भोजनदोषोऽपि तत्तरणाद्वनस्पती
ति। एकनक्तादिष्वशक्त उपवासादिव्रते नाथादीन् विनियोजयेत्। तदुक्तं स्कंदपुराणे।
असामर्थ्ये शरीरस्य व्रते च समुपस्थिते। कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितं। ब्रात

ऽधर्मपत्नी सा स्वभगिनी शिष्यब्राह्मणं दक्षिणादिभिः। दक्षिणामंतरेणापि माताभ्रातृधवार्थं
उपोषणे घंथौ द्वियाः प्रक्रम्य उपवासफलं लभ्यं। यथाह कात्यायनः। पितृमातृभ्रातृपतिगुर्वर्थे
च विशेषतः। उपवासं प्रकुर्वाणः पुण्यं शतगुणं लभेत्। दक्षिणा नात्र दातव्या स्वस्रूपा
विहिता हिंसेति। तथा। नारी च पतिमुद्दिश्य एकादश्यामुपोषिता। पुण्यं शतगुणं याति
नि बोधायनो ब्रवीत्। उपवासफलं तस्याः पतिः प्राप्नोत्यसंशयं। यथा राज्ञः पुरस्तः क्षत्रिया
द्विविएकादश्यामुपोषिता। पुरोधाश्च क्षत्रियस्यार्थे फलं प्राप्नोति निश्चितं। उपवासफ
लं तात्यांस समं वसमाप्यते। पितामहादीनुद्दिश्य एकादश्यामुपोषणे। कृते तु न तु फ
लं विप्राः समग्रस्य मवाप्नुयुः। कलौ शतगुणं पुण्यं प्राप्नोत्यत्र न संशयः। एकादशीव्रतं
सूतके दानार्चनवर्जितं कुर्यादिति। तदुक्तं वाराहपुराणेपि। सूतके तु नरः स्नात्वा प्रा
णम्य मनसा हरिं। एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते। यथा। प्रवसं कल्पितं य
द्व्रतं तु नियतव्रतैः। कर्तव्यं तु नरैः शुद्धं दानार्चनविवर्जितमिति। मृतके चैकादश्यां ८८

मनोऽनं कुर्यादेकादश्यां स्नात्वा भुंजीत। तदुक्तं वाराहपुराणे। मृतकेह्नि भुंजीत एकादश्यां सदा
नरः। द्वादश्यां च समश्नीयात् स्नात्वा विष्णुं प्रणम्य वा। इति कूर्मपुराणेपि। काम्योपवासे प्रक्रांते
अंतरा मृतसूतके। काम्यं नाम व्रतं कुर्यात् दानार्चनविवर्जितमिति। सूतके वर्जितं दानादिकं त
दंते कुर्यात्। तदुक्तं मत्स्यपुराणे। सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनं। दानं दत्वा विधाने
न व्रतस्य फलमाप्नुयादिति। स्त्रीणां व्रतविषये विशेषो लिख्यते। नारी रूढापि पितृसुता धवानु
ज्ञयैव व्रताधिकारिणी। नान्यथा। तदाह कात्यायनः। नार्यपि भर्तुर्मते नैव व्रतादीनाचरेदिति।
मनुरपि। नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणमिति। विष्णुरपि। पत्यौ जीवति या नारी उ
पवासव्रतं चरेत्। आयुः सा हरते भर्तुर्नरकं चैव गच्छति। मार्कंडेयोऽपि। नारी ह्यप्यननुज्ञा
ता भर्त्रा पित्रा सुतेन वा। निःफलं तु भवेत्तस्याः यत्करोति व्रतादिकं। इति। स्त्रिया व्रते दंतधाव
नादिकं न दुष्टं। तथा च मनुः। स्त्रीधर्मप्रकरणे। पुष्पालंकारवस्त्राणि गंधधूपानुलेपनं। उपवा
सेन दुष्यंति दंतधावनमंजनमिति। रजस्वला तु नारी भर्तारं पुत्रं भगिनीं भ्रातरं वा प्रार्थय
दक्षिणां वा ब्राह्मणं वा स्वयं न भुंजीत। तदाह पैठीनसिः। नार्यपि एकव्रतं कयति
नियोजयेत्।

नार्यायाश्चपतिव्रते। असमर्थपरं तास्यां व्रतसंगो न जायत इति। स्कंदेपि। भर्त्रा वानु
तनयोपेतां भगिनी भ्रातरं तथा। एषामभावएवान्यं ब्राह्मणं वा नियोजयेदिति। यत्तु
एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि। तथा। संप्रवृत्तेपि रजसि न त्याज्यं द्वादशी
व्रतमिति। तथा। प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्। नात्रापि व्रतस्य स्यादुपरोधः
कथंचनेति। इत्यादिवाक्यैः रजस्वलाया अपि व्रतमुक्तं। तत्र पत्यादिना प्रिव्रतं कार
यितव्यं। तेन कृतेपि स्वस्य व्रतफलं भवति। अन्यथाशुचिना कर्मकर्तव्यमिति विरोधः
स्यात्। शुचिर्व्रतस्याः पंचमेहनि। यथा। पंचमेहनि शुद्धा स्याद्दैवे पित्र्ये च कर्मणीति।
अतश्च रजस्वला नारी पत्यादिकं व्रते नियोजयेत्। एकादश्यां न भुंजीत दृष्टे नारी रजस्य
पीति। पुलस्त्यवचनात्स्वयमपि न भुंजीत। रजस्वलापि सूतकन्यायेन पंचमेहनि दाना
र्चनं कुर्वीतेति सिद्धं। एकादश्यां सांवत्सरिकश्राद्धे संप्राप्ते पितृन्नोषं समाघ्रायोपवा ८
संकुर्यात्। तिथिश्राद्धे कर्तुर्विहितं भोजनं चैकादशीविहितं न भवति। तदाह कात्यायनः। उपवा

ग्रं०१

सय दानित्यश्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितमिति।
तथा च श्रुतिरपि। अवघ्रेयमेव तत्रैव प्राशितं नैवाप्राशितमिति। एवमेकादश्यां स्मार्त्तम
तेन निषेध उक्तः। तत्र विज्ञानेश्वरसंग्रहश्लोकाः पूर्वमेवोक्ताः। इदानीं विश्वरूपनिबंधो
क्ताः संग्रहश्लोका लिख्यंते। यथा। शुद्धा त्रेधा तथा विद्धा भवेत्तन्नूनसमाधिकैः। प्रत्येकं च पुन
स्त्रेधा दशभिन्नसमाधिकैः। आद्यासु षट्सु पूर्वैव व्यवस्था नांतरद्वये। गृहमेधियतीनां च
आद्यास्तिस्रस्तु पूर्वाः स्युर्व्यवस्थानांतरद्वये। अपरेहनि शेषास्तु सङ्ग
नवमी चापरेहनि। अथ यथांतरा। हीनाहीनाऽधिका शुद्धा हीनाहीनापराऽधिका। द्वयोर्द्वयोः सप्तमं
मी च व्यवस्थयेति। उपवासस्य संग्रहः। शुक्लेषु कृष्णे विद्धे त्रिके पूर्वव्यवस्थिता। यथोक्तं भविष्योत्त
शी विद्धा या त्र विनिस्तिथिसंग्रहः। अत्रैकादश्यामुपवासः उक्तः। स च चतुर्विधः। यथा। चतुर्विधमुपोषणमिति। अत्र स
स्वरोषधेकादशीपरेहनि। अत्र एकादश्यां भोजनं साहारं च निराहारं च चतुर्विधमुपादेः सर्वत्रानुगतः। केवलोप
वासस्तांबूलमतांबूलं सभोजनमभोजनं। साहारं च निराहारं च चतुर्थस्तु तांबूलादि पादः। सर्वत्रानुगतः
तांबूलं। सभोजनं साहारं चेति त्रयो भेदाः

वासः॥ चतुर्दश्यामिषिद्धरूपं तत्रैवोक्तं। यथा। यावत्तां क्षि कोन स्याद्यावन्नाद्ययिते द्विः॥
तावदश्नाति तांबूलं स तांबूलं तदुच्यते। इत्युक्त्वा चक्रतं पूर्वं पूसन्तुनत्वांश्च नक्रियः॥ तदा
तुक्तौ भुनर्त्के तत्मन्नोऽनमुच्यते। आद्यं त्वचापि दृष्टं श्राप्यसंतप्यज्ञातिबांधवान्॥ सर्वस्मिंका र्द
मंमन्नाद्यं येशेषं यद्गस नोऽशने। समुपाघ्रायपित्र्यं गोस्याद्यानुप्रयन्नतः॥ अथोपवा
सनियमं तत्सादारंभकीर्तितं। इति। एषत्रयोनदादशविशेषविषयाः॥ अधिकारिविशे
षविषयाश्चज्ञातव्याः॥ चतुर्थस्तु सर्वसाधारणः॥ अत्रशुद्धाविद्धादिभेदेन निर्णय उक्तः॥
तत्रकीदृशी शुद्धा। कीदृशी विद्धेति। अत्रसूर्यसिद्धांत उक्तं। यथा। सर्वा हि तिथयः उ
दयादुदयं स्मृताः॥ शुद्धा इति विनिश्चयाः षष्टिनाड्यो दिवा तिथिरिति। अतश्च सूर्योदय
मारभ्य पुनः सूर्योदयपर्यंतं स्थिताः॥ शुद्धा वंदावंतन्यतिथिसंस्कृता विद्धेत्यर्थः॥ न च अरुणोदय
वेलायां दशमी युता तु का दशी विद्धेति कथितं चक्तं॥ अरुणोदयवेलाकाल उक्तः स्कंदपुराणे
उक्तः॥ यथा उदयात्प्राक् चतस्रस्तु नाडिका अरुणोदयः। तत्र स्नानं प्रशस्तं स्यात्सहितु ८२

ण्यतमः स्मृत इति। अत्रारुणोदयकाले दशमीविद्धा नोपोष्या। यथा। नविष्णोर्नारोऽ
रुणोदयकाले च दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणमिति। सौ
रधर्मेऽपि च। आदित्योदयवेलायां प्राङ्मुहूर्तद्वयान्विता। एकादशी तु संपूर्णा विद्धान्याः
परिकीर्तिता इति। इत्यादीन्यरुणोदयवेधनिषेधकानि वाक्यानि। अन्यान्यपि च वचना
नि वेधवविषयाणि ज्ञातव्यानि। तदुक्तं गरुडपुराणे दशमीशेषसंयुक्तो यदि स्या
दरुणोदयः। नैवोपोष्यं वैष्णवेन तत्रानैकादशीव्रतमिति। वेधवशादूपं चस्कंद
पुराणे निरूपितं। परमानंदमापान्नो हरिवासरमुपस्थिते। नैकादशी त्यजेद्यस्तु यस्य दी
क्षास्ति वैष्णवी। समात्मा सर्वजीवेषु निज वाराद् विच्युतः॥ विल्यपिताच्छिमाचारः स
दिवेधवतश्चतो। अतस्त्वारुणोदयविद्धोऽपि दीक्षितैः परमभागवतैर्नोपवासः कार्यः॥
अन्येषां स्मार्तमतानुसारिणां। अन्येषामप्युक्तमतानुसारेणोपवास इति सिद्धांतः॥
अथचैत्राद्येकादशीषु॥ द्वय विशेषोऽभिलिष्यते। तत्रचैत्राद्येकादश्यां स्त्री निरूपणीह

ज्या। तदुक्तं ब्रह्मपुराणे। एकादश्यां तु तस्मिन्दिने वै पूज्याथ रुक्मिणी। पुष्पालंकारवस्त्रा
न्नधूपप्रज्वालनतर्पणैरिति। अत्रापराह्णे वासुपूजा कार्या। तदुक्तं ब्रह्मपुराणे। अत्राप
राह्णे वासुदेवश्मनां विशोधरकः। अर्घमाल्यैश्च वस्त्रैश्च पूज्योरंगैः सुविचित्रितैरिति।
अत्रैव रात्रौ दोलायां सलक्ष्मीको वासुदेवः सोऽप्यवमांदोलनीयः। तदुक्तं ब्रह्मपुराणे।
चैत्रमासस्य शुक्लायां एकादश्यां तु वैष्णवैः। आंदोलनीयो देवेशः सलक्ष्मीको महोत्स
वैः। वासुदेवमभ्यर्च्य रात्रौ जागरणं चरेदिति। इति चैत्रैकादशी॥ ॥ अथ ज्येष्ठैकाद
शी शुक्ले निर्जला। प्रसिद्धा तत्र निर्जलमुपवासं कुर्यात्। तदुक्तं स्कंदपुराणे। ज्येष्ठमा
सि नृपश्रेष्ठ या शुक्लैकादशी शुभा। निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान्। प्रदा
य विप्रमुख्येभ्यस्त्वायत्त्रय विवर्जितः। विष्णुलोकमवाप्नोति रामा दत्तविष्णुसंनिधौ। इति
निर्जलैकादशी॥ ॥ अथाषाढशुक्लैकादशी देवशयनी। तत्र स्वशक्त्या वक्ष्यमाण
लक्षणां सुवर्णादिनिर्मितां लक्ष्मीनारायणप्रतिमां क्षीराब्धौ शेषपर्यंके संपूज्या ८२

२
रात्रौ जागरणादिकं सर्वं कुर्यात्। एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः। भुजंगश
यने शेते यदा क्षीरार्णवे सदा। तदा तत्प्रतिमा कार्या सर्वलक्षणसंयुता। सुप्ता शेषप
र्यंके घटिता कामदारुभिः। ताम्रारकूटजा तैसी स्वथा द्विप्रपदेषु वा। लक्ष्म्या संगता सुवि
न्यस्तचरणांबुजा। नानाविधोपकरणैः पूज्या चाविधिपूर्वकं। उपवासश्च कर्तव्यो रात्रौ जा
गरणं तथा। तस्यां रात्र्यां व्यतीतायां द्वादश्यां पूजयेत्तथा। त्रयोदश्यां ततो निश्चं गीतवाद्य
निवेदयेत्। इति पुराणसमुच्चये प्रोक्तं। आषाढस्यासितपक्षे एकादश्यां सुपोषितः। स्वाप
येत्प्रतिमां विष्णोः शंखचक्रगदाधरां। पीतांबरधरां सौम्यां पर्यंके स्वास्तृते शुभे। शुक्लैर्वस्त्र
समाच्छन्ने सोपधाने युधिष्ठिर। इति इतिहासपुराणे। विष्णुर्नकोऽथवा देवमानूं स्वापयि
त्वा घृतक्षीरदधिक्षौद्रजलैस्तथा। समालभ्य सुगंधैश्च धूपदीपैरलंकृतां। पूजितां कु
सुमैः शुक्लैर्मंत्रेणानेन पांडव। मंत्रः। सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं। विबुद्धे च
विबुद्धं तज्जगत्सर्वं चराचरमिति। एवं संपूज्य देवस्याग्रे चातुर्मास्यव्रतं कुर्यात्। तदुक्तं

महत्तारते। आषाढे तु सितपक्षे एकादश्यामुपोषितः। चातुर्मास्यव्रतं कुर्याद्यत्किंचि
न्नियतो नरः इति। सनत्कुमाराख्याने। एकादश्यां तु शुक्लायां संक्रांतौ कर्कटस्य वा। आ
षाढ्यां वा नरो भक्त्या चातुर्मास्यादितं व्रतं। इति व्रतारंभे मंत्रश्च सनत्कुमारेणोक्तः।
इदं व्रतं मया देव गृहीतं पुरतस्तव। निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव। गृहीते
श्रा स्मिन् व्रते देव यद्यपूर्णे म्रियाम्यहं। तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। इति। अत्रै
व विशेषो वृद्धगार्ग्यायणोक्तः। न शैवं न मौघं चस्थ तेत्र वेनिर्मातिथिः। षंढत्वं चिंतये वा
ज्ज्ञा उचातुर्मास्यव्रतविधौ।। इति शयनैकादशी।। छ।। अथ भाद्रपदशुक्लैकादश्यां शय-
नैकादश्यामिव पूजोत्सवादिकं तथा देवस्य पार्श्वपरिवर्तनं कुर्यात्। तदुक्तं भविष्यो
त्तरे। प्राप्ते भाद्रपदे मासि एकादश्यां सिते दिने। कटदानेन वा विष्णोर्महापूजां प्रवर्त-
येदिति।। कटदानं पार्श्वपरिवर्तनं।। इति भाद्रपादैकादशी।। छ।। अथाश्विनशुक्लै-
कादश्यां उपवासजागरणादिकं तथा द्वादश्यादिषु पूजोत्सवादिकं कुर्यात्। तदुक्तं ८५

भविष्योत्तरे। आश्विने तिथिः। सोपवासश्च कर्तव्यः एकादश्यां प्रजागरः। द्वादश्यां वा
सुदेवस्य पूजनीयस्तु सर्वदा। अत्रोत्सवस्तु कर्तव्यः त्रयोदश्यां तु वैष्णवैः। उपवासश्चतु
र्दश्यां पूर्णिमास्यां दरियजेत् इति।। इत्याश्विनैकादशी।। छ।। अथ कार्तिकशुक्लैकाद
श्यां प्रसुप्तं देवं पूजाजागरणोत्सवादिभिर्मंत्रेण प्रबोधयेत् यात्रोत्सवं कुर्यात्। तदुक्तं ब्र
ह्मपुराणे।। एकादश्यां तु शुक्लायां कार्तिके मासि केशवं। प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभ
क्तिसमन्वितः। नृत्यैर्गीतैस्तथा वाद्यैर्ऋग्यजुःसाममंगलैः। वीणापणवशब्दैश्च पुरा
णश्रवणेन च। वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः। पुष्पैर्धूपैश्च नैवेद्यैर्दीपैर्हवैः
सुशोभनैः। मोदकैर्घृतपूपैश्च फलैः शर्करपायसैः। इद्यान्यांश्चतरक्तान्यां चंदना
न्यांश्च सर्वदा। कुंकुमालक्तकान्यांश्च रक्तसूत्रैः सकंकणैः। तस्यां रात्र्यां व्यतीतायां
द्वादश्यामरुणोदये। आदौ घृतेन क्षीरेण मधुना स्नापयेन्नरः। दध्ना क्षीरेण च तत
तः पंचगव्येन शास्त्रवत्। उद्वर्तनं माषचूर्णैः समसूरामलकानि च। सर्षपाश्च प्रियंगुश्च

थ मातुलिंगरसस्तथा। सर्वौषध्यः सर्वगंधाः सर्वबीजानि रोचनं। मंगलानि यथाकामं रत्ना
न्यंबु कुशोदकं। एवं संसाध्य दशावेद्यां जो रोचनं संस्तुतं। ततस्तु कल्पना देया यथाप्राज्ञाः स्व
लंकृताः। जातीपद्मकसंयुक्ताः सकलाश्च सकांचनाः। स्वर्णपाद वेदशाद्वे नवीणावेणुरवेण
चा एवं संस्थाप्य गोविंदं घनुलिंपचलं ततः। सुवाससं ... सुमनोभिः सकुंकुमैः। दीपैर्धूपै
र्मनोज्ञैश्च पायसेन घृतपूरिणा। यात्रायात्रन्नदानैश्च होमैः पुष्पैः सदक्षिणैः। वचोभिर्द्विष
तैरन्यैर्गोभिरश्वैर्मनोज्ञैः। ब्राह्मणाः पूजनीयाश्च विप्रा वाच्याश्च सूत्रयः। यत्तु विष्टाऽमृतं
पथ्याज्ञोकव्यं ब्राह्मणैः सहेति। न विष्णोः परं कार्त्तिकस्य शुक्लपक्षे तु एकादश्यां यथास्तु तामं
त्रेणानेन राजेंद्र देवमुत्थापयेद्द्विजः। इति मंत्रद्वयं वैदिकाः। पौराणिकस्तु ब्रह्मेंद्ररु
द्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंदनीय। बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सु
खेन देव इति। इयं च द्वादशी देवप्रबोधिनी धर्मार्थं तु निर्मिता। त्वयैव सर्वलोकानां हितार्थं ८५
त्वं शेषशायिना। उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां जगत्पते। त्वयि सुप्ते जगत्सुप्तं उत्थिते चोत्थितं

जगतु। उत्थाप्यानेन मंत्रेण पुष्पांजलिं दद्यात्। वरणं यांच तत्रेमं मिति वैदिकाः। पौराणिक
स्त्वागतामेघा वियद्देव निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण मम केशवेति स
बुद्धिते ततो विप्रो क्रियाः सर्वाः प्रवर्त्तयितु महादाश्चर्यरवेणात्र त्रामयेकुणवद्वयोः आस्थि
तां दवदचेशं नगरपार्थिवः स्वयं। रात्रौ जागरणं कुर्यात् एकादश्यां सुरालये। प्रभाते वि
मले स्नात्वा वाग्यतोऽथ द्विजोत्तमान्। आचांतस्य मनो दधात्यक्षयं यत्किंचिद्देवहि। वाच
मस्पिपुय तुरेयं नष्टनोत्पादिकं चयतु। चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतं। क
थयित्वा द्विजेभ्यस्तं दद्यात् कन्याशु दक्षिणां। दत्वा विसर्जयेद्विप्रान् ततो खंडी तस्य स्वयं। इ
ति। व्रतसमापने मंत्रश्च सनत्कुमारेणोक्तः। इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो। न्यूनं सं
पूर्णतां यातु त्वत्प्रसादाज्जनार्दनेति। इति बोधन्येकादशी॥ ॥ अथ मार्गशीर्षादिष्वे
कादशीषु वराहपुराणे धरणी व्रतान् कथ्यंते। यथा। दुर्वासास्य तपसं प्रतिप्राप्य य
दा मार्गशिरे मासि दशम्यां प्रयतात्मनः। कृत्वा देवार्चनं प्राग्वत् धीमान् अग्निः कार्यं यथाविधिः॥

शुचिः सुमावासाः प्रसन्नात्मेदं प्रमन्त्वं सुसंस्कृतं। शुक्लापंचपदं गत्वा पुनः शौचं तु पा
दयोः॥ प्रक्षाल्य शुभ्रलमानं चंदीररदं हसमुद्भवां। भक्षयेद्दंतकाष्ठेन ततस्त्वाचम्य यत्न
तः। स्पृष्टानि सर्वाणि खिरंध्रं ध्यायाद्देवं जनार्दनमिति। अर्घ्यं तदा पयेत्तस्य करतोयेन मान
वः। एवमुच्चारयेद्वाचं तस्मिन्काले महामुने। एकादश्यां निराहारः स्थित्वा चैवापरेहनि।
भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत। एवमुक्त्वा ततो रात्रौ देवदेवस्य सन्निधौ। ज
यन्नारायणायेति स्वपेत्तत्र विधानतः। ततः प्रभाते विमले नदीं गत्वा समुद्रगां। इतरं वा
गतं गेहे वा नियतात्मवान्। आनीय मृत्तिकां शुद्धां मंत्रेणानेन मानवः। धारणं पोषणं
त्वत्तो मृत्तिके देवि सर्वदा। तेन सत्येन मे पापं यावन्मोच विष्णुव्रते। ब्रह्मांडोदरतीर्थानि क
रैः स्पृष्टानि देवकैः। तेरिमां मृत्तिकां स्पृष्ट्वा मलनाशि वा ये धिता। त्वयि सर्वे रसा नित्या
स्थिरा वरणा सर्वदा। तेन मां मृत्तिके प्राप्य पूतं कुरु प्रमावितं। मे एवं मृदं तथा तोयं।
प्रसाद्यात्मानमालभेत्। त्रिः प्रक्षाल्य शेषं मृदया कुंडमालिप्य विज्ञोलो ततस्तस्मान्नरः स ८६

म्यक्संस्मरेन्नृहरिं व्ययं। स्नात्वा चावश्यकं कृत्वा आयुनरवगृहं व्रजेत्। तत्राराध्य महायो
गं देवं नारायणं हरिं। केशवायेन नमः पादौ कटिं दामोदराय च। ऊरुयुग्मं नृसिंहाय
उरः श्रीवत्सधारिणे। त्रैलोक्यविजयायेति बाहू सर्वात्मने शिरः। रथांगधारिणे च क्रं शं
करायेति वारिजं। गंभीरायेति च गदां अनंतोऽनंतं शांतिमूर्तये। एवमभ्यर्च्य देवेशं देवं नाराय
णं प्रभुं। पुनस्तु स्थापयेत्ताः कुंभान्नवरक्षापयेद्बुधः। जलपुष्पोद्भवान्नु सपुष्पाद्यसितचं
दनलिप्तान्नूतनपत्रैव संस्थानात्सितवस्त्रावगुंठितान्। स्थगितान्ताम्रपत्रैश्च तिल
पूर्णैः सकांचनैः। चत्वारस्ते समुद्रास्तु कलशाः परिकीर्तिताः। तेषां मध्ये शुभं पीठं स्थाप
येद्वस्त्रवेष्टितं। तस्मिन्सौवर्णरूप्यं वा ताम्रं वा दारुजं तथा। अलाभे सर्वपात्राणां पालाशं
पात्रमिष्यते। तोयपूर्णं ततस्तत्र वा तस्मिन्पात्रे ततो न्यसेत्। सौवर्णमत्स्यरूपेण कृत्वा दे
वं जनार्दनं। वेदान्वदंतं संयुक्तं कृतिस्मृतिविभूषितं। तत्रानेकविधैर्भक्ष्यैः फलैः पुष्पैश्च
शोभितं गंधधूपैश्च दीपैश्च अर्घ्यैर्विवाय यथाविधिः। रसातलगतान्वेद धरित्रीव च यो धृता।

मत्स्यरूपेणतद्धन्मांनवीऽद्धरकेशव॥ एवमुच्चार्यतस्याग्रेजागरंतत्रकारयेत्॥ यथा
संभवस्तारणप्रज्ञातेविमलेतथा॥ चतुर्णांब्राह्मणानांचचतुरादापयेद्घटान्॥ पूर्वंतु
बह्वृचेदद्यात्छंदोगेदक्षिणेतथा॥ यजुःशाखान्वितेदद्यात्पश्चिमंघटमुत्तमं॥ उत्तरं
कामतोदद्यादेषएवविधिःस्मृतः॥ प्री ऋग्वेदःप्रीयतांपूर्वेसामवेदस्तुदक्षिणेयजुर्वेदः
पश्चिमतोअथर्वाचोत्तरेणतु॥ अनेनक्रमयोगेनप्रीयतामितिवाचयेत्॥ मत्स्यरूपंच
सौवर्णंआचार्यायनिवेदयेत्॥ गंधधूपादिवस्त्रैश्चसंपूज्यविधिवत्तु॥ मान्यस्त्विमंस
रहस्यंचमंत्रंचैवोपपादयेत्॥ विधानंतस्यवैदातादद्यात्कोटिगुणोत्तरं॥ प्रतिपद्यगुरुं
यस्तुमोहाद्वैप्रतिपद्यते॥ सजन्मकोटिनरकेपच्यतेपुरुषाधमः॥ विधानस्यप्रदातायो
गुरुरित्युच्यतेबुधैः॥ एवंदत्वाविधानेनद्वादश्यांविसर्जयेत्॥ विप्राणांभोजनंदद्यात्
यथाशक्त्यासदक्षिणां॥ हरिणापरमान्नेनततःपश्चात्स्वयंनरः॥ भुंजीतसहितोविप्रैर्वा
ग्यतःसजितेंद्रियः॥ अनेनविधिनायस्तुधरणीव्रतमुत्तरं॥ तस्यपुण्यफलंवाऽपिश्रृणु ८७

तचवतोवरा॥ यदिवक्त्रसहस्राणांसहस्राणिभवंतिवा॥ आयुश्चब्रह्मणस्तुल्यंनवेद्यदिम
हाव्रतो॥ तदानीमस्यसर्वस्यफलंकथयितुंनवेता॥ यइमांश्रावयेद्भक्त्याद्वादशीफलमुत्तमं॥
श्रृणोतिवासपापेभ्यःसर्वैरिवप्रमुच्यते॥ इतिमत्स्यपुराणेधरणीव्रतेमत्स्यद्वादशी॥ ॥छ॥ अथ
पोषमासएकादश्यांसर्ववन्नियमस्नानादिकंचाकूर्मरूपिणंदेवंसंपूज्यद्वादश्यामाचा
र्यायदद्यात्॥ कलशपात्रादिविधिस्तुमार्गशीर्षएकादश्यामुक्तएवकार्यः॥ तदुक्तंवाराहपुरा
णे॥ तथैवपोषमासेतुअमृतंमथितंसुरैः॥ तत्रकर्मात्मिवद्देवःस्वयमेवजनार्दनः॥ तस्येयंति
थिरुद्दिष्टाइष्टाकूर्मस्वरूपिणः॥ पोषमासस्ययाशुक्लाद्वादशीशुक्लपक्षतः॥ तस्यांप्राक्कृ
तसंकल्पः॥ प्रातःस्नानादिकाःक्रियाः॥ निर्वर्त्याराधयेद्देवंएकादश्यांजनार्दनं॥ उक्तमंत्रे
र्द्दनिअष्टदेवदेवंजनार्दनमिति॥ कूर्मायपादौप्रथमंप्रपूज्यनारायणायेतिद्वारांकटिंचास्ये
कर्षणायेच्छदरंविशोकऊरूभवायेतितथैवकंठं॥ गोसुबाहुवेचेतिभुजौशिरश्चनमोविशालाय
रथांगसारो॥ स्वनाममंत्रेणसुगंधपुष्पैर्नानाविधैर्वाविधैःफलैश्च॥ अभ्यर्च्यदेवंकलशंत

दध्यःसंस्थाप्य माल्यैः शीतकं च दामं। तं रत्नगर्भं सुतारवस्त्रबाह्यशक्तितो हेममयं च देवं। स
मंदरं कूर्मरूपेण न्यवासंस्थाप्य नाम्रव्रत पूर्णपात्रे। पूर्वे घटस्योपरि संनिवेश्य तं ब्राह्मणा
य वै ततश्च दद्यादिति। दानं ब्राह्मणभोजनादि विधिः पूर्वोक्त एव ग्राह्यः॥ इति कूर्मव्रतं॥ ७॥
एवं माघस्य शुक्ले कादश्यां सौवर्णं वाराहरूपिणं देवं सर्वबीजसंपूर्णकलशस्योपरि स्थाप्य
ते। सौवर्णे दिपात्रे स्थापयित्वा संपूज्य द्वादश्यां ब्राह्मणाय दद्यात्। पूजाविधिस्तु मार्गशीर्ष
कादश्यं क्रमेवात्त तदुक्तं वाराहपुराणे॥ एवं माघसितपक्षे द्वादशी धरणी स्मृतः। वाराहस्य
पुष्पाद्यैर्नु नेपरमधार्मिको यः क्रम्य। वाराहायेति पादौ तु माधवायेति वै कटिं। होत्रज्ञा
येति जठरं विश्वरूपस्य च वाहारः। सर्वज्ञायेति वैकंठं प्रज्ञानां पतये शिरः। प्रद्युम्नायेति च भुजौ
दिव्यास्त्रायस्तु दर्शनं। अमृतोद्भवाय शंखं च एवमेवार्चनं विधिरिति। प्रतिमा स्वरूपं च तत्र
ज्ञात्वा तु वाराहं कारयेत् बुधः। दंष्ट्राग्रेणोद्धृतां पृथ्वीं सपर्वतवनद्रुमां। माधवं मधुहंतारं
वाराहं रूपमास्थितं। सर्वबीजभृते पात्रे रत्नगर्भं घटोपरि स्थापयेत्तु परमं देवं ज्ञातरूपमयं ८८

हरिं दानार्चनविधिः पूर्वोक्त एव॥ इति वाराहद्वादशी व्रतं॥ ८॥ अथ फाल्गुनस्य शुक्लेकादश्यां उ
वैर्विधवत्पोष्य नृसिंहं सुवर्णादिपात्रस्थं पूर्णकलशोपरि स्थाप्य पूजयित्वा द्वादश्यां ब्राह्मणाय
निवेदयेत्। अन्यः सर्वोपि विधिः पूर्वोक्त एव। तदुक्तं वाराहपुराणे। तद्वत् फाल्गुनमासस्य शुक्ल
पक्षे च द्वादशी। उपोष्य प्रोक्तविधिना हरिमाराधयेत् सुधीः। श्रीनृसिंहाय पादौ तु गोविंदाय
च ऊरु तथा। कटिं विश्वभुजे पूज्य अनिरुद्धाय च उदरं तथा। श्रीकंठं शितिकंठाय केशवायेति वै शि
रः। असुरध्वंसनायेति चक्रं तोयात्मने तथा। शंखमित्येवं संपूज्य गंधपुष्पफलैस्तथा। इति
श्रीनृसिंहद्वादशी॥ ९॥ इयमेवामर्दकी॥ तत्रामर्दकवृक्षस्थितं विष्णुं संपूज्य प्रदक्षिणं कु
र्यात्। तदुक्तं नविष्णोत्तरे फाल्गुने मासि शुक्लाया मेकादश्यां जनार्दनः। वसत्यामलकी वृ
क्षे लक्ष्म्या सह जगत्पते। तत्र संपूज्य देवेशं शक्त्या कुर्यात् प्रदक्षिणां। उपोष्य विधिवत्कल्पं
विष्णुलोके महीयते इति॥ इत्यामर्दकी॥ १०॥ अथ चैत्रस्य शुक्लेकादश्यां उपोष्य सौवर्णं वामनं सं
पूज्य। छत्रिकादि संयुक्तं द्वादश्यां ब्राह्मणाय दद्यात्। तदुक्तं वाराहपुराणे॥ सौवर्णं वामनं मा

सावित्रे संकल्प्य द्वादश्यां उपोष्य आराधयेत् पश्चात् देवदेवं जनार्दनमिति। वामनायेति पादौ तु वि
ष्णवे कटिमर्चयेत्। वासुदेवेति जठरमुरः संकर्षणाय च। कंठं विश्वभुजे इत्यपि शिरो व्योमरू
पिणे। बाहू विश्वजिते पूज्य स्वनाम्ना शंखचक्रके। प्राग्युक्तपात्रे संस्थाप्य वामनं कांचनं बुधः। यथा
शक्त्यालंकृतं हृष्टं सितयज्ञोपवीतिनं। कुंडिकां स्थाप्य पार्श्वे तु छत्रिकां पादुके तथा। अक्षमालां
च संस्थाप्य कमंडलु विशेषतः। एतेरुपस्करैर्युक्तं प्रख्यातं सुद्विजातये दापयेत् प्रीयतां विष्णु
रूपरूपी च कदीरयेत्। मासनाम्ना तु संयुक्तं प्राग्वन्नाविधिनयकां प्रीयतामिति सर्वत्र वि
धिरेष प्रकीर्तितः इति मत्स्यरूपी केशवः प्रीयतां कूर्मरूपी आदि प्रयोगः सर्वत्र द्रष्टव्यः॥
इति वामनद्वादशी॥ ७॥ अथ वैशाखशुक्लद्वादश्यामुपोष्य सौवर्णं परशुरामं संपू
ज्य द्वादश्यां ब्राह्मणाय दद्यात्। तदुक्तं वाराहपुराणे॥ वैशाखेप्येवमेव तु संकल्प्य वि
धिना नरः। इत्यकपकस्यात् जामदग्न्याय पादौ तु जानुनी परशुधारिणे। मधुसूदनायेति क
टिं उरः श्रीवत्सधारिणे। शिरः सहस्रशीर्षाय शंखचक्रेश्वराय चेति। प्रतिमारूपं जामदग्न्य ८९

तिष्ठ्यातं नाम्ना क्लेशविनाशनं। दक्षिणे परशुं हस्ते तस्य देवस्य कारयेत्। वेणवेन तु पा
त्रेण तस्मिन् संस्थापयेद्धरिं। इति जामदग्न्यद्वादशी॥ ८॥ अथ ज्येष्ठशुक्लैकादश्यां सौवर्णौ
रामलक्ष्मणौ संपूज्य द्वादश्यां ब्राह्मणाय दद्यात्। विधिस्तु प्राग्युक्त एव। मंत्रेषु विशेषः। तदु
क्तं वाराहपुराणे। ज्येष्ठमासेप्येवमेव संकल्प्य विधिना नरः। अर्चयेत् परमं देवं पुष्पैर्नानावि
धैः शुभैः। नमो रामाभिरामाय पादौ पूर्वं समर्चयेत्। त्रिविक्रमायेति कटिं धृतविश्वाय चोदरं।
उरः संवत्सरायेति कंठं संवर्तकाय च। सर्वास्त्रधारिणे बाहू अब्जनाभाय च रथांगकौ। सहस्र
शिरसे न्यच्च शिरस्तस्य महात्मनः। प्राग्वत् तु गलकुंभौ सौवर्णौ रामलक्ष्मणौ। अर्चयित्वा
विधानेन प्रभाते ब्राह्मणाय तौ। दातव्यौ मनसः काममीहता कुरुषेण तु॥ इति रामद्वादशी॥ ९॥
अथ आषाढशुक्लैकादश्यामुपोष्य पूर्वोक्तेन विधिना चतुर्भुजं वासुदेवं संपूज्य द्वादश्यां ब्रा
ह्मणाय दद्यात्। मंत्रेषु विशेषः। तदुक्तं वाराहपुराणे। वासुदेवाय पादौ तु कटिं संकर्षणा
य वा प्रद्युम्नायेति जठरमनिरुद्धाय वा उरः। चक्रपाणयेति तु कंठं च देवपतयेत् तथा। भुना

न्नाशंखचक्रेण पुरुषायेति वै शिरः। कांचनं वासुदेवं च चतुर्व्यूहं सनातनं। तमभ्यर्च्य वि
धानेन गंधपुष्पादिभिः क्रमात्। पश्चात् ब्राह्मणे दद्यात् वेदवादिनि सुव्रते। इति वासुदे
वसंकर्षणप्रद्युम्नानिरुद्धाश्चतुर्व्यूहाः॥ इति वासुदेवद्वादशीव्रतं॥ ७॥ अथ श्रावणशु
क्लैकादश्यां दामोदरनामानं देवमभ्यर्च्य पूर्वोक्तविधिना द्वादश्यां ब्राह्मणाय दद्या
त्। मंत्रेषु विशेषः। नंदकेश्वरपुराणे॥ दामोदराय पादौ तु हृषीकेशाय वै कटिं। स
नातनायेति जठरमुरः श्रीवत्सधारिणे। सुचक्रपाणेति बाहू कंठं च दरयेत्तथा। तुङ्गेश
याय मुखं भद्राये तिललाटकं। स्वनाम्ना शंखचक्रे च पूजयेत् परमेश्वरं। कांचनं देवदेवं
दामोदरं सनातनं। प्रार्च्य तं ब्राह्मणे दद्यात् वेदवेदांगपारगे। इति दामोदरद्वादशीव्रतं॥ ८॥
एवं भाद्रपदे शुक्लैकादश्यां सौवर्णं कल्किरूपिणं देवं पूर्वोक्तविधिना समभ्यर्च्य द्वादश्यां
ब्राह्मणाय दद्यात्। वाराहपुराणे। नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिं। म्लेच्छध्वं
सनायेति जगन्मूर्त्तेति योदरं। शितिकंठाय कंठं च खड्गपाणेति वै भुजौ। चतुर्भुजाय दसौ च ९०

विश्वमूर्त्ते तथा शिरः। एवमभ्यर्च्य मेधावी प्राच्य तत्स्थाय तो घटं। विन्यसेत्कल्किनं देवं
सौवर्णं तत्र कारयेत्। तच्चाप्रतानेविप्राय दद्यादियं शास्त्रविक्रमा॥ इति कल्किद्वादशीव्र
तं॥ ९॥ एवमाश्विनशुक्लैकादश्यां पद्मनाभरूपं देवं संपूज्य द्वादश्यां ब्राह्मणाय दद्या
त्। विधिस्तु पूर्ववदेव। मंत्रेषु विशेषः। यथा वाराहे तद्वदाश्वयुजे मासि द्वादशी शुक्ल
पक्षतः। संकल्प्यामर्चयेद्देवं पद्मनाभं सनातनं। पद्मनाभाय पादौ तु कटिं वै पद्मयोन
ये। उदरं सर्वदेवाय पुष्कराख्याय वै नरः। अव्ययाय तथा पाणिं प्राग्वदस्त्राणि पूजये
त्। पंकजाय शिरः पूज्य गंधपुष्पादिभिः क्रमात्। प्रातस्तं सर्वदेवार्घं ब्राह्मणाय निवेद
येत्॥ इति पद्मनाभद्वादशीव्रतं॥ १०॥ अथ कार्त्तिकशुक्लैकादश्यां सौवर्णं योगीश्वरं स्व
यं। नंदकेश्वरपुराणे॥ शृणु राजन्महाबा
गनिद्रास्थितं पूज्य द्वादश्यां ब्राह्मणाय दद्यात्। नंदकेश्वरात्॥ प्राप्यते फलं। प्राग्विधानेन
द्वा कार्त्तिके मासि द्वादशी। उपोष्य विधिनानेन यज्ञस्याः प्राप्यते फलं। नारायणमकल्मषं। नमः सहस्रशि
संकल्प्य लब्ध्वा स्नानं च कारयेत्। विज्ञातेनार्चयेद्देवं

रसेन्नीरैः संपूज्य येद्धरं तु॥ पुरुषायेति च सुकौ कंतं वे विश्वरूपिणे॥ ज्ञानास्त्रायेति चास्त्रा
णि श्रीवत्साय तथा उरः॥ जराय विश्ववे पूज्यो उदरं दिव्यमूर्त्तये॥ कटिं सहस्रपादाय
पादौ देवस्य पूजयेत्॥ ज्ञात्व लोम्पेन देवेशं पूज्य यित्रा विचक्षणः॥ नमो दामोदरायेति स
र्वांगं पूजयेद्धरः॥ एवं संपूज्य देवेशं तस्याये चतुरो घटान्॥ स्थापयेद्रत्नगर्भांस्तु सितचंदन
चर्चितान्॥ स्रग्दाम बद्धग्रीवान् सितवस्त्रावगुंठितान्॥ स्थगितांस्ताम्रपात्रैस्तु तिलपूर्ण
ैः सकांचनैः॥ चत्वारः सागरास्ते च कल्पितास्तु सत्तमः॥ तन्मध्ये पाद्विधानेनासौ च संस्था
पयेद्धरिं॥ षोडशारं तथा चक्रे तेजो निर्बद्धं निर्दितायोगीश्वरं योगनिद्राशयानं पीतवा
ससं॥ तमप्येवं तु संपूज्य जागरं तत्र कारयेत्॥ कुर्याद्धु वश्च वैयागं यजेद्योगीश्वरो हरिं॥
एवं स्तवाप्रभाते तु ब्राह्मणाय निवेदयेत्॥ इति योगीश्वर एकादशी॥ इति श्रीधरणीव्र
तानि॥ अथ सिद्ध विरुद्धादिकं लिष्यते॥ एकादशी श्रुक्र वारेण सिद्धा शुक्रेण प्रतिप ९१
दीतिसोमवारेण विरुद्धा॥ चंद्रे चित्रो उत्तराषाढा पूर्वाषाढा विशाखिका॥ एकादशी त्र

योदश्यो नष्टयोगाः प्रकीर्तिताः॥ इति एकादश्यां नत्तमास्तिकार्ये॥ नंदासु नत्तनिमिष्क क्रमेवापकाद
श्यां दश्यो नष्ट्याः॥ न खादेत्॥ नथा चाक्रमेव॥ न स्थ चर्म तिलादी॥ निष्पाव शुक्ले कादशी मद्यादि यथा
श्यां तु ध्याणि न खादेत्॥ सवर्त्ति वैकादशी शुतिथिपतिचे ने वशिवः पूज्यः॥ तदुक्तं॥ एकादश्यां
क्रं॥ एकादशी यो घटने॥ सवर्त्ति वैकादशी॥ धनुर्युक्त क्रूरग्रहे एकादश्यां तु नाग्रक्तं चापरतत्र स एवेति॥ एकादश्यां माहेश्वर्यां
शिवस्य वेति॥ धनुरुच्छ क्रूरग्रहे एकादश्यां पञ्चना॥ इति श्रीसूर्यसेनमहदंडविरचिते तिथिनिर्णये॥ मृतएका
शियागिनी सम्बु खायात्रान कर्तव्या॥ इति श्रीसूर्यसेन महदंड विरचिते तिथिनिर्णये॥ मृतएका
दशी निर्णयः॥ क॥ श्रीसूर्यसेन नृपेण०॥ श्रीमत्यं डितसिद्ध०॥ क॥ अथ द्वादशी निर्णयः॥ द्वादशी
निधिरुपवासादिषु एकादशी युतैव ग्राह्या॥ तदुक्तं निगमे॥ रुद्रेण द्वादशी युक्ते तीत्रयोद
शी च विरुद्धा निषिद्धा॥ यथा॥ नागविद्धा तु या षष्ठी शिवविद्धो दिवाकरः॥ कामविद्धा न वर्द्धिष्णुर्न
ग्राह्या उर्तवासराः॥ विष्णुद्वादशी॥ कामस्त्रयोदशी॥ वर्षा द्वादशी॥ तद्यथं धरणी व्रतपाक्लं॥ वि
चोपसंलिष्यते॥ नाद्रपदशुक्ल द्वादशी श्रवणनक्षत्रयुक्ता श्रवणद्वादशी॥ सायथे का
दश्यामेव स्यात्तदा विष्णुशृंखलायोगः स्यात्॥ तत्रैकेनोपवासेनैकादशी व्रतं द्वादशी व्र
यांति थिं समनुप्राप्य यासं पापं निपतिस्नाति थि सकला प्रोक्ताति
मुहूर्त्तापि यान वेत्तु इति स्कांदात्

तन्न तं च न भवति। तदुक्तं मत्स्यपुराणे। द्वादशी श्रवणर्क्षं चेत्स्पृशेदेकादशीं यदि। स ए
व वैष्णवो योगो विष्णुशृंखलसंज्ञकः। तस्मिन्नुपोष्य विधिवन्नरः क्षीणकल्मषः। प्राप्नो
त्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति। यदा द्वादशी श्रवणर्क्षसंयुक्तायामेकादश्या
मुपोषितायां द्वादश्यां श्रवणर्क्षं विवर्द्धते। द्वादशीक्षयस्तु न भवति तदा तिथ्यंतो नापेक्षि
तः। तदुक्तं तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्। तावदेव न भोक्तव्यं यावदेकस्य सं
क्षयः। विशेषेण महीपाल श्रवणं वर्द्धते यदि। तिथिक्षये न भोक्तव्यं द्वादशी नैव लंघयेदि
ति। यदा एकादशी संपूर्णा द्वादशी श्रवणयुक्ता तदैकादश्यामुपोष्य श्रवणद्वादश्यामु
थ्युपवासः कार्यः। न च पारणं चोपवासादिसपरिसमाप्तिः। तदानवत्पूर्वव्रतासमाप्तावुत्र
तारंभं कर्तुमयुक्तं। यथा असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांतरमिति। अतश्च श्रवणद्वादश्यु
पवासः कथं स्यादिति चेत्। सत्यं। उभयोर्व्रतयोरेकदैवतत्वान्न दोषः। तदुक्तं। एकादशीमु
पोष्यैव द्वादशीं समुपोषयेत्। न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिः। इति। यद्युपवा ९२

सद्वयकरणे असमर्थः स्यात्तदा एकादश्यां युक्ता द्वादशीं समुपोषयेत्। तस्याल्पत्वयोगत्वे
न प्राशस्त्याद्वा। एकादश्युपवासफलप्रापकत्वाच्च। तदुक्तं। उपोष्य द्वादशीं पुण्यां विष्णुऋक्षे
णसंयुतां। एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयमिति। यथा। एवमेकादशीयुक्ता द्वादशी
समुपोषयेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति। यदा तु द्वितीयदिने श्रवणे वर्द्धते
तदा ऋक्षांतो नापेक्षणीयः। ऋक्षांते पारणं कुर्यात्तु विना श्रवणरोहिणीमिति वचनात्। यदि
तु एकादश्यामेव श्रवणर्क्षं स्यात्। न द्वादश्यां। तदा एकादश्यामेव श्रवणद्वादशीव्रतं कार्यं। त
दुक्तं। याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना।
इति भविष्योत्तरेऽपि। एकादशी यदा तु स्याच्छ्रवणेन समन्विता। विजया नाम सा प्रोक्ता भक्ता
नां विजयप्रदेति। एतावांस्तु विशेषः। श्रवणैकादश्यां वामनावतारस्य पूजा। श्रवणद्वाद
श्यां जनार्दनपूजा। अथ तीर्थस्नानादिकमनंतफलं भवति। तदुक्तं विष्णुधर्मोत्तरे। नभस्यशु
क्ले द्वादश्यां नक्षत्रं श्रवणं यदि। तस्यां तीर्थेषु यत्स्नानं तदनंतफलं लभेत्। तादेवताइडजन

विप्रतोऽन्नं श्राद्धमेव च। एकजन्मन्यासं दत्त्वा स्वल्पस्य फलमक्षतो दानं च महद् द्रव्यं वा सद
स्रगुणितं भवेत्॥ तथा च स विष्णोर्नरविशेषो दशितिः। बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भ
वेत्। अतीव महती तस्यां सर्वं दत्तमथाक्षयं। बुधश्रवणसंयुक्ता द्वादशी संगतोदकोदानं द
ध्योदनं शाकं उपवासपरो विधिरिति। तथा। द्वादशी श्रवणोपेता यदा न वर्तते तदा संग
मे सरितां स्नात्वा गंगास्नानजं फलं सोपवासः समाप्नोति नात्र कार्या विचारणा॥
इति श्रवणद्वादशीव्रतं॥ ॥ भाद्रपदशुक्लद्वादश्यां इन्द्रध्वजोच्छापनं कार्यं। तदुक्तं मत्स्य
पुराणे। द्वादश्यां तु सिते पक्षे मासि भाद्रपदे तथा। शक्रकेतुं उच्छापयेद्राजा विश्वादिद्विप
तथा। लिंगपुराणेऽपि। कन्यार्कस्य शुक्लद्वादश्यां विश्वादिश्रवणसंयुते। शक्रकेतुं उच्छापयेद्देवतद्ध्व
जं च महीपतिरिति॥ इति भाद्रपदद्वादशीव्रतं॥ ॥ कार्तिकशुक्लद्वादश्यां गोधूलिकाका
लव्यापिन्यां गोवत्सपूजा कार्या। तस्याः सकल एव विधानात्। दिनद्वयेऽपि तत्कालव्याप्ति
वे पूर्वैव कार्या। तदुक्तं। वत्सपूजा वटश्चैव कर्तव्यो प्रथमेऽहनि। इति वत्सद्वादशी॥ ॥ ८३

माघमासे द्वादश्यां तिलद्वादशी। तस्यां तिलैः स्नानं तिलैर्विष्णुमर्चयेत् तिलतैलेन दीपं च द
तिलनैवेद्यं तिलहोमं तिलदानं च तथा तिलान् भक्षयेत्। तदुक्तं ब्रह्मपुराणे। माघे शुक्लद्वाद
श्यां तु माघि भगवान् पुरा। तिलानुत्पादयामास तपः कृत्वा सुदारुणं। राजा दशरथो भूमौ तस्या
मवतारयत्। तिलानां माधिपत्ये च विष्णुः प्रतिष्ठितः। तस्मात्तु पोषितः स्नानं तिलैः कुर्याद्यत्नो
हरिं तिलतैलेन दीपांश्च दद्याद्देवस्य देवस्य नैवेद्यं तिलान् घाहां तथा तथा तिलाः। तिला
न् दद्याच्च विप्रेभ्यो भक्षयेच्च तथा तिलान्। इति॥ अथ सिद्धविरुद्धादिकं लिख्यते। द्वादशी बुधवारे
ण सिद्धा न भवति। तदुक्तं। बुधवारे द्वितीया द्वादशी चेयं तिथिः। द्वादशी बुधवारेण तत्काले खल्वा योगो
न भवति। सा मृत्युदा। तदुक्तं। सूर्ये विशाखा भरणी द्वादशी च चतुर्दशी। मघानुराधा ज्येष्ठा च वर्जनी
याश्रयन्ते न हति। द्वादश्यां व्रतापोष्टिकादिकं कर्म कार्यं। तथा क्रमे वा व्रतपोष्टिके द्वितीया द्वाद
श्यपरि तिान चा बिल्वफलं न भक्षयेत् न खं खचमी तिलानि चैव क्रमेवा दंतकाष्ठं च वर्जयेत्। द्वा
दश्यां तु लाभकरस्य द्वादशी दद्यान्नवतीति। तदुक्तं। तुलामकरयोश्च द्वादशी दद्यादिति। द्वादश्यां या

गिनी सन्मुखा निर्ऋते यात्रा न कार्या। सर्वदा द्वादशी तिथिषु विष्णुः पूज्यः॥ इति श्रीनिर्णया
मृते द्वादशीनिर्णयः॥ श्रीसूर्यासनतद्दिति॥ श्रीमत्पंडितसिद्धलक्ष्मणसुतशर्ता॥छ॥ अ
थ त्रयोदशी निर्णीयते। तत्र शुक्लत्रयोदशी पूर्वविद्धैव पोष्या। तदुक्तं ब्रह्मवैवर्ते। त्रयोद
शी प्रकर्त्तव्या द्वादशीसहिता मुने। व्रतविधानकर्त्तव्या दशा पूर्णा किंदाचन। इति पैठीनसि
रः। द्वितीया पंचमी सप्तमी चैव दशमी च त्रयोदशी। प्रतिपन्नवमी चैव कर्त्तव्या सन्मुखी तिथिरिति।
अनयोर्वाक्ययोः शुक्लपक्षाभावेपि कृष्णपक्षत्रयोदश्याः परविद्धायाः एवं विधानात्
पूर्वविद्धाविधानं शुक्लत्रयोदशीविषयमिति पाराशरायेण प्रमाणेन गम्यते। यथाष्ट
म्याष्टमी अमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वेण संयुता इ
ति। तथा चोक्तं एकादशाष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी अमावास्या उपोष्याः
स्युः परान्विता इति। अत्राप्यमावास्यासाहचर्यात्सिध्यति त्रयोदशी कृष्णैव ग्राह्या॥ इ
ति पात्रत्रयोदशीनिर्णयः॥छ॥ अथ चैत्रशुक्लत्रयोदशी अनंगत्रयोदशी। सा च पूर्व ९४

वैं पोष्या। तदुक्तं संवर्त्तेन। ब्राह्मोऽष्टमी स्कंदषष्ठी सावित्री वटपैत्रिकी। अनंगत्रयोदशी रंभा
उपोष्याः पूर्वसंयुता इति। अनंगत्रयोदश्यां कामदेवपूजोक्ता भविष्योत्तरे। चैत्रमासि
तिथिं प्रक्रम्य वाक्यं। अस्यां स्नात्वा त्रयोदश्यां अशोकाख्यं नगं लिखेत्। सिंदूररंजनै
रंगैः अतिप्रीतिसमन्वितः। कामदेवं [illegible]संनिं च वाजिवक्त्रस्थ धनुर्धरं। मध्यमं कर्पूरमयं कन्या
श्रद्धावानर्चीत मत्सरः। मंत्रेणानेन कौंतेय नवनार्याः समन्विताः। मंत्रश्च। नमो रामाय का
माय देवदेवस्य मूर्त्तये। ब्रह्मविष्णुशिवेंद्राणां नमः क्षेमकराय वै। तत्स्याय तोद्यामा
दकाघृतपाचिताः। नानाप्रकारनैवेद्याश्च कामो मे प्रीयतामिति। दीपतिं पूजयेन्नारी वस्त्र
माल्यविभूषणैः। कामोऽयमिति संचिंत्य दृष्टमां रमात्मनाः रात्रौ जागरणं कुर्यात् सु
खरात्रिं यथा भवेत्। पूजयेद्विप्रदैवज्ञं वस्त्रालंकारवंदानैः। एवं या कुरुते पार्थ वर्षे व
र्षे मदोत्सवं। वसंतसमये प्राप्ते हृष्टा पुष्टा सदा भवेत्। कूर्मपुराणे तु विशेष उक्तः। मा
घशुक्लत्रयोदश्यां मदनं चंदनात्मकं। कृत्वा संपूजयेद्धांधवीजयेच्छ्रनेन चोनतः सं

तोषितो कामः पुत्रपौत्रसमृद्धिदः इति॥ इत्यनंगत्रयोदशी॥ ॥ त्रयोदशीषु सर्वासु कामः पूज्यो
थवाऽङ्गनः। यात्रोत्सवश्च विधिवत्कर्तव्यश्चाथ विल्व इति। भाद्रपदकृष्णत्रयोदशी युगा
दि। तदुक्तं नन्दपुत्रत्रयोदशीचेति। सिंहस्थे सूर्ये हस्तनक्षत्रस्थिते चंद्रे मघास्थे गजच्छायाप्रो
च्यते। तदुक्तं। यदेंदुः पितृदैवत्ये हंसश्चैव करस्थितः। त्रयोदशी गजच्छाया श्राद्धे पुण्यैर
वाप्यते। इत्यत्र मधुघृतसंयुक्तेन पायसेन श्राद्धं कुर्यात्। तथा पितृगाथा। अपि नः
स कुले जायेतायो ना दद्यात्त्रयोदशीं। पायसं मधुसर्पिर्भ्यां वर्षासु च मघासु च इति।
कार्तिककृष्णत्रयोदश्यां यमाय रात्रौ दीपं बहिर्दद्यात्। तदुक्तं स्कंदपुराणे। कार्ति
कस्यासिते पक्षे त्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥ इ
ति। दीपमंत्रः। मृत्युना पाशदंडाभ्यां कालेन यमया सह। त्रयोदश्यां दीपदानात्सूर्य
जः प्रीयतामिति। याः काश्चित्त्रयोदशी प्रदोषव्यापिनी शनिवारयुक्ता भवति। तत्र प्र
दोषे शिवं संपूज्य नक्तव्रतं कुर्यात्। तथा च स्कंदपुराणे। देवकदाचा देवकेन विधाने ७५

न प्रदोषव्रतमुत्तमम्। विधातव्यं नरैः स्त्रीभिः संतानफलदेच्छयोः। ईश्वर उवाच। यदा त्रयो
दशी शुक्ला मंदवारेण संयुता। आरब्धव्यं व्रतं चैव फलं संतानसिद्धये। ऋणनिर्मोचनार्था
य भौमवारेण संयुता। सौभाग्यस्त्रीसमृद्ध्यर्थं शुक्रवारेण संयुता। आयुरारोग्यसिद्ध्य
र्थं रविवारेण संयुतेति। अथ कालज्ञानं स्नात्वा पुत्रादिकाम इदं व्रतं करिष्ये इति संक
ल्प्य मंत्रमुदीरयेत्। एकवत्सरपर्यंतं प्रतिपक्षत्रयोदशी। प्रदोषे शिवमभ्यर्च्यैनक्तं दा
ष्ठा मिश्रा कृत्वा। ततस्तु लोहितेनाथ स्नात्वा वा सुनियतो व्रती। पूजास्थानं नत्वा चाप्रदो
ष शिवमर्चयेत्। इष्टं गुरूपदिष्टविधिना आगममंत्रैर्वा पंचामृतस्नपनादि षोडशो
पचारैर्यथाविभवं कुर्यात्। ततश्च भवादिनामभिः। ॐ भवाय नमः। इत्यादिप्रयोग
क्रमेण प्रतिनाम्ना शिवाय पुष्पाणि समर्चयेत्। नामानि शर्वाय भवनाथाय महा
देवाय धीमते नीलाय नीलकंठाय शर्वाय शिवाय शशिमौलिने उग्राय उग्राय नाशाय नी
माय भवहारिणे। ईशानाय नमस्तुभ्यं पशूनां पतये नमः। इति शिवपूजायां वात्र

पशुनां
नेन प्रार्थयेत्तु। यथा त्वं वा नु समस्तानां प्राशमोचकः। तथा व्रतेन संतुष्टः पुत्रं देहि
सुलक्षणमिति। संयावं चैव नैवेद्यं सार्द्धं सफलशर्करोदकाद्यं मुखवासं चतां
बूलं कर्पूरादिकं। समर्थाः ष्टसु दिक्षु ष्टदीपानाज्यपरिप्लुतान्। नवाद्येनमि
र्दद्यात्ततः खाष्टप्रदक्षिणाः। नमस्काराष्टकं स्वाज्ञाप्य स्कन्दं समर्प्य च। वृषराजं
समभ्यर्च्य वृषमंत्रेण मंत्रेण मंत्र विनूः मंत्रस्याभिमर्श्वं वृषरूपेण अंगदानं दकारक।
अष्टमूर्तेरधिष्ठानमतः पाहि सनातनः इति। वृषाय दूर्वाचिरणपानीयं च निवेद्य च।
स्पृष्ट्वा वृषस्य वृषणं स्थित्वा शृंगयोर्मध्यतः शिवं। विलोक्य सं दितं दत्त्वा पूजितं प्रार्थयेच्छि
वं। प्रार्थनामंत्रश्चा। ऋणरोगादिदारिद्र्य। खड्गदपमृत्यवः। भयशोकमनस्तापा
नश्यंतु मम सर्वदा इति। पृथिव्यां यानि तीर्थानि सागरांतानि यानि च। अंडमाश्रियन्ति
ष्टंति प्रदोषागो वृषस्यतां। स्पृष्ट्वा च वृषणौ तस्य शृंगमध्यं विलोक्य च। पुच्छं चं कुकु
दं चैव सर्वपापैः प्रमुच्यते। निवेद्य कर्मज्ञानंतं दद्यात् द्विजाय सारतः। दक्षिणां चा ९६

ह्लणेभ्यश्रातवो मोनं विसर्जयेत्। एवं संवत्सरं कुर्यात् त्रयोदश्यामिदं व्रतं। अथवामं
दवारेण शुक्रामेव त्रयोदशी। चतुर्विंशतिकं वीतातनेष्टफलमाप्नुयात्। इति शनि
त्रयोदशीव्रतं।।छ।। अथ सिद्धविरुद्धादिकं लिख्यते। त्रयोदशी सोमवारेण सिद्धा उ
क्ता। जो मेष षष्ठी द्वती। या स्यादष्टमी च त्रयोदशी। सोमवारेण विरुद्धा। यथा। चंद्रचित्रो
त्तराषाढाविशाखा। एकादशी त्रयोदश्यौ नष्टयोगाः प्रकीर्तिता इति। त्रयोदश्यां हस्ती
यायां च संध्यामोपयोगीनि कर्माणि कुर्यात्। न तु क्रोडयासु विदधीत बलकार्याणि नि
हन्त इति। त्रयोदश्यां हस्त्रियादिस्त्रीस्पर्शतैलाभ्यंगस्नानं न कुर्यात्। तद्भुक्त्वा उर्ज्जनस्य
दशमी तत्र त्रयोदशी। याम्यिलापहस्नाननिषेधवाक इत्यादिमेवा। त्रयोदश्यां दक्षि
ण दिशि योगिनी सन्मुखा यात्रा न कार्या। क्रूरग्रहे कं न स्थिते त्रयोदशी पुनः कार्येषु
वर्ज्जनीया। त्रयोदश्यां त्वाशौचानि न लंघयेत्। इति श्रीनिर्णयामृते त्रयोदशीनि
ष्यि:।।छ।। अथ चतुर्दशी निर्णीयते। तत्र शुक्लचतुर्दश्युपवासादिषु इसिमाया

स्यात्। तदुक्तं युग्मवाक्ये चतुर्दशी पूर्णिमेति बृहस्पतिना प्रोक्तं। एकादश्यष्टमी षष्ठी
पूर्णिमा सा चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विता इति। तथा शुक्ल
पक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता इति।
कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे त्रयोदशी। पूर्वविद्धा तु कर्तव्या परविद्धा न कुत्र चित् पू
र्ति। चैत्रशुक्लचतुर्दश्यां यस्यां याति च संनिधौ। गंगायां च विशेषेण सन्नतो। ऽक्किजाय
तोऽन्वित्र चतुर्दश्यां कर्पूरकुंकुमागुरुचंदनादिभिर्दमनकेन च शिवपूजा कार्या। इ
त्युक्तं देवीपुराणे। चतुर्दश्यां तु कर्पूरकुंकुमागुरुचंदनैः। वस्त्रादिमणिपूजा च क
र्तव्या विधिना शिवा। वितानध्वजछत्रं च दद्यां पूज्याः सुमातरः। महत्पुण्यमवाप्नोति
अश्वमेधाधिकं फलमिति। तथा। मधुमासे तु संप्राप्ते शुक्लपक्षे चतुर्दशी। प्रोक्ता दम
नकपूजा सिद्धिदा उमहोत्सव इति। अत्रैव लिंगपुराणे विशेष उक्तः। दमनत्रयोद
श्यां तालवृंतानिलेन तु हंसयानसमारूढ कामं मंत्र प्रवर्षितः। नारी निवीजितश्चै ९७

वात्रैलोक्योन्मादनचावार्त्ता। तन्निर्धापनकामेन चतुर्दश्यां महामुने। ततोऽयमर्थं मया प्रोक्ता
नार्यश्चाऽथ नरास्तथा। कुर्वंति कर्दमेनैव आत्मनस्त्वनुलेपनं। निर्वापिता नंगपीडा नवश्च
वमम आज्ञया। एतदर्थं सदा कार्यं कर्दमेन च क्रीडनं। प्रातः प्रहरमात्रं तु कर्तव्यं क्रीडनं नरैः।
प्रहराल्पा गंततः स्नात्वा कुर्यान्नित्यं शिवाग्रतः। सर्वकामसमृद्धस्तु वसेच्छिवपुरे नरः। द्व
यं तु लिंगमेकं तु दृष्ट्वा तस्मिन् दिने नरः। ज्ञानं लब्ध्वा शिवं सम्पर्कं देवदेवान संशय इति।
इति चैत्रचतुर्दशी॥ ॥ ज्येष्ठशुक्लचतुर्दश्यां सर्वस्मिन् दिने सायं शिवप्रीतये दमधेनुं दद्या
त्। तदुक्तं मत्स्यपुराणे॥ ज्येष्ठे पंचतपाः सायं हेमधेनुप्रदो दिवीयाद्यष्टमीचतुर्दश्योरुप
लोके वसेच्चिरं॥ भाद्रपदचतुर्दश्यां अनंतव्रतं कुर्यात्। सा च उदयव्यापिनी ग्राह्या। यथो
क्तं चतुर्दश्यां पूर्णिमेति। अथ कश्चिदाह॥ मध्याह्नके तोयवेलायां समुत्तीर्य सरित्तटे।
ददर्श लीलां स च सा स्त्रीणां समूहं रक्तवाससां। चतुर्दश्यामर्चयंतं भक्त्या देवं पृथक् पृथ
इति क्। व्रतकल्पे मध्याह्ने पूजा निहिता। अतो मध्याह्नव्यापिन्यामनंतव्रतं कुर्यात्। इति।

नतच्छुक्तिसंदेहयत्। इदमितिंदासमात्रेन विधिः। विधिवाचकानां व्रतं कुर्यात् इत्येवमुक्त
र्तव्यमित्यादिलिङ्लोट्तव्यप्रत्ययानामभावात्। अन्यथा सा विशीला व्रतं चक्रे कारव
धन्त्वदारकं पाप्यपसिस्वं विप्राय दद्यात् कुन्तानाथे वदेत्। तत्रैवोक्तं चातुर्दशी लयामध्यं
के प्रारंभमितिव्रतारंभो ऽपि मध्याह्ने प्रसज्येत। सच निषिद्धः। व्रतस्य प्रातरेवारंभका
र्यत्वात्। तदुक्तं। प्रातरारभ्यमतिमानू कुर्यान्निक्तव्रतादिकं। नापराह्णे न मध्याह्ने पित्र्य
कालो हि तौ स्मृताविति। अन्ये त्वाहुः। अनंतव्रतस्यैकभक्तरूपत्वात् मध्याह्नव्यापि
न्यामेव कार्यमिति। तदपि तुच्छमिव प्रतिभाति। अत्रैकभक्तं कुर्यादित्येकभक्तस्य वि
धानात्। किं चापरा प्रस्थं घृतनैवेद्यप्रमाणानां प्रयत्नतः। अर्द्धं विप्राय दातव्यमर्द्धमात्म
नि भोजनमिति। अनंतपूजांगत्वेनान्नमात्रं विहितं। अतश्चानंतपूजनस्यैव प्राधान्यात्
तस्य पूर्वाह्णो वै देवानामिति दैविकत्वात् पूर्वाह्णे एवं विधमनंतं सिद्धं। अतः घ्नत्यायामपि
उदयकालव्यापिन्यां चतुर्दश्यां पाशुपतक्रमपूर्णिमानागे पि पूजादिकं कार्यं उदयव्या ९८

पि॰ अ॰ दिते २४

पिन्यास्तिथ्यार्द्वं वस्तत्र्यसंपूर्णतावधानात्। तदुक्तं। उपवासव्रतादीनां घटिकैकापि
या भवेत्। उदये सा तिथिर्ज्ञेया विपरीता तु पैतृके। आदिशब्दादेकभक्तनक्ताय
चितानुपसंग्रहः। तथा च। उदयन्नेव सविता यां तिथिं प्रतिपद्यते सा तिथिः सकला
ज्ञेया दानाध्ययनकर्मसु इति। सुमंतुर[illegible]व्रतनानोपित्र्यं चापरगतेरवौ। द्वि
त्रिमुहूर्तं भिन्नायां सा तिथिर्दैवकर्मणः। अस्यार्थः। यां तिथिं निवृत्तिं नाप्रति द्विमुहूर्तं
त्रिमुहूर्तं व्यापिन्यां दैविकं कार्यं मि
व्याप्नोति तस्यां दैविकं कार्यं। उदयादनंतरं द्विमुहूर्तं व्यापिन्यां दैविकं कार्यमि
त्यर्थः। यां तिथिमनावस्तंगते त्रिमुहूर्तं व्याप्नोति तस्यां पित्र्यं कार्यं। अतो ऽस्तमय
सान्निहितत्रिमुहूर्तं व्यापिन्यां पित्र्यं कार्यमित्यर्थः। अतश्च पूर्णिमायुक्तायामुदय
कालव्यापिन्यां चतुर्दश्यामनंतव्रतं कार्यमिति सिद्धं। इत्यनंतचतुर्दशी। ॥ ७ ॥ कार्ति
केशुक्लचतुर्दशी प्रेतचतुर्दशी। तत्रोपाध्यायन्यंगं स्नानं यमतर्पणादिकं माघएवं
भोजनं चोवतपाधनपूजनं दीपदानादिकं कार्यं। तदुक्तं भविष्योत्तरे। चतुर्दश्यां दिनो

दयेऽवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः। तथा। पूर्वविद्धचतुर्दश्यां कार्त्तिकस्य सि
तेतरे पक्षे प्रत्यूषसमये स्नानं कुर्यान्नियमतो नरः इति। ब्रह्मपुराणेऽपि। तैले लक्ष्मी
र्जले गंगा दीपावल्याश्चतुर्दशीं। प्रातः स्नानं तु यः कुर्याद्यमलोकं न पश्यति॥ इति॥ अ
पामार्गमथो तुंबीं प्रपुन्नाटमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वा
इति। अपामार्गस्य पत्र वा न भ्रामयेच्छिरसोपरि। ततश्च तर्पणं कार्यं धर्मराजस्य
नामभिः। अपामार्गभ्रामणमंत्रस्तु। सीतालोष्टसमायुक्त सकंटकदलान्वित।
हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति। यमनामानि। यमायेति० चित्रगुप्ताय
वै नमः। यमतर्पणं॥ तच्च सव्येनापसव्येन कार्यं। यतः। तस्य देवत्वं पितृदेवत्वं चोत
उक्तं स्कंदपुराणे। दक्षिणाभिमुखो भूत्वा सव्यं संतत्र समाहितः। देवतीर्थेन देवत्वा
त्तिलैः प्रेताधिपाय तु इति। तथा वा यज्ञोपवीतिना कार्यं प्राचीनावीतिना अथवा देवत्वं
च पितृत्वं च यमस्याभिविद्रूपत्वात्। ततः प्रदोषसमये दीपान्दद्यान्मनोरमान् ब्र ९९

ह्मविष्णुशिवादीनां च वा न चत्वरेषु च। प्राकारोद्यानवापीषु प्रतोलीनिःकुटेषु च। मंदुरा
सु विविक्तासु हस्तिशालासु चैव हि। लिंगपुराणेऽपि। ततः प्रेतचतुर्दश्यां नोऽपि चातपोध
नान्। शिवविप्राश्च यथा पराह्ने शिवलोके महीयते। दानं दद्याच्च तत्प्रथ यमलोकं न गच्छ
ति। तथा वा लुचा नरकव्रतिनः कालप्रेतचतुर्दशी। सर्वपापैः प्रमुच्यते। तथा नक्तं प्रेतच
तुर्दश्यां यः कुर्याच्छिवतुष्टये। न तत्क्रतुशतेनापि प्राप्यते पुण्यमीदृशं। कुमारी बडका
नू वै पूज्य तथा शैवांस्तपोधनान्। राजसूयफलं तेन प्राप्यते नात्र संशय इति। इयं सो
मवारयुता चित्राख्या। तदुक्तं पुष्करपुराणे। कार्तिके सोमवारेण चित्राढ्या च चतुर्द
शी। तस्यां तु लिंगमभ्यर्च्य गच्छेच्छिवपुरं नर इति। कार्तिकशुक्लचतुर्दशी पाषाणच
तुर्दशी। तदुक्तं देवीपुराणे। कार्तिके शुक्लपक्षे च या पाषाणचतुर्दशी। तस्यामाराध
यज्ञोशीं नक्तं पाषाणभक्षका। ऐश्वर्यं सुखसौभाग्यं रूपाणि प्राप्नुयान्नर इति। इति
कार्तिकचतुर्दशी॥ अथ माघचतुर्दशी आरटंत्याख्या। तत्रारुणोदये स्नानं यमसं सं प्र

उपतास्मे स प्रतिनामभिः स प्रतिलोदकांजलीन् दद्यात् तिलहोमादिकं दद्याच्चापि षट्त्रयाः
लशरा भोजनं दद्याद्यय मपि ष्टशरां भुक्त्वा सर्वपापैः प्रमुच्यते तदुक्तं ब्रह्मपुरा-
णे। माघस्य कृष्णचतुर्दश्यां विलोमादे हान्मरीचयः। निश्चरुष्टिलकाराः शतशोथ सद कार
स्त्रशः। अनर्काच्छदितकाले स्युतारास्य कथपि राजा च तत्र संप्रज्योयमप्रालयत्रा
छत्रः। सर्वागसंधिवृतानां घोराविलोक्यतत्रावा अरुणोदयवेलायां अरटंच्योथ नियमः।
निर्मुक्ता विमुनासवः कस्यपापं पुनामदा। निमित्तं पंचतारान्ति तत्र प्रोक्तं यतोस्तु वीन दा
अपि निशा द्वैधा तारा रात्रिषु दारुणा। तत्रोपाप्य त्रयोदश्यां संप्राप्ते तु निशाद्वयोस्ना
त्वा पुण्ये गंगा ग्रहदिशि युज्याश्च तारकाः। यामोन यष्टवी धानि दवताः पितरस्तथा। तत्र
चि विधाकारः कुर्यात् रणात् स्तूपिणा। वर्हिश्चयच नमः वा ग्रहतान्के क्षितिलतंदुलैः। नमः अरुणे
मर वसंयुक्तान् तिलाश्च जलांजलीन्। यमाय सप्तवित्र रतुधर्मराजाय सप्तवा अथवे सप्तवि
रत्नथास प्तांतकाय च। विवस्वतायस् द्राथ सप्तकालाय चे वह्निस प्तादेयाश्च विधिवत्तुस 100

र्वाणादरायसर्वो तत्रावाशणं भोजनीयाश्च ब्राह्मणाश्च दनंतरं। श्राद्धं दद्यात् पितृभ्यश्च विमुक्तैः
सर्वपातकैः। ततो द्विजत्वबंधुभ्यः तद्वारं तद्दायेस्वयमपि। इत्याहरंती व नदशी। ॥अथ
शिवरात्रिनिर्णीयते। शिवरात्रिश्चतुर्दशी प्रदोषव्यापिन्येव प्रायेण पोष्या। तदुक्तं। प्रदो
षव्यापिनी ग्राह्या शिवरात्रिः शिवप्रियैः। रात्रौ जागरणं यस्मात् तस्मात्तां समुपोषण
मिति। अत्र प्रदोषश्चास्तादनं द्विघटात्मक एव व्याख्यः। सा च द्विविधा शुद्धा विद्धा च। शुद्धा चैक
ये = ४५ विहेनादूर्योदयमारभ्य पुनः सूर्योदयपर्यंतं व्यापिचातोविद्धा तु षड्विधा। या पूर्वदिन एव
प्रदोषव्यापिनी न द्वितीयदिने सा प्रथमा। या द्वितीयदिन एव प्रदोषव्यापिनी। न प्रथमदि
ने द्वितीया। या प्रथमदिने प्रथम दोषमधिकं व्याप्नोति। द्वितीयदिने प्रदोषं स्वल्पं स्पृशा
उनर ति। सा तृतीया। यत्र संपूर्णं प्रदोषं व्याप्नोति सा पंचमी। या नो न यत्र प्रदोषं व्याप्नोति सा
षष्ठी। द्वितीयदिने प्रदोषमधिकं प्राप्नोति पूर्वदिने स्वल्पं स्पृशति सा चतुर्थी सप्तमी। एवं सप्तवि
धा। तत्र शुद्धायाम विवादं विद्धादिने देपुतु पूर्वदिने एव प्रदोषव्यापिनी प्रथमा। द्वितीय

दिने एव प्रदोषव्यापिनी द्वितीयां चो प्रदोषव्यापिन्येवोपोष्या। तदुक्तं शिवपुराणे। प्रदो
षव्यापिनी ग्राह्या शिवरात्रिः शिवप्रिये। रात्रौ जागरणं यस्मात्तस्मात्तस्यामुपोषणमिति।
पूर्वदिने अधिकप्रदोषव्यापिनी तृतीया सा च पूर्वैवोपोष्या। अधिकप्रदोषव्यापित्वात् त
दुक्तं। माघफाल्गुनयोर्मध्ये यस्यां शिवचतुर्दशी। अनंगेन समायुक्ता कर्तव्या सा सदा ति
थिरिति। त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेदिति।
नैस तिलवेत्तत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतं कुर्यात् रात्रौ जागरणं त
थेत्यादि वचनविरोधः स्यादिति। नमस्तु निशावेधोपि ग्राह्यः। किमुत चतुर्दशीवेधस्त्वेवंप
रत्वादिस्या दिवाक्यानां। तथा च। श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या। पूर्वविद्धा प्रक
र्तव्या शिवरात्रिर्बलेर्दिनमिति। न चस्यां चतुर्दश्यामुपोषितायां परदिने चतुर्दश्याः किं
चित्प्रदोषस्पर्शेश्चिद्रात्रौ तिथ्यंतेन वति। अतो रात्रौ तिथ्यंते पारणं प्रसज्येत न तन्निषि
द्धं तदुक्तं कालादर्शे। सर्वेष्वेवोपवासेषु दिवापारणमिष्यते। अन्यथा पुण्यहानिः स्या १५१

द्दते धारणपारणमिति। तथा च। अन्यतिथ्यागमे रात्रौ तामसस्त्रैजसो दिवा। तामसे पारणं
कुर्वंस्तामसीं गतिमाप्नुयादिति। अमावास्यायां च रात्रौ भोजनं च निषिद्धं। भूताष्टम्योर्दिवा
भुक्त्वा रात्रौ भुक्त्वा च पर्वणि। एकादश्यां दिवारात्रौ भुंक्त्वा चांद्रायणं चरेदिति। अत्र तु परदि
ने दर्शतिथ्यंताभावेन पारणासंभवे कथं पूर्वत्रोपवास इति चेत्। सत्यं। अत्र तिथ्यंताभावेपि दि
वैव पारणं कुर्यात्। तदुक्तं। सा चास्तमयपर्यंतव्यापिनी चेदपरेह्नि दिवैव पारणं कुर्या
त्पारणे नैव दोषभागिति। न चैवमप्यत्र दिवापारणं न संभवति। चतुर्दश्या अस्तमयाद्
ऊर्ध्वमपि प्रदोषस्य विद्यमानत्वादस्तमयपर्यंतव्यापित्वाभावादिति चेत्। सत्यं। अत्र सा चास्तमयपर्य
तिवचनं दिवातिथ्यंताभावप्रतिपादनपरो न चास्तमयाद् ऊर्ध्वं तिथिसद्भावनिषेधपरो एक
वचनस्यार्थद्वया निधाना नैवोपपद्येत रिच्य लमतिप्रसंगेनो यामत्रयोर्ध्वगामिन्यां प्राप्त
रवदि पारणमित्यादि वाक्यान्यप्यस्मिन्नेव विषये नियोज्यानि। द्वितीयदिने घटिका प्रदो
ष व्यापिनी। अधिकप्रदोषव्यापिनी च चतुर्दशी अपरैवोपोष्या। तदुक्तं स्मृतिसंग्रहे। शिव

= अत्रापि ... पर दिने ... प्रदोषव्यापि चेन्नोपवासविधानात्

परयोनिष्पत्तिर्नामावाप्तिं तु ज्ञेयमिति। तथा शिवरात्रिव्रते भूतां कामविद्धां विवर्जयेदिति।
ननु पूर्वदिने चतुर्दश्याः सकलरात्रिव्याप्तिस्तत्रैव कृतो नोपवासः कृत इति चेन्न। सत्यं पू
र्वदिने व्याप्तावपि परदिने दिवा तिथ्यंतानावपारणासंभवात्। नान्यत्र प्रदोषव्यापिनी।
= दीप षष्ठ्यौ तु पूर्वैव ग्राह्या। तदुक्तं ब्रह्मवैवर्ते। सूर्यास्तेनवनाडीभूर्ते विद्धा त्रयोदशी॥ शिवरा
त्रिव्रतं तत्र कुर्याज्जागरणं तथेति। तथा च त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः॥ जाग
रा शिवरात्रिः स्यात् निशि पूर्णा चतुर्दशी॥ अस्यार्थः। अस्यां त्रयोदश्यां तु पोषितायां द्वितीय
दिने दिवा पारणपर्याप्ततिथ्यंतो ल... पोष्येति। तथा च ... अष्टमी स्कंदष
ष्ठी शिवरात्रिश्चतुर्दशी। एताः पूर्वयुताः कार्याः तिथ्यंते पारणं भवेत्। तथा च जन्माष्टमी रा
हिणी च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या तिथ्यंते पारणमिति। अत्रापि तिथ्यंते पा
रणासंभवोऽसंभवेऽपि तिथ्यंतानावपि दिवैव पारणं कार्यं। अत एवात्र यान्यन्यानि पूर्व व्यार
विद्धाप्रतिपादकानि वाक्यानि तानि परदिने त्रिमयार्द्धनाविचतुर्नाडीव्याप्तिविषयाणि १०२

= विषयाणि नेदिनव्यापि

विदितव्याप्तिनीति सिद्धांतः। दिवापारणपर्याप्ततिथ्यंतसत्त्वे यानि पुनः परविद्धा
नि प्रतिपादकानि तानि परदिने समयार्द्धनाविचतुर्नाडीव्याप्तिविषयाणि दिवा वा तिथ्यंता
भावविषयाणि विदितव्यानीति सिद्धांतः॥ इति शिवरात्रिनिर्णयः॥ ॥ अथासिद्धविरु
द्धादिकं लिख्यते। चतुर्दशी शनिवारेण सिद्धा। शनौ चतुर्थी नवमी चतुर्दश्यपथरो हि
णी। बाधकं रविवारेण विरुद्धा। सूर्ये विशाखा भरणी द्वादश्याऽथ चतुर्दशी ककोच
तुर्दश्यां राहुवधादिकं कार्यं। तदुक्तं। चतुर्दश्यां चतुर्थ्यां च नवम्यां चारिमर्दनमिति। अ
त्रयोर क्रियां वर्जयेत्। विशेषतायां गिनी सत्तु खवावाय व्ययात्रान कर्तव्या मीन नष्टे च
रप्रदे चतुर्दशी पूर्णिमा मिश्रा स्यात्। दंतधावनं च वर्ज्यं पर्व चातुः सर्व चतुर्दशी तिथिपर
वा शिवः प्रदुष्टः॥ इति श्रीनिर्णयामृते चतुर्दशीनिर्णयः॥ श्रीसूर्यसेन ... दितिना॥ श्रीमत्यं
नया॥ ॥ अथ पूर्णिमानिर्णीयते। सा च सावित्रीव्रतव्यतिरिक्तोपवासादिषु परा चैतैवोपा
ष्या। तदुक्तं। एकादश्यष्टमी षष्ठी पौर्णिमासी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः

परान्विता इति। ब्रह्मवैवर्ते। प्रतिपत्पंचमी। भूतसावित्रीवटपूर्णिमा। नवमी दशमी चै
व नोपोष्याः परसंयुता इति। युग्मवाक्याच्च। यत्तु ब्रह्मपुराणे। षष्ठ्येकादश्यमावास्या
पूर्वविद्धा तथाष्टमी। पूर्णिमा परविद्धा च नोपोष्यं पदपंचकमिति। इदमपि सावित्रीव्रत
विषयं। सावित्रीव्रतं च ज्यैष्ठपूर्णिमायां वक्ष्ये। अथ चैत्रपूर्णिमास्यामिंद्रपूजा कार्या।
तदुक्तं देवीपुराणे। चैत्रे विधिक्रमे पूर्णिमास्यां तथा कार्या सर्वकामसमृद्धये। इंद्राय
महती पूजा कामिकं लभते फलमिति। चित्रानक्षत्रयुक्तायामस्यां चित्रवस्त्रं दद्यात्। त
दुक्तं विष्णुस्मृतौ। चैत्री चित्रायुता चेत्स्यात् चित्रवस्त्रप्रदानतः सौभाग्यमाप्नोति। इयमेव
शनिरविगुरुवारेषु महापुण्या। तदुक्तं ब्रह्मपुराणे। मंदे वार्के गुरौ वापि वारेष्वेतेषु
चैत्रिकी। तत्राश्वमेधिकं पुण्यं स्नानेन लभते नरः। दानमक्षयतां याति पितॄणां तर्पणे
न तथेति। अस्यां सर्वान्देवान्दमनकेनाभ्यर्च्य संवत्सरकृतपूजायाः फलं प्राप्नोति। त १५३
दुक्तं लिंगपुराणे। चैत्रमासि सिते पक्षे पंचदश्यां यथाविधि। दमनेनार्चयेद्देवीं अष्टम्यां

भूतमातरं। वायुपुराणे। संवत्सरकृतार्चायाः साफल्यं च। खिलेश्वरं। दमनेनार्चयेच्चैत्र्यां
विशेषेण सदाशिवमिति॥ इति चैत्रीपूर्णिमा॥ ॥ वैशाखपूर्णिमास्यां कृष्णमृगाजिनदा
नं कार्यं। यथा। यमगाथासु। यस्तु कृष्णाजिनं दद्यात्सखुरं शृंगसं ॥ तिलैः प्रच्छाद्य वासो
भिः सर्वरत्नैरलंकृतं। वैशाख्यां पूर्णिमास्यां तु विशाखासु विशेषतः। ससमुद्रगुहा येन स
शैलवनकानना। सप्तद्वीपान्विता दत्ता पृथिवी नात्र संशयः। तथा च विष्णुः। कृष्णाजिने
तिलान्कृत्वा हिरण्यं मधुसर्पिषा। ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति। इति वैशा
खीपूर्णिमा॥ ॥ तिलान्दद्यात्पूर्णिमास्यां ज्येष्ठ्यां चैव विशेषतः। अश्वमेधस्य यत्पुण्यं
तत्प्राप्नोति न संशयः॥ इति विष्णुरपि॥ ज्येष्ठी ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानहप्रदाने
न नरो नराधिपत्यमाप्नोति॥ इति ज्येष्ठीपूर्णिमा॥ ॥ आषाढपूर्णिमायां चतुर्दश्यामुपो
ष्य हरिपूजा कार्या। तदुक्तं ब्रह्मपुराणे। चतुर्दश्यामुपोष्याऽथ पौर्णिमास्यां यजेद्धरिमि
ति। अस्यामेव पूर्वाषाढायुक्तायामन्नदानादिकं दद्यात्। तथा च। विष्णुः। आषाढ्यामा

षाढ्युक्तायां अन्नपानादिदानेनंतं देवाक्षयमाप्नोति॥ इत्याषाढीपूर्णिमा॥ श्रावण-
पूर्णिमायां श्रवणनक्षत्रयुक्तायां स्नानं जलक्रीडादिकं सामवेदश्रवणं च कुर्यात्। त-
दुक्तं स्कंदपुराणे। श्रावण्यां श्रावणे चैव पूर्वं हयशिरा हरिः। उद्गायत्सामवेदं तु सर्वकि-
ल्बिषनाशनमिति। सिंधुनदीवितस्तायां प्रविष्टान्तरे चैव हि। अतोऽर्थं श्रवणे तत्र स्ना-
नं सर्वार्थसिद्धिदं। तत्रासं पूजयेद्विष्णुं शार्ङ्गचक्रगदाधरं। आनयाच्य यसामानि श्रुत्वा
विप्राश्च सर्वदा। क्रीडितव्यं च नोक्तव्यं तत्रैव बंधुजनैः सह। जलक्रीडा तु कर्तव्या नारीभि-
र्दृष्टिलब्धये इति॥ अथोपाकर्म निर्णीयते। तत्र यजुःशाखाध्यायिनः श्रावण्यां पौर्णमास्यां उ-
दयकालव्यापिन्यां ग्रहसंक्रांतिदोषरहितायां व्रीह्याद्यौषधिप्रादुर्भावे सति उपाक-
र्म कुर्युः। बह्वृचाः श्रावणे मासि श्रवणनक्षत्रे धनिष्ठायुक्ते कुर्युः। सामवेदिनः श्रावणमा-
से हस्तनक्षत्रयुक्तपंचम्यां कुर्युः। ग्रहणादिदोषरहिते औषधिप्रादुर्भावविषये सर्वेषां उ-
ल्यः। तदुक्तं याज्ञवल्क्येन। अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा। हस्तेनौषधिभा- १०५.

का

वे वा पंचम्यां श्रावणस्य तु॥ इति। अध्ययानामिति शाखाभिप्रायेण बहुवचनं। निगमे-
ष्वि। श्रावण्यां श्रावणीकर्म यथाविधि समाचरेत्। उपाकर्म तु कर्तव्यं कर्कटस्थे दिवाकरे।
हस्तेन तु पंचम्यां श्रावण्यां श्रावणेन वेति। तथा च गोभिलः। पर्वण्योदयिके कुर्युः श्रावण्यां
तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युर्ग्रहसंक्रांतिवर्जिते इति। चतुर्दशीयुक्तस्य पर्वणो नि-
षेधश्च। तदुक्तं कालिकापुराणे। चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ। वेदान्स्वी-
कुर्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः। हृत्वा तावसुरौ देवपातालतलवासिनौ। आहृत्य
ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयं। स प्राप्य ताः श्रुती ब्रह्मा पर्वण्योदयिके पुनः। ततोऽब्द
तयत तस्मिन्नुपाकरणमिष्यते। अस्तलं वर्ज्यकालं वेदाहरणं शंकरे तिथौ। यत्तु वचनं॥
श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति
एतस्यां श्रावण्यां विधाय समायनं हिरण्यगर्भपवित्रारोपणविषयौ। उपाकर्मांगितृनमा
ऋक्षदयिकं आहृत्वा तैत्तिरीयपदं। मन्येषामपि यजुषां शाखिनामुपलक्षणं। तथा

कालांतराऽविधानात्। व्यासोऽपि। श्रवणेन त्वयं कर्म उत्तराषाढसंयुक्तं। संवत्सरकृतोऽध्य
यस्तत्क्षणादेव नश्यतीति। धनिष्ठासंयुतं कुर्याच्छ्रावणं कर्म यद्भवेत्। तत्कर्म सफलं तस्या
ऽपाकरणसंज्ञितमिति। परिशिष्टेऽपि। धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितं। श्रावणं
कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः। तथा स्मृत्यंतरे। उपाकर्म प्रकुर्वीत ऋक्सामाथर्वयजु
र्विदः। यस्य संक्रांतिशुक्रेषु हस्तश्रवणपर्वसु इति। संक्रांतौ ग्रहणे चैव सूतके मृतके तथा।
गणस्नानं न कुर्वीत नारदस्य वचो यथा। अतोऽत्रापादसंयुक्ते पर्वणि स्यादुपाक्रिया। ऽः
श्वःश्वोकामयथ्याराड्पतस्मिन् द्विजातय इति। ग्रहसंक्रांतिदोषे तु भाद्रपदपूर्णिमास्यां
यजुःशाखिनो वाजसनेयिव्यतिरिक्ता वाजसनेयिनस्तु श्रावणशुक्लपंचम्यामिति। त
दुक्तं स्मृतिमहार्णवे। संक्रांतिग्रहणं वापि पौर्णमास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां
कार्या वाजसनेयिभिरिति। तथा च। यदि स्याच्छ्रावणं पर्व ग्रहसंक्रांतिदूषितं। स्यादुपा
करणं शुक्लपंचम्यां श्रावणस्य तु। संक्रांतिग्रहणं वापि यदि वै पर्वणि जायते। तन्मासेह १५५

स्तयुक्तायां पंचम्यां वा तदिष्यते। एतच्च वाजसनेयिनामन्येषामिति केचित्। सर्वेषां श्राव
णपंचम्यामेवेति। तदुक्तं। तथा सति मध्यादिवाक्यानां निरर्थकता स्यात्। बहूनां छन्मास
अवर्द्धे छंदोगास्तन्मासश्रवणात्कुर्युः। यथाह मनुः। श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य
यथाविधि। युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्धपंचमानिति। अर्धः पंचमो मासो येषां
तेऽर्धपंचमाः। उपाकर्मप्रभृति सार्धचतुरो मासान्स्वाध्यायं यदि नेच्छुनाधीयीतेत्यर्थः। तथ
अपिशब्दाद्भाद्रपदमवधिश्रावणादस्य पंचमीनां सुपसंग्रहः। तथा च बह्वृचपरिशिष्टेद
रिका। अत्र हस्तौषधयश्चास्मिन्मासे न तु भवंति चेत्। तदा भाद्रपदे मासि श्रावणेन तदिष्यते:
अत्रौषधयो भावः संक्रांत्यादिदोषाणामुपलक्षकः। गार्ग्योऽपि। प्रौष्ठपद्यां हस्तेनोपाक
रणमिति। प्रौष्ठपदी प्राप्य इत्यर्थः। यत्तु बौधायनवचः। श्रावण्यां पौर्णमास्यामाषाढ्यां वापा
कृत्य छंदांस्यधीयीतेति। यजुः प्रौष्ठपद्यामपि सदोषायामाषाढ्यां कुर्वीत तत्परं। यत्तु के
श्चिदुक्तं। आषाढ्यां विधानेन यजुःशाखिनामेवाषाढ्यामुपाकर्म विहितं। बह्वृचसाममगा

१०३

नांच कस्मिंस्मिं श्चिच्छाखाविशेषे शृंगग्राहिकतया निषेधाभावात् पारकमविरोधियदिं निन्या
यानेवाषाढ्यां तन्मासश्रवणनक्षत्रे हस्ते वा उपाकर्म प्राप्तौ अन्यथा तेषां विहिताकरणे न
प्रत्यवायः प्रसज्येत। तदुक्तं स्मृत्यर्थसारे। कस्मिंश्चिद्दिने ग्रहणसंक्रांति वर्जितकार्यं। कर्मणा
न लोपनोत्कर्ष इति। अत्र कर्तव्यमुच्यते तत्र काल्यायिनः उपाकर्मणि चोत्सर्गे यथाकालं
समेत्य स्वान् ऋषीन् दर्भमयान् कृत्वा पूजयेत् तर्पयेच्चैव इति हेमाद्रौ चेत। नवकृपाल्लतिः पौर्ण
मास्यां पूर्वाह्ने एव ब्राह्मणान् भोजयेत् तत्र पितॄन् उद्दिश्य देवताः इति बौधायनोपि गो
दर्भ तमादि ऋषीन् सप्त कृत्वा संस्मयान् कृत्वा पूजयित्वा यथाशक्ति पूजयेदुत्तरदिति। तत्र
गोत्रे तमादीनि स्वशाखोक्त ऋषीणां सुपलक्षणं। कश्यपमपि वदांतराणां। तत्र विष्णोः त्रा
संप्राप्ते श्रावणस्यांस्यां तथा पौषमास्यां दिनोदये स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधा
नतः। अतो देवानृपितॄंश्चैव तर्पयेत् परमांभसा उपाकर्मादि चैवोक्तं ऋषीणां चैव तर्पणं १५५
कुर्वीत ब्राह्मणैः सार्धं वेदानुद्दिश्य शक्तितः इति। कालहेमौ तो उपाकर्म... निवा

ननु दशादशासु नोक्तम्पक्षे त्वषपि युगादिषु उपाकर्मसु दोषश्चार्थं तदिष्टं दर्शोदित इ
ति। तदुक्तं कात्यायनेन। उत्कर्षः कालवृद्धौ स्यादुपाकर्मादि कर्मणि। अतिषेकादि वृद्धी
नां नत्तु कर्षो युगादिषु इति। इत्यपि श्रुंगवचनविरोध इति चेन्न। अपि श्रुंगवचनस्य छंद
ग विषयत्वात्। यतस्तेषां कालवृद्धावपि सिद्धा कर्क एवोपाकर्मस्थलोपपदे तु दर्शेन उ
पाकर्मापराह्णिकमिति। सिंहे रवौ दर्शे नापराह्णिकमुपाकर्म। पुष्य दौ पूर्वाह्णे उत्सर्गो
उत्सर्जनमित्यन्वयः। ननु पर्वणि ग्रहणे सति। त्रयोदश्यां चतुर्दश्यां श्रवणे वेध इति वेध
दूषितत्वात्। बह्वृचैरुपाकर्म न कार्यं। वेधश्च स्मृतावुक्तः। यथा। त्रयोदश्यादिकं वर्ज्यं दि
नानां नवकं ध्रुवं। मंगल्येषु समस्तेषु ग्रहणे शशिसूर्ययोः। तथा। द्वादश्यादित्रितीयांतो
वेधः स्कंदग्रहे स्मृतः। एकादश्यादिकः सौरे चतुर्थ्यादिक कीर्तितः। खंडग्रहे तयोः प्रोक्त
त्रयत्र दिनद्वयमिति। दिनद्वयग्रहणात् पूर्वमुत्तरं वा। अतश्चतुर्दश्यामपि श्रवणर्क्षे
वेधदूषितत्वादुपाकर्म न कार्यमिति। उपाकर्मणि वेधदोषाभावात्। यथा। नित्ये नैमि

त्रिकेहोमेतुप्रदद्यात्क्रियास्युरुपाकर्मणिचोत्सर्गेयद्वेधनंविद्यते॥इति॥इत्युपाक
र्म॥७॥अथोत्सर्जनमुच्यते॥तदुक्तंयाज्ञवल्क्येन॥पौषमासस्यरोहिण्यामष्टकायां
मथापिवा॥जलांतेछंदसांकुर्युरुत्सर्गंविधिवद्बहिरिति॥मनुरपि॥पुष्येतुछंदसांकुर्या
द्बहिरुत्सर्जनंद्विजः॥माघशुक्लस्यसंप्राप्तेपूर्वाह्णेप्रथमेऽहनि॥इति॥अथमाघशुक्लस्य
तिनाद्यपदपौषमास्यांउपाकर्मविषयंतथा॥माघशुक्लप्रतिपदएवसार्धपंचमा
सत्वसंभवात्॥हारीतोऽपि॥अर्धपंचमान्मासानधीयीतद्विजइति॥अर्धपंचमाससंभ
वात्तथाचगोभिलः॥छंदोगामिलिताःकुर्युःप्रातरुत्सर्गिकींक्रियां॥अपराह्णेउपा
कर्मपुष्यदर्शायांविदुरिति॥दर्शश्चअपराह्णेउपाकर्मपुष्येप्रातरुत्सर्जनंकुर्या
दिति॥इत्युत्सर्जनं॥अत्रोपाकर्मानंतरंअपराह्णेभद्रारहितेसतिरक्षाबंधंकु
र्यात्॥भद्रायांतस्यनिषेधात्॥तदुक्तंस्मृतिसंग्रहे॥भद्रायांद्वेनकर्तव्येश्रावणीफा
ल्गुनीतथा॥श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी॥अत्रश्रावणीतिश्रावण्यां १०५

क्रियमाणंरक्षाबंधनादिकर्मउच्यतेनतूपाकर्मतस्यपृथगुपादानात्॥श्रावण्यां
श्रावणीकर्मयथाविधिसमाचरेत्॥उपाकर्मतुकर्तव्यंकर्कटस्थेदिवाकरेइति॥उ
पाकर्म॥तुसतिसंलवेभद्रांतएवकर्तव्यं॥आद्योपाकर्मतुनकार्यमेवोत्सर्गःसर्वका
येतुनिषिद्धत्वात्॥रक्षाविधिस्तुभद्रायांसत्यांतदंतेरात्रौवाकार्यः॥नतथोपाकर्म॥
तस्यपूर्वाह्णेएवविधानात्॥तदुक्तंभविष्योत्तरे॥उपाकर्मदिनेचोक्तंऋषीणांचैव
तर्पणं॥रक्षापोटलिकांशुद्धांकारयेदक्षतैःशस्तैःसिद्धार्थैर्हेमभूषणैः॥वस्त्रैर्विचित्रैः
कार्पासैःक्षौमैर्वामलवर्जितैः॥विचित्रसूत्रग्रथितांस्थापयेद्भाजनोपरि॥उपलिप्तेगृहम
ध्येदत्तेचतुष्केतुन्यसेच्छुभंपीठं॥तत्रापराह्णसमयेसामात्यःसपुरोहितः॥ससुहृत्॥
तस्यपुरोधाःनृपतेःरक्षांबध्नीतमंत्रेण॥मंत्रश्च॥येनबद्धोबलीराजादानवेंद्रोमहा
बलः॥तेनत्वामभिबध्नामिरक्षेमाचलमाचल॥ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमा
नवैः॥कर्तव्योरक्षिकाचारोद्विजान्संपूज्ययत्नतः॥अनेनविधिनायस्तुरक्षिकाबंधमाच
रेत्॥

सर्वदोषरहितः सुखं संवत्सरं वसेत्। आषाढ्यां श्रावण्यां प्रौष्ठपद्यां वा सर्वदेवानां
पवित्रारोपणं कार्यं। तदुक्तं मत्स्यपुराणे। आषाढ्यायामथाऽष्टम्यां चतुर्दश्यामुमा
पतिं। पवित्रैरर्चयेद्विष्णुं प्रौष्ठपद्यां श्रावण्यां वा नरोत्तमानिति। इति श्रावणीनिर्णयः॥ ७॥ भा
द्रपदपूर्णिमास्यां सावित्रीव्रतं सुवासिनी नारी जर्त्तरासुदृढये सावित्रीव्रतं कुर्यात्।
भविष्योत्तरेऽपि। श्रूयतां पांडवश्रेष्ठ सावित्रीव्रतमाचरितं कथयामि यथाचीर्णति
यासत्या युधिष्ठिर। त्रयोदश्यां भाद्रपदे दंतधावनपूर्वकं। त्रिरात्रं नियमं कुर्यात्तु
पवासस्य नारतो। अशक्त्या तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः। अयाचितं चतु
र्दश्यां उपवासेन पूर्णिमां। इत्यादि विधिस्तु प्रसिद्धवटसावित्र्यमावास्यायां वक्ष्यते।
अत्रैव लोकपूजा कार्या। तदुक्तं ब्रह्मपुराणे। पूर्वं भाद्रपदायोगे पौर्णिमास्यां पि
तामहः। शक्रान्नियमयामास अग्निं यमं वा वित्तेशं शंकरान् लोकपालान् सुरक्षार्थं त्रै १०८
लोक्यस्याम्बरान्। पृथिव्यां धारणार्थं च तथानंतं च योगिनां। तस्मात्तत्र लिखेत्तत्प

द्ममष्टपत्रं सकर्णिकं। कर्णिकायां लिखेत्तत्र ब्रह्माणं तं कमलोद्भवं प्राच्यादिषु च पत्रेषु
वासवाद्यांश्च साक्षतान्। ततः क्रमेणैतानेव संस्थाप्य कलशान् पृथङ्नाम्ना पश्चात्संपूज्य नि।
यास्तु भक्त्या ब्रह्मादयः सुराः। इति। भाद्रपदपूर्णिमा॥ ८॥ अथाश्विनपूर्णिमाद्यां त
दुक्तं ब्रह्मपुराणे। आश्वयुज्यां पौर्णमास्यां निकुंभो वा शुकालवान्। आयाति सेनया सा
र्द्धं चासुरं सुदारुणं। तस्मात्तत्र नरैर्मर्त्यैः स्वगेहस्य समीपगाः। शोधितव्याश्च मंडाने
नूतव्यानि नारंगैर्विशेषवत्तु सुस्नातैश्च सुलिप्तैश्च नरैस्तत्र सबालकैः। दिवा तत्र न भो
क्तव्यं मानुषैश्च विवेकिभिः। स्त्रीवृद्धमूर्खबालैश्च भोक्तव्यं पूजितैः सुरैः। पूज्याश्च सकलैः
पात्रे सुधाधाराद्युरूपिणिः। द्वारापांते प्रदीपश्च संपूज्यो हव्यवाहनः। यवाहैश्च तु घृतं
पातस्थं तु लक्ष्मीश्च वत्तर्पिताः। संपूजितव्याः सर्वेऽपि पयसा पायसेन सा कृताः स्त नार्यः कंस
श्वतपानं दीवराश्चनिः। गोमहिषः सुरतीपूज्या छागवर्किकुलाशानो। अरवैत्रवक्रिदिस
जागरिवद्भिर्विनायकः। इड्ड्पाः श्ववज्रीरवंनाय धाविनव विस्तारः। ततः पूज्यानिकं नस्य

समां सम्मिलतंडुलैः सुगंधिनिर्वृतापतैः कासरादैश्च हरिभिः सांकारार्हो महिषाद्वो सा
गुग्गुलैः ब्राह्मणान्भोजयित्वा व्रतोक्तं मासं सर्वं विहितं इति अस्यामेवाश्वयुज्यां अ
श्विनीयुक्तायां घृतपूर्णं स्रुव सर्पपात्रं दद्यात् यदाह विष्णुः अश्वयुज्यां अश्विनीगते चं
द्रमसा घृतपूर्णं भाजनं सुवर्णयुतं विप्राय दत्वा दीप्ताग्निर्भवतीति इयमेव कौमुदी अ
स्यां इंद्रं लक्ष्मीं च पूजयेत् तदुक्तं महाभारते पूर्णिमा आश्वयुजे मासि कौमुदी परि
कीर्तिताः कौमुद्यां पूजयेल्लक्ष्मीं इंद्रं ऐरावतस्थितं निशि जागरणं चापारस्तु अव
माचरेत् ॥ इत्याश्विनपूर्णिमा ॥ ७ ॥ अथ कार्तिकपूर्णिमा तत्र क्षीरसागरदानं तदु
क्तं ब्रह्मपुराणे पौर्णमास्यां तु संप्राप्ते तस्यां दामोदरः स दातं तथाश्नोदग्रे पूज्याशु
पास्य चत्रिकायुतः इति कार्तिके यस्यां यथा खड्गो वरुणश्चाकूता आनेः ध्यानेः सयुदैः
सार्द्धं नूषितव्यं निशागमे मात्स्ये पिष्टपथ गंधर्व चौरुद्रावचेष्टथा परमानैः फलैः १०९
शाकैर्विष्णि ब्राह्मणतर्पणैः एवं देवान् संपूज्य दीपान् दद्यात् हादद्विः दीपपानं तथा

गत्वा च सुरस्त्रां मनोहरः प्रदोषे च विधिवत् नेनमोऽस्तु दरये पदे तु ब्राह्मणाय यथा यो
ग्याद् दद्यात् क्षीरसागरं इति अत्रैव काम्यवृषोत्सर्गः कार्यः तदुक्तं भविष्योत्तरे कार्ति
क्यां तु वृषोत्सर्गो विवाहयुगपलक्षणः कार्यः कुरुकुलश्रेष्ठ दारनीराजनं यथा गडा
श्च घृतदानं च घृतधेन्वादयस्तथा प्रदेयाः पुण्यफलमिच्छता स्नासैः सकलं स्वदेवताः इति मत्स्या
पि कार्तिक्यां तु वृषोत्सर्गं कृत्वा नक्तं समाचरेत् शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतं
इति अत्रैव ब्रह्मपुराणे नीलवृषदानमुक्तं नीलं च वृषभं दद्यात् कुर्वन्सतरीयुतं सर्वस
स्यं च रम्यं च सर्वगंधसमन्वितं सुवाससं ब्राह्मणाय महाकांतारनारणं यावंति तस्या रोमा
णि शरीरे संति संख्यया तावद्युगसहस्राणि स्वर्गे वसति तत्प्रदः इड यिद्यात तो विष्णुरक्ष
माल्यानुलेपनैः नोऽक्तव्यं गारसप्रायं सु न वांस्य डिलततः इति स्कंदपुराणे तु विशाखप्र
कः नंदिकेश्वर उवाच स्वामिन्नहं पराधीनः त्वां नो शवापूराय एण नावकाशो हि मे कर्त्तव्य
तानि नियमस्तथा तन्मामकं समाचक्ष्व तत्र तं व्रतविदां वरायेनचीर्णेन नगवत्प्राप्यते सु

महत्फलमिति स्कंदः। आश्विने कोजागरं नाम व्रतानामुत्तमं व्रतं यच्चत्वा समवाप्नो
ति इह लोके महत्तमान्। निस्यमाश्वयुजे मासि पूर्णिमायां गणेश्वर। ऐरावणसमारूढः
शक्रो लोकानुकंपया। परिभ्रमति लोकान्नु सुप्तप्रमत्तकं वरप्रदः। कोजागरविधानेन
समाराधयतीत्यतः। तेन कोजागरं नाम व्रतं लोकेषु विश्रुतं। विधानं तस्य वक्ष्यामि श्रृणुष्
वैकायमानसः। पूर्णिमायामाश्वयुजे मासि कौमुदीपरिकीर्तिता। तत्राराध्य महालक्ष्मीमिंद्रमैरा
वणस्थितं उपवासं प्रकुर्वीत दीपान् दद्यात् घृतान्वितान्। लक्षं तदर्धमयुतं सहस्रं शतमेव वा। घृ
तेन दीपयेद्दीपान् तिलतैलेन वा व्रती। रात्रौ जागरणं कुर्यान्नृत्यगीतपुरःसरं। यथाविधि
वतो दद्यात् पुरवीथिषु दीपकान्। चैत्येषु देवायतने आरामेषूद्यानेषु च। ततः प्रभाते सुस्नातः सं
त पूज्य पुरशासनं। ब्राह्मणान् भोजयेत् क्षीरघृतशर्करपायसैः। वासांसि दद्याद्दक्षिणां ततश्चा
नुपूज्य द्विजान् यथाशक्ति प्रदातव्या दीपाः सुवर्णविनिर्मिताः। एवं निर्वर्त्य विधिवद्वै ततः
पारणमाचरेत्। व्रतस्यास्य विधानेन कल्पान्ते दीपसंख्यकान्। अप्सरोभिः परिवृतः सूर्य ११०

...कम् ह्रीयते। इह चायुष्यमारोग्यं पुत्रपौत्रादिसंपदः। भवंति व्रतमाहात्म्यात्तु कल
प्रभो गणेश्वर। इति स्कंदपुराणे कोजागरव्रतं। ॥७॥ कृत्तिकादिनक्षत्रयोगे। ब्रह्मपुराणे
अस्यामेव प्रमुक्तं यथा। आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित्। महती सा तिथिर्ज्ञे
या स्नाने दाने पुरोत्तमा। यदा याम्यं तु भवति ऋक्षं तस्यां तिथौ क्वचित्। तिथिः सापि महा
पुण्या मुनिभिः परिकीर्तिता। प्राजापत्यं यदा ऋक्षं तिथौ तस्यां नराधिप। सा महाकार्तिकी
प्रोक्ता देवानामपि दुर्लभा। इति तथा। पुण्या महाकार्तिकी स्याज्जीवेंदुः कृत्तिकासु ते। ति
तथा। विशाखासु यदा भानुः कृत्तिकासु च चंद्रमाः। स योगः पद्मको नाम पुष्करेष्वतिदुर्लभः।
इयं मन्वादिरपि। आषाढी कार्त्तिकी चैव वत्ति। इति कार्त्तिकी। ॥७॥ अथ मार्गशीर्षपौर्णिमा
स्यां चंद्रपूजा। तदुक्तं ब्रह्मपुराणे। मार्गशिरतिथिप्रक्रमे। वामनेत्रं हि यद्विष्णोस्तच्च वन
स्र२ द्वयं। अनेन मृगांक अंशेन ममतनाऽन्यच वयत्तु पूर्णिमास्यां तु तस्मात्तं पूजयेत् सर्वदा तु
लोके पुष्पधूपपयसा अर्घ्यदानैः परया मुदा रत्नदीपैश्च बलिभिर्द्विजतर्पणैः। नागाद्य

लवणंदेयंतस्मिन्नहनिसर्वदा।यस्मात्तुलवणंयस्माच्चंद्राद्दृशोपाद्विनिःसृतं।मातास्व
सावडहितास्तेपुत्राचकलांगना।कामरूपेनवेतुस्त्रीणांपुंसांदोःस्तनादिति।अस्याम
वमृगशिरोयुक्तायांसखुवर्णलवणदानेविष्णुनोक्तं।यथामार्गशीर्षशुक्लपंचदशी
मृगशिरसायुक्तायांश्वेतलवणसुवर्णनानंप्रस्थमेकंचंद्रोदयेब्राह्मणायप्रतिपा
दयेत्।अनेनकर्मणारूपसौभाग्यवानभिजायतइति।।इतिमार्गशीर्षपूर्णिमा।।छ।
अथापौषी।।अस्यांपुष्यनक्षत्रयुक्तायांअलक्ष्मीनाशनस्नानादिकंकार्यं।तदुक्तं
पुरा ब्रह्मपुराणे।हृदंडगस्ततोलक्ष्म्याचकमासीन्नतोद्विजाः।पुरंदरस्यसोमश्चतथापुष्य
बृहस्पती।पौषेतुपुष्ययोगेनपौर्णमास्यांततोबलात्।लक्ष्मीपुनःपुनश्चक्रुःसौभा
ग्याःसर्वकांक्षिणः।तस्मान्नरःपुष्ययोगेतत्रसौभाग्यवृद्धये।गौरसर्षपकल्केनस्व
मारस्यच्छक्रांतत्रं।ततस्नानंस्मृतंकार्यंअलक्ष्मीनाशनंपरं।उद्धृत्यदेवंचतथा। १११
सर्वौषधिभिस्तद्वत्तैलैः।स्नापयित्वानवंवस्त्रंदद्याच्छादनंततः।दृष्ट्वाचमंगलशतं

धूपस्त्रग्माल्यशोभितांततोनारायणःशक्रःचंद्रःपुष्यबृहस्पतीन्।संपूज्यपुष्पधूपै
श्चनैवेद्यैःपृथक्पृथक्।प्रदद्यात्सविधिर्मंत्रैःहुत्वाग्निंद्वनंतुतोधानविप्रांश्चसं
तर्प्यनानाविधैःस्वयंशोभितान्।ततःपुष्टिकरंहृद्यंभोक्तव्यंघृतपायसं।पुष्ययोगेतुकर्त
व्यंरात्रौस्नानंतुसर्वदा।।इतिपौषीपूर्णिमा।।छ।।अथमाघीपौर्णमासी।।अस्यांमघायु
क्तायांतिलैःश्राद्धंतिलपात्रदानंचकुर्यात्।तत्रविष्णुः।माघीमघायुताचेत्स्यात्तस्यां
तिलैःश्राद्धंहुत्वापूतोभवेदिति।नविष्णोत्तरेपि।माघ्यांमघासुचतिलैःसंतर्प्यपित्रे
दवृताः।तिलपात्राणिदेयानितिलाःसफलमोदनं।कार्पासदानमत्रैवतिलदानंतुश
स्यते।कंबलाजिनरत्नानिकंचुकोपानमोचकौ।उपानद्दानमत्रैवकथितंसर्वका
मदं।यत्रवातत्रवास्नानंदानंविनाशरूपतइति।नविष्णोत्तरेपि।पूर्णिमास्यां
ज्ञयामाघेपूज्ययदिविधिवच्छिवं।सोऽश्वमेधमवाप्नोतिविष्णुलोकेमहीयतइति।।इतिमा
घीपौर्णमासी।।छ।।अथफाल्गुनपौर्णमास्यांहोलिकानिर्णीयते।साचसायाह्न

तदुक्तं

व्यापिनी पूर्वविद्धा ग्राह्या। सायाह्ने होलिकां कुर्यात् पूर्वाह्णे क्रीडनं गवां। दीपं दद्यात्तु
दोषघ्नं एष धर्मः सनातन इति। यथा। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धै
व कर्त्तव्येति। तत्र भद्रायां होलिकां न दीपयेत्। तदुक्तं। भद्रायां होलिका पूजा राष्ट्रभंगं
करोतीति। नगरस्य च नैवेष्टा तस्मात्तां परिवर्जयेदिति। तथा च स्मृत्यंतरे। भद्रायां द्वे न
कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हंति ग्रामं दहति फाल्गुनी। तथा च
स्मृत्यंतरेऽपि। दिनार्द्धात् परतोऽपि स्यात् फाल्गुनी पूर्णिमा यदि। रात्रौ भद्रावसाने
च होलिकां तत्र दीपयेदिति। परदिनेऽपि दिनार्द्धात् परतोऽपि पूर्णिमायां विद्यमानायां
पूर्वविद्धायामेव रात्रौ भद्रावसाने होलिका दीपयितव्येत्यर्थः। यदा तु नः परदिने पूर्णि
मा सार्द्धयामात्रयं वा स्यात् द्वितीयदिवसे यदा प्रतिपद्वर्द्धमाना तु तदा सा होलिका स्मृ
ता। यत्तु वचनं। वह्नौ वह्निपरिग्रहे इति वह्नौ होलिकायां प्रतिपदं वर्जयेदित्यर्थः। १२२
तत्तु सायंकाले भद्रारहिते पूर्णिमासंभवे तामतिक्रम्य प्रतिपद्दिन कर्त्तव्येत्यत्र परं

1 दिपा... व्यापिनी न हि ... ग्रामिनी। तदा नैव होलिका कार्या। तदुक्तं नविष्णोत्तरे ।२
त्रप

ति २

अन्यथा न विष्णोत्तरवाक्यस्य निरर्थकिता स्यात्। अथाऽत्र कर्त्तव्यमुच्यते। भविष्योत्तरे।
राज्ञानं प्रतिपौरवाक्यं। अस्माकं दिष्टदकापि ढुंढा नाम महाराक्षसी॥ दिवारात्रौ समागम्य
बालान्पीडयते बलात्॥ रक्षया दंडकेनापि नेषाऽस्य नराधिप। मंत्राद्यैः परमाचार्यैः सा नियं
तुं न शक्यते॥ एतत्सर्वं समाख्यातुं ढुंढायाश्चरितं नृपतिः। इति पौरवचः श्रुत्वा राजा पृष्टोऽथ नारद।
नारद उवाच॥ सांप्रतं कथयिष्यामि येनोपायेन दह्यते। अद्य पूर्वदशी शुक्ला फाल्गुनस्य नरा
धिपो शीतकालो विनिःक्रांतस्त्रातग्रीष्मो भविष्यति। अभयदानं होलिकानां दीयतां पुरुषोत्तमाय
थाप्यशंकिता लोका रमंति च हसंति च। दारुडानि च सर्वाणि पखानि च सद्दीवास समरोत्सुकाः। याध
ड्वविनिर्यांतु शिशवः संप्रहर्षिताः। संचयं शुष्ककाष्ठानामुपलानां चकार यत्। तत्राग्निं विधिवद्धुत्वा
रक्षोघ्नैर्मंत्रविस्तरैः। ततः किलकिलाशब्दैस्तालशब्दैर्मनोहरैः। तमग्निं त्रिः परिक्रम्य गायंतु च ह
संतुश्च जल्पंतु स्वेच्छया लोका निःशंकाः स्वेच्छनांतिकं। तेन शब्देन सा पापा होमेन च निशकता॥
अदृष्टघातैर्डिंडानां राक्षसी क्षयमेष्यति। ततः प्रवृत्ति लोकेऽस्मिन् होलिकाख्यातिमागता॥

सर्वदुष्टापहो होमः सर्वरोगोपशांतिदः॥ क्रियतेऽस्यां द्विजैः पार्थ तेन सा होलिका स्मृता॥ सर्व
नि २ सारा तिथिश्चेयं पौर्णमासी युधिष्ठिर॥ सारश्चात्र फाल्गुन्यां परमानंददायिनी॥ अस्यां
निशागमे पार्थ संरक्ष्याः शिशवो गृहे॥ गोमयेनोपलिप्ते च सचतुष्के गृहांगणे॥ आकार
येच्छिशून्प्राज्ञान् खड्गव्यग्रकरान्नरान्॥ ते काष्ठखड्गैः संस्पृश्य शब्दहास्यैः कारः शिशून्तु हृद्यं
तिं तेषां दातव्यं गुडपक्वान्नमेव च॥ एवं ढुंढा तिया तस्याः सदोषः प्रशमं व्रजेत्॥ बालानां रक्षणं
कार्यं तस्मात्तस्मिन्निशागमे॥ इति होलिकानिर्णयः॥ फाल्गुनी मन्वादिरपि॥ अथ चैत्रादिपू
र्णिमासु चित्राद्यर्क्षयुक्तचंद्रगुरू यदि स्यातां तदा महाचैत्र्यादयः प्रोक्ताः॥ तदाह गार्ग्यः॥ मास
संज्ञे यदाऽब्दे चंद्रः संपूर्णमंडलः॥ गुरुणा याति संयोगं सा तिथिर्महती स्मृता॥ संपूर्णमंड
ल इति॥ अनेन पूर्णिमायामेव योगो विधीयते॥ शंकरगीतास्वपि॥ एकराशिगतौ स्यातां यदा गु
रुनिशाकरौ॥ पूर्णिमा ज्येष्ठमासस्य महाज्येष्ठी प्रकीर्तिता इति॥ तथा चोद्वृषे वा मिथुने भा
नौ नीचचंद्रो तथेंद्रतो॥ पौर्णमासी सुराचार्ये महाज्येष्ठी प्रकीर्तिता॥ माघपूर्णिमायां तन्नेव वि ११२

शोषञ्जः॥ मेषराशौ यदा शौरिः सिंहे चंद्रबृहस्पती॥ भास्करः श्रवणे चैव महामाघी च सा स्मृ
ता इति॥ एता महाचैत्र्यादयः॥ शालिग्रामादितीर्थेषु स्नानदानादिषु पुण्यतमाः॥ तदाह गार्ग्यः॥ म
हामाघी प्रयागे तु नैमिषे फाल्गुनी तथा॥ शालिग्रामे महाचैत्री लता॥ स्युः पुण्यदेतवः॥ गंगाद्वा
रे वैशाखी ज्येष्ठी च पुरुषोत्तमे॥ आषाढी वै कनखले केदारे श्रावणी तथा॥ बदर्यां च प्रोष्ठपदी
कुब्जाम्रे च महाश्विनी॥ पुष्करे कार्त्तिकी कन्याकुब्जे मार्गशीरी तथा॥ अयोध्यायां महापौषी
कृताः स्युः सुमहाफला इति॥ शालिग्रामादिव्यतिरिक्तस्थानेष्वपि चैत्र्यादिस्नानं कृतं दानादि
कं अनंतफलं भवति॥ आयुष्यं तस्य तेभ्यो ह्यं यद्दानादिकं विधिः॥ उपवासादिकं यत्तु तदनंतफ
लं स्मृतमिति॥ अथ सिंहविष्टिरुद्रादिकं लिख्यते॥ पूर्णिमायां वाराणसि सिद्धासुरो दशमांपं
चम्योः पौर्णमासा॥ ति॥ अथ पंचमीवृद्धिवादोऽस्मवादिकं कार्यं॥ अत्रैव तिथिपरत्वाद्दंडपूर्णाद्यः॥
तद्वक्तं पर्वणीं दारिति॥ क्रूरस्य देषु धत्तूरादिरात्रिवच्छेदकास्तु पूर्णिमा अश्वनालवर्तियो
गिनी सा स्मृत्वा दत्त्वा शान्त्यां यात्रा न कार्या॥ इति पूर्णिमानिर्णयः॥ ३॥ अथ प्रतिपदादिष्टु

अमावास्या निर्णीयते। तत्रोपवासादिषु अमावास्या द्विप्रतिपद्युक्तैव ग्राह्या। तदुक्तं। अ
मावास्या तृतीया च उपोष्याः स्युः परान्विता इति। निगमेपि। षष्ठ्यष्टमी अमावास्येति। चतुर्
दशी विद्धायां निषेधश्च। निगमे। भूतविद्धा अमावास्या निष्फलं स्यात्त्रयं विदां। स्कंदपुराणे
पि। भूतविद्धा अमावास्या न ग्राह्या मुनिपुंगवैरिति। वटसावित्रीव्रतपैत्रिकीष्वेतत्त्रयो
दशी स्नानोपोष्याः परसंयुता इति। अतश्च वटसावित्रीव्रतव्यतिरिक्तेषु अमावास्या पर
युतैव ग्राह्येति सिद्धांतः। ज्येष्ठमासस्यामावास्यायां पूर्वविद्धायां वटसावित्रीव्रतं कुर्या
दिति। तत्रायं विधिः। ज्येष्ठस्यातु तत्र त्रयोदश्यां तामारभ्य त्रिरात्रोपोषिता नारी। अशक्ता चेत्त्र
योदश्यां नक्तं चतुर्दश्यां अयाचितम् अमावास्यायामुपवासं कृत्वा कस्मिंश्चित्पात्रे प्रस्थ
मात्रां वालुकां यवादि धान्यं वा दायतस्योपरि वस्त्रयुग्मेन वेष्टिते वंशपात्रे स्वशक्त्या
निर्मितां सौवर्णीं मृन्मयीं वा सावित्रीप्रतिमां स्थाप्य वटमूले पूजयित्वा ब्राह्मणाय द
द्यात्। तदुक्तं भविष्योत्तरे। अमायां च तथा ज्येष्ठे वटमूले महासती। त्रिरात्रोपोषिता ना ११७

नाविधिनानेन पूजयेत्। अशक्त्या तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रियः। अयाचितं चतुर्दश्यां
अमायां समुपोषणं। गृहीत्वा वालुकां पात्रे प्रस्थमात्रां युधिष्ठिर। ततो वंशमये पात्रे वस्त्रयुग्मे
न वेष्टिता। सावित्रीप्रतिमां कुर्यात्सर्वावयवशोभनीं। सौवर्णीं मृन्मयीं वापि स्वशक्त्या च वि
निर्मितां। सार्द्धसत्यवती साध्वी फलनैवेद्यदीपकैः। वटावलंबिनं चाकाष्ठनारं युधिष्ठिर
विरूढैः सप्तधान्यैश्च बकुधूपसंकल्पितैः। रक्तन्यौकं कंठसूत्रं च वस्त्रैः कुंकुमकेसरैः। सावित्र्या ततः ६
ख्यानकं वापि वाचयित्वा द्विजोत्तमान्। रात्रौ जागरणं कृत्वा नृत्यगीतपुरःसरं। प्रभाते विधिना
पूर्वोक्तेन नरोत्तम। तामपि ब्राह्मणे दद्यात्प्रणिपत्य क्षमापयेत्। दानमंत्रश्च। सावित्रीयं म
या दत्ता सहिरण्या महासती। ब्राह्मणः प्रीणनार्थाय ब्राह्मणः प्रतिगृह्यतामिति। एवं दत्वा
द्विजाय सावित्रीं तां युधिष्ठिर। नैवेद्यादिकं तत्सर्वं ब्राह्मणस्य गृहं नयेत्। स्वयं दत्वा पदं गच्छे
त्स्ववेश्म पुनरागता। न तत्र तु कोऽद्ध हविष्यान्नं ब्राह्मणैर्बांधवैः सह। विसर्जयेत्ततो विप्रान्सा
वित्री प्रीयतामिति। व्रतेनानेन नारी च वैधव्यं नाप्नुयात्क्वचित्। इति वटसावित्रीव्रतं।।छ।। अ

थ कार्त्तिकामावास्यायां सुखरात्रिरुच्यते। तस्यां लक्ष्मीपूजनादिकं नववस्त्रधारणादिक्रिया
नीतं तदुक्तं ब्रह्मपुराणे। अमावास्यां देवतासु कार्त्तिके मासि केशवः। अत्रयं प्राप्य सुप्तासु सुखं
क्षीरोदसानुसुप्ता लक्ष्मीर्दैत्यभयान्मुक्ता सुखं सुप्ताः सुरा दशाः। अतस्तदर्थं विधिवत्कार्यमेत
च्चः सुखसुप्तिका। दिवा तत्र न भोक्तव्यं ऋते बालातुराबलात्। प्रदोषसमये लक्ष्मीं पूजयित्वा
यथाक्रमं। दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च। दीपमाला परिक्षिप्य प्रदोषे तदनन्तरं।
ब्राह्मणान् भोजयित्वा तु विभक्तपरितोषितान्। अलंकृतेन भोक्तव्यं नववस्त्रोपशोभिना।
स्निग्धैः सुग्धैर्विदग्धैश्च बान्धवैर्निहितैः सह। इति। अत्रैव राज्ञा कौमुदीमहोत्सवं कर्त्तव्यं। तदु
नविछोगरे क्तं तत्रैव। पराह्णसमये घोषयेन्नगरे नृपः। अद्य राज्यं बलेः कालो यथेष्टं चेष्टतामिति। लोके
श्चापि गृहस्थो धवलितांगिराः पुष्पचंदनमालो घोर्विवृते च गृहे गृहे द्यूतपान
रतस्तुष्टनरनारीमनोहरः। नृत्यवादित्रसंघुष्टसंप्रज्वलितदीपकः। दीपमालाकुली ११५
रम्यविध्वस्तध्वान्तसंचयः। प्रदोषे दोषे इति राज्ञो दोषागमेस्थानेऽवश्यपाविलासिनीसार्थे

च्छ्रीमंगलकारिणी। दृष्टा हृष्टं व्रजत्विपा दास्पंगप्रदायिनी। ततोऽर्द्धरात्रसमये स्वयं राप
गापुरं व्रजेत्। अवलोकयितुं रम्यं पद्भ्यामेव शनैः शनैः। ततः प्रत्यूषसमये नारीनिर्हृष्टा
दलक्ष्मीर्निःकासिता। तदुक्तं। एवं गते निशीथे तु जने निद्रार्द्धलोचने। तावन्नगरना
रीभिः सूर्पडिंडिमवादनैः। निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात्॥ इति कौमुदीमहो
त्सवः॥ छ॥ माघस्यामावास्यायां सावित्रीसहितं ब्राह्मणं पूजयित्वा नवनीतधेनुं ब्राह्मणाय
दद्यात्। तदुक्तं ब्रह्मपुराणे। अमायां माघमासस्य पूजयित्वा पितामहं। गायत्र्या सहितं दे
वं वेदवेदांगभूषितं। नवनीतमयीं धेनुं फलैर्नानाविधैर्युतां। सहिरण्यां सवत्सां च ब्राह्मणा
य निवेदयेत्। इति। माघामावास्यायां शतभिषानक्षत्रयुक्तायां श्राद्धादिकं महाफलप्र
दं भवति। तदुक्तं विष्णुपुराणे। माघासितपंचदशी कदाचिदुपैति योगं यदि वारुणेन
ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ॥ इति। अस्यामेव पूर्वभाद्रपद
युक्तायां श्राद्धादिना सहस्रयुगपर्यन्तं तृप्तिर्भवति। तत्रैव भाद्रपदस्तु पूर्वकाले तदायत्त्रि

यन्तेपितृभ्यः श्राद्धपरांत्वमिमवाप्नुवंति। युगानुसदृशंपितरस्तेनैनेति। इयमेवधनिष्ठासुधेना
वर्षायुतंतृप्तिदानर्चेति। तदुक्तंमहाभारते। माघमासस्यप्रक्रमे। कालेधनिष्ठायदिनामसंस्मि
नुनवेद्यनूपालतदापिछ्याः। दत्तंतिलान्नंप्रददातिस्त्रिवर्षायुतंयतूकुलजैर्मनुष्यैः। मा
घपौषयोरमावास्यारविवारेश्रवणेन दत्तंव्यतीपातवेदसा अर्धोदयाख्यकोटियहण
सन्निभोयोगः। तदुक्तंमहाभारते। अमार्कश्रवणपातैर्युक्ताचेत्पौषमाघयोः। अर्धोदयःस
विज्ञेयःकोटिसूर्यग्रहैःसमः। दिवैवयोगःशस्तोयंनतुरात्रौकदाचन। इतिस्कंदपुराणेपि। अर्धो
दयेतुसंप्राप्ते सर्वंगंगासमंजलं। शुद्धात्मनोद्विजाःसर्वेभवेयुर्ब्रह्मसंमिताः। यत्किंचित्
क्रियतेदानंतद्दानंमेरुसंनिभमिति। अथैत्रैवदानेविशेषउक्तः। चतुःषष्टिपलंसुवर्णंअमत्रेत
त्रकार्यस्यात्। सत्वावर्त्यागइष्यतपरतश्चेत्पारदनीति। यथापर्वप्रतिपदोःसंधिरर्वागावर्तना
घदितस्मिन्नहनियष्टव्यंपूर्वेद्युःस्यादुपक्रमइति। आवर्तनंमध्याह्नः। लौगाक्षिरपिपूर्वा
ह्णेयवामध्याह्नेयदिपर्वसमाप्यते। उपोष्यतत्रपूर्वेद्युस्तद्दर्ह्यामइष्यतो इतिमध्याह्नात् ११६

परतःपर्वप्रतिपत्संधेस्तुसंधिदिनात्परदिनेयागः संधिदिनेन्वाधानंकार्यं। तदाहलौगाक्षिः।
अपराह्णेयवासायंयदिपर्वसमाप्यते। उपोष्यतस्मिन्नहनिश्वोभूतेयागइष्यतइतिलौगाक्षि
लोपि। आवर्तनात्परःसंधिर्यदितस्मिन्नुपक्रमः। पूर्वेद्युरिष्टिरित्येषपर्वद्वयविनिर्णयइति।
अत्रपर्वद्वयनिर्णयइत्युक्तेश्चादर्शपूर्णिमामावास्ययोःसाधारणोनिर्णयः। विशेषस्तूच्यतेन
अपूर्णिमाप्रतिपत्संधिसंगमाहूर्ध्वंमध्याह्नादूर्ध्वंयदाभवति। तदातत्रैवान्वाधानंयागस्तुकुर्यात्।
तदाहकात्यायनः। संधिश्चेत्संगवादूर्ध्वंअर्वाक्प्रतिपदावर्तनात्तुसापौर्णमासीविज्ञेयास
यःकालविषयेतिथिरिति। नत्वेवंसतिपूर्वेद्युरन्वाधानेपारेद्युर्यष्टव्यमितिविधिर्विरोधइति
चेत्। नसद्यःतत्कालविधिरपिदर्शनात्। तथात्वो। आपस्तंबः। पौर्णमास्यांत्वन्वाधानपरिस्तर
णोपवासः। सद्योवासमस्तसद्यस्कालायांसर्वंक्रियतइति। ननु। तथापिपर्वप्रतिपदोःसंधिरर्वा
गावर्तनाद्यदितस्मिन्नहनियष्टव्यंपूर्वेद्युःस्यादुपक्रमइतिगोभिलवचनविरोधेनविषय
तीतिचेत्। नसंगवात्पूर्वमपिसंधेरावर्तनादर्वाचीनत्वात्तद्विषयत्वंगोभिलवाक्यकात्या
यनवाक्यस्यतुसंगवादूर्ध्वमागमध्याह्नादर्वाचीनसंधिविषयः। यद्यागोभिलवदैवतंचपर्व

द्वयसामान्यविषयं। प्रतिमासमासविषयं कात्यायन इति विशेषवचनेन सामान्यवा
धस्य विरोधः। अमायां तु विशेषः। यदा प्रतिपद्द्वितीया त्रिमुहूर्ता न्यूनिकं अपराह्णं व्याप्नो
ति। द्वितीया त्रिमुहूर्ता चेत् प्रतिपच्चापराह्णिकी। अन्वाधानं चतुर्दश्यां परतः सामदर्श
नात्। इति। सामदर्शनदिने यागनिषेधो वृद्धवसिष्ठेनोक्तः। इंदो निरुक्तिं तद्विषि परस्या
द्रुदितविधौ। यद्येयुरेणं चन्द्रः तत्र स्मिन्न पश्चादपि दिशि न दृश्यते। इति। ननु पर्वप्रतिपदोः सा
म्यः संधिस्तु वा भवति प्रतिपदि वृद्धिगामिन्यां क्षीयमाणायां वा कथं संधिज्ञानमिति चे
न्न। सत्यं प्रतिपद्वृद्धिनाडिकाद्विधा विभज्य पूर्वपर्वणि संयोज्य संधिः कल्पनीयाः। तदा
ह लौगाक्षिः। तिथेः परस्या घटिकास्तु याः स्युर्न्यूना अथाऽभ्यधिकाश्च यास्ताः। अर्धं वियोज्याथ न
था प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यात्। इति कात्यायनोऽपि। पारक्यघटिकान्यूना
तथावाप्यधिकाश्च याः। द्विघ्ना तदर्धं पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत्। अथ यागकाल उ
च्यते। तत्र पर्वणश्चतुर्थो भागः प्रतिपदाद्यास्त्रयो भागाः कालः। तदाह याज्ञवल्क्यः। ११७

पंचदश्याः परः पादः पक्षादेः प्रथमास्त्रयः। कालः पार्वणयोगे स्यात् अन्यथा तु न विद्य
ते। इति। वृद्धशातातपोऽपि। पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः। यागः कालः स विज्ञे
यः प्रातरुक्तो मनीषिभिरिति। पर्वप्रतिपत्संधिश्चेदपराह्णे सति परदिने चतुर्थेऽपि प्रतिप
द्भागे यागः कार्यः। तदाह शातातपः। संधिर्यद्यपराह्णे स्यात् यागः प्रातः परेऽहनि। कुर्वाणः प्र
तिपद्भागे चतुर्थेऽपि न दुष्यति। नियतं तु वचनान्नयष्टव्यं चतुर्थांशे योगः प्रतिपदः कश्चित्तु रक्षो
स्मिन् द्विलुंपति श्रुतिरेषा सनातनीति। इदमाद्यांशत्रये यागः काले संभवति। आलस्यादि
ना तदतिक्रम्य चतुर्थांशे न यष्टव्यमिति तत्परमिति। इति पर्वद्वयनिर्णयः॥६॥ अथानध्या
याः। उक्तं तत्तदाह याज्ञवल्क्यः। पंचदश्यां चतुर्दश्यां अष्टम्यां राहुसूतके। ऋतुसंधिषु भु
क्त्वा वा श्राद्धिकं प्रतिगृह्य च। ... अष्टमी। दिनयेत्तथा पक्षास
काः। गौतमोऽपि। ... चतुर्दश्यां पौर्णमास्य
वपि पक्षांते ब्रह्म नाधीयते। ... अष्टमी हंता तस्मात्तां परिव
ष्टकासु च। अमावास्या गुरुं हंति शिष्यं हंति चतुर्दशी। ...

द्वयसामान्यविषयं। पूर्णिमामात्रविषयं कात्यायन इति विशेषपरत्वेन सामान्यबा
धस्य विरोधः। अमायां तु विशेषः। यदा प्रतिपद्द्वितीया त्रिमुहूर्ता सायाह्निकं अपराह्णं व्याप्नो
ति। द्वितीया त्रिमुहूर्ता चेत् प्रतिपदापराह्णिकी। अथाधनं चतुर्दश्यां परतः सामदर्श
नात्। इति। सामदर्शनदिने यागनिषेधो वृद्धवसिष्ठेनोक्तः। इन्दोर्निरूढिते दर्शविधिपरस्या
दुदिते विधौ। यद्येकुलपंक्ति तत्स्मिन् पश्चादपि दिने कुर्वत। इति। ननु पर्वप्रतिपदोः सा
म्यः संधिस्तु वा न वृत्तिप्रतिपदि वृद्धिगामिन्यां क्षीयमाणायां वा कथं संधिज्ञानमिति चे
न्न। सर्वा प्रतिपद्वृद्धिनाडिका द्विधा विभज्य पूर्वपर्वणि संयोज्य संधिः कल्पनीयाः। तदा
ह लौगाक्षिः। तिथेः परस्या घटिकास्तु याः स्युर्न्यूनाधिकास्त्र यास्याः। अर्धं वियोज्य
था प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिनेस्यात्। इति कात्यायनोऽपि। पारब्धिघटिका न्यूना
तथा वाभ्यधिका अप्ययाः। द्विभागं तदर्धं पूर्वस्मिन् ह्रासवृद्धी प्रकल्पयेत्। अथ यागकाल उ
च्यते। तत्र पर्वणश्चतुर्थो भागः प्रतिपदाद्यास्त्रयो भागाः यागकालः। तदाह याज्ञवल्क्यः। ११७

पंचदश्याः परः पादः पक्षादेः प्रथमास्त्रयः। कालः पार्वणयोगे स्यात्। अन्यथा तु न विद्य
ते। इति। वृद्धशातातपोऽपि। पर्वणो यश्चतुर्थांशः आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञे
यः प्रातरुक्तो मनीषिभिरिति। पर्वप्रतिपत्संधौ अपि अपराह्णे सति परदिने चतुर्थेऽपि प्रतिप
द्भागे यागः कार्यः। तदाह शातातपः। संधिर्यद्यपराह्णे स्यात् यागः प्रातः परेऽहनि। कुर्वीत प्र
तिपद्भागे चतुर्थेऽपि न दुष्यति। नियतं तु वचनान्न यष्टव्यं चतुर्थांशे योगः। प्रतिपदः कश्चित्संस्थां
सितद्वितुं पंक्तिश्रुतिरेषा सनातनी। इति। इदमाद्यांशत्रययागः काले संभवति आलस्यादि
ना तदतिक्रम्य चतुर्थांशे न यष्टव्यमिति तत्परमिति। इति पर्वद्वयनिर्णयः॥७॥ अथान्वष्ट
काः। तत्र तदाह याज्ञवल्क्यः। पंचदश्यां चतुर्दश्यामष्टम्यां राहुसूतके। कालद्वयसंधिषु तु
क्रान्त्यादिकं प्रतिपद्भवेन्नितो गौतमोऽपि। पक्षादवं चतुर्दश्योरष्टमी द्वितयेत तथापक्षास
वपि पक्षांते ब्रह्म नाधीयते नारिरिति। ब्रह्मवेदः। मनुरपि। अमायां च चतुर्दश्यां पौर्णमास्य
ष्टकासु च। अमावास्या गुरुं हंति शिष्यं हंति चतुर्दशी। ब्रह्म हंत्यष्टमी पूर्णा तस्मात्तां परिव

ह्य३

शीयते। इति बौधायनोपि। महानिशा तु विज्ञेया मध्यमस्थ यामयोः। तस्यां स्नानं न कुर्वी
त चाध्ययनं पितृतर्पणमिति। मध्यमयामयोर्मध्यममिति द्वितीययामस्यांत्यं घटिकाद्व
यं तृतीययामस्याद्यं घटिकाद्वयमिति च तस्मा नाडिका महानिशा। तदुक्तं तानेव प्रातः
संध्यं द्विनाडी स्यात्सायंसंध्यं च तादृशी। महानिशा तु विज्ञेया च तस्या नाडिकास्तु याः।
हृद्भू मनुरपि। त्रयोदश्यां च सप्तम्यां चतुर्दश्यां परा त्रयः। अर्वाक् नाध्ययनं कुर्याद्धि
दीक्षेतस्य धारणमिति। अत्रैव विशेषो गार्ग्येणोक्तः। रात्रौ यामद्वयादर्वाक् सप्तमी च त्र
योदशी। प्रदोषः स तु विज्ञेयः सर्वविद्याविगर्हितः। रात्रौ नवसु नाडीषु चतुर्थी यदि दृ
श्यते। प्रदोषः स तु विज्ञेयो वेदाध्ययनगर्हित इति। श्लोकत्रीभाः। चातुर्मास्य द्वितीया
सु मन्वादिषु युगादिषु। विषुवायनयोर्द्विवत्रायने बोधनेऽनातो। पक्षाधिकत्रयोद
श्यां तस्या एतास्तास्तिथयः। दशस्थिकयद्विवेचस्यादनध्ययः ऋतावपीति। अस्याश्च
पक्षे तिथिवृद्ध्या चाधिकत्रयोदशी। सा नध्ययदिने पक्षे द्वितीयादित्रयोदश्यां तोना ११८

मेकादश्यां चाध्ययनानामेव विधानात्। किंच। यस्यास्त्रयोदश्यां तत्तरा तिथिश्चतुर्दशी
दिव वा दृश्येत सा वानध्ययनदिनमित्यर्थः। इति श्रवणद्वादशी चातुर्मास्यद्विती
या श्युगार्ग्येणोक्ता। अथावृद्धेव तस्यैव द्वितीयायां विष्णुदये। चातुर्मास्य द्वितीयास्ताः प्रवदं
ति मदर्षय इति। तथा चापूर्वं चोदमनध्ययमहः संक्रमणे निशि। दिवा पूर्वेद्युरारात्रिमि
ति वेदविदो विदुः। मनुरपि। जनन्यां हृदराराज्ञं च मृते चैव वस्तुपस्थिते नाधीयीत द्विजो नित्यं
न चैवाकालिके पुरा महाबुराघोषादेवेदस्याध्ययनं यज्ञेन। याज्ञवल्क्योपि। अदप
ते ष्वनध्ययः शिष्यो नित्यं न चैवाकालिके पुरा शिष्यत्विर्गुरुबंधुषु उपाकर्मणि चोत्सर्गे
स्वशाखाश्रोत्रिये मृते। संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वेदं द्युनिशाम
रण्यकमधीत्य च। इति। तथा। पञ्चमंडूक नकुल श्वाहिमार्जारमूषकैः। कृतेऽन्तरे त्वहोरात्रं शा
क्रपाते तथोच्छ्रय इति। शाक्रपात इति। शाक्र ध्वजस्यापासनादिने तदुत्थापनदिने चा। अध्ययन
विशेषः। शिष्टाचारावगतव्याः। अध्ययनदिनेष्वध्ययने प्रत्यवायः स्मृतिचंद्रिकायामु
क्तः।

अनध्ययेष्यध्ययनं प्रज्ञामायुः प्रजां श्रियं। ब्रह्मवीर्यं श्रियं तेजो निहंति तु यमः स्वयमिति।
अत्र विशेषः स्मृत्यर्थसारे प्रोक्तः। चतुर्दश्यष्टमी चैव प्रतिपत्सु च सर्वदा। उमेधनाम
नध्यायस्त्वंतरागमनेषु च। तथा विस्मृतशीलानां बहुवेदपाठिनामिति। अत्र च विशे
षापरार्के प्रोक्तः। चतुर्दश्यष्टमी चैव प्रतिपद्दर्शनिष्ठया। वेदांगन्यायमीमांसाधर्मशास्त्रा
णि चाभ्यसेत्। यथा स्मृतिचंद्रिकायां। उदये समये वापि मुहूर्तं त्रयगामिनि तु तद्दिनं
तदहोरात्रमनध्यायं विदो विदुः। इति। यत्तु वचनं। तावदेवोष्मनध्यायो न तन्मिश्रदिनां
तरं। उपवासव्रतादीनां तिथिमासं स तथैव चेति। इदं च देशाचारतो व्यवस्थापनीयं।
कचिद्देशे यावद्देवानध्याय तिथिनाडिका। तावदेवानध्ययनं कुर्वंति। इत्यनध्यायनि
र्णयः॥ छ॥ इति श्रीनिर्णयामृते सकलतिथिनिर्णयः समाप्तः॥ श्री॥ श्री॥ छ॥ अथ मा
सकृत्यानि॥ तत्रादौ चैत्रमासकृत्यं। तदुक्तं मत्स्यपुराणे। वर्ज्यं पिवाम धीयस्तु दधिक्षी
रं घृतं तथा। दद्याद्वस्त्राणि सूक्ष्माणि रसवस्त्रयुतानि च। संपूज्य विप्रमिथुनं गौरीमप्रा ११९

यतामिति। एतद्गौरीव्रतं नाम भवानीलोकदायकमिति। भविष्योत्तरेपि। चैत्रे त्रिरात्रं न
क्ताज्ञीन धास्नाचा ददातियः। अष्टौ पंचपयः स्विन्नो दरिद्रायकुटुंबिने। न जायते पुनरः
सोऽजीवलोके कदानेऽति। वामनपुराणे। चैत्रे मासि विचित्राणि शयनान्यासनानि च। विष्णो
प्रीत्यर्थमेतानि देयानि ब्राह्मणाय चेति॥ इति चैत्रमासकृत्यं॥ छ॥ अथ वैशाखकृत्यं। त
दुक्तं महाभारतेऽपि। निष्कृष्टे दैकनक्तेन वैशाखो यो जितेंद्रियः। प्रातः स्नायी नरः स्त्री वा ज्ञा
तीनां श्रेष्ठतां व्रजेदिति। वामनपुराणे गंधमाल्यानि च तथा वैशाखे सुरभीणि च। देयानि द्वि
जमुख्येभ्यो मधुसूदनतुष्टये इति। इति वैशाखकृत्यं॥ छ॥ अथ ज्येष्ठकृत्यं। तदुक्तं भविष्यो
त्तरे। पिष्टनकं यवः इच्छाज्येष्ठमासे सवेदिकं। पुष्पैः संपूज्य गंधधूपैर्नानाक्षविभूषितं॥
वर्षकोटिशतं साग्रं सूर्यलोके महीयत इति। कंडो ब्रह्मा। वामनपुराणे तदुक्तं। कं म बुध
त्रुवतं तालवृंतं सचंदनं। त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि वै ति॥ इति ज्येष्ठमासकृत्यं॥
छ॥ अथाषाढकृत्यं। तदुक्तं महाभारते। आषाढमेकभक्तेन स्थित्वा मासमतंद्रितः। बहु

धन्यो बहुधनो बहुपुत्रश्च जायते इति वामनपुराणे। उपानद्युगलं छत्रं लवणामलका
नि च। आषाढे वामनप्रीत्यै दातव्यानि भक्तितः॥ इत्याषाढकृत्यं॥ छ॥ अथ श्रावणकृ
त्यं। तदुक्तं महाभारते। श्रावणं नियतो मासं एकभक्तेन यः क्षिपेत्। यत्र तत्राभिषेकेण युक्त
स्तज्ञातिवर्द्धन इति। वामनपुराणेपि। घृतं च क्षीरकुंभांश्च घृतधेनुं फलानि च। श्रावणे श्रीधर
प्रीत्यै दातव्यानि विपश्चिता॥ इति श्रावणकृत्यं॥ छ॥ अथ भाद्रपदकृत्यं॥ तदुक्तं महा
भारते। प्रोष्ठपदं तु यो मासं एकाहारो भवेन्नरः। धनाढ्यः स्फीतमतुलमैश्वर्यं प्रतिपद्यते
इति वामनपुराणे॥ मासि भाद्रपदे दद्यात् पायसं मधुसर्पिषा। हृषीकेशप्रीणनार्थं ल
वणं सगुडोदनमिति॥ इति भाद्रपदकृत्यं॥ छ॥ इत्याश्विनकृत्यं॥ तदाह यमः॥ घृतमाश्वयु
जे मासि नित्यं दद्याद् द्विजातये। प्रीणयित्वाश्विनौ देवौ रूपभागभिजायते इति॥ वामन
पुराणेपि। तिलांस्तु रंगं वृषभं दधि ताम्रवशादिकं। प्रीत्यर्थं पद्मनाभस्य देयमाश्व
युजे नर इति। वशा धेनुः॥ इत्याश्विनकृत्यं॥ छ॥ अथ कार्तिककृत्यं॥ तदाह विष्णुः॥ कार्ति १२०

केमासि सकलेपि सायंकाले तिलतैलेनाकाशदीपं दद्यात्। तदुक्तं पुष्करपुराणे। तुला
यां तिलतैलेन सायंकाले समागते। आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति। महतीं
श्रियमाप्नोति रूपसौभाग्यसंपदमिति। तदाह विष्णुः॥ कार्तिकं सकलं मासं प्रातःस्नायी जि
तेंद्रियः। जपन् हविष्यभुक् दांतः सर्वपापैः प्रमुच्यते॥ वामनपुराणे। रजतं कनकं दीपान्मणि
मुक्ताफलादिकं। दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्तिके नर इति॥ इति कार्तिककृत्यं॥ छ॥
तदुक्तं महाभारते॥ मार्गशीर्षं तु यो मासं एकभक्तेन संक्षिपेत्। भोजयेच्च द्विजान् शक्त्या
मुच्यते व्याधिकिल्बिषैः। कृषिभागी बहुधनो बहुधान्यश्च जायते इति। वामनपुराणे। ख
राढाश्च नरा गावः शाकटादि अजाविकं। दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैः॥ इति मा
र्गशिरकृत्यं॥ छ॥ अथ पौषकृत्यं॥ तदुक्तं महाभारते। पौषमासं तु कौंतेय एकभक्ते
न यः क्षिपेत्। सुभगो दर्शनीयश्च श्रियो भागी च जायते। इति वामनपुराणे॥ प्रासादन
गरादीनि गृहप्रावरणानि च। नारायणस्य तुष्ट्यर्थं पौषे देयानि यत्नतः॥ इति पौषकृत्यं॥

अथमाघकृत्यं॥ तत्रादौविष्णुः। माघमास्यग्निंप्रयद्दंतिलैश्चैवसघृतंतत्रारंब्राह्मण
नूनाजयित्वादीक्षान्निर्नववित्तिं नविष्णात्तारा॥ पौर्णमास्याममायांवघारस्यस्नानमा
चरतुंत्रिंशाहिनानिपुण्यानिमकरस्थेदिवाकर इति॥ तथाच। अप्राप्तघारीरस्तुयः
कष्टंस्नानमाचारतूपदेपदेश्वमेधस्यफलंप्राप्नोतिमानवः॥ एवंस्नानस्यावसानेत्रो
व्यंदेयमवारितं। तोजयेद्विजदंपत्यंभूषयेद्वस्त्रभूषणैरिति। वामनपुराणे। माघमासि
तिलाःदेयाःशिलधेनुप्रदानतः। एभिर्दानादयश्चान्येमाधवप्रीणनायवै॥ इतिमाघकृ
त्यं॥ छ॥ अथफाल्गुनकृत्यं॥ तदुक्तंस्कंदपुराणे। फाल्गुनेवीदयागावोवस्त्रंचस्नाजिना
न्वितं। गोविंदप्रीणनार्थायदातव्यंपुरुषर्षभेति॥ इतिफाल्गुनकृत्यं॥ छ॥ अथागस्त्या
र्घदानविधिः॥ तदुक्तंमत्स्यपुराणे॥ प्रत्यूषसमयेविद्वान्कुर्यात्तस्योदयेनिशि। स्नानं
शुक्लतिलैःश्चैवशुक्लमाल्यांबरोगृही। स्थापयेदव्रणंकुंभंमाल्यवस्त्रविभूषितं। पंचर
त्नसमोपेतंघृतपात्रेणसंयुतं। नानाभक्ष्यफलैर्युक्तंताम्रपात्रसमन्वितं। अंगुष्ठमा १२१

त्रंपुरुषंतथासौवर्णमत्स्यायतबाहुदंडं चतुर्भुजंकुंभमुखेनिधाय धान्यानिसप्तांकुर
संयुतानि। सकाशपुष्पाचतनुस्तथाक्षियुक्तमात्रेणदद्याद्विजपुंगवाय। उच्चित्वाल्लवादरदी
र्घवांकुराननन्यचेतायमदिस्थिताद्याद्विशकिरस्मिं रौप्यैःखुरैर्हेममुखीसवत्सांधे
नुंबचक्षीरवतीप्रणम्यासवस्त्रघंटाभरणांद्विजाय। आसप्तरात्रादुदयार्घ्यमस्य दातव्यमेत
त्सकलंतरेणो यावत्समास्सप्तदशाथवास्युः अथार्घमप्येवंवदंतिकेचित्। अर्घमंत्रश्च काश
पुष्पप्रतीकाशवह्निमारुतसंभव। मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते। विंध्यवृद्धिक्ष
यकर मेघतोयविषापह। रत्नवल्लभदेवर्षेलंकावासनमोस्तुते॥ वातापीभक्षितोयेनसमुद्रः
शोषितःपुरा। लोपामुद्रापतिःश्रीमानयोसौतस्मैनमोनमः। अनेनविधिनायस्तुपुंसांअ
र्घ्यंनिवेदयेत्। इंद्रलोकमवाप्नोतिरूपारोग्यसमन्वितः। सप्तैवलोकानाप्नोतिसप्तार्घान्वि
प्रयच्छति॥ इत्यगस्त्यविधिः॥ छ॥ अथचातुर्मास्यव्रतानितदुक्तंभविष्योत्तरे। कत्तुरावा
र्जितान्मासान्देवस्योत्थापनविधिः। स्त्रीवानरोवामद्भक्तोधर्मार्थंसुदृढव्रतःगृह्णीयान्नि

यर्मैन्नेतानूदंतधावनस्यर्तकं।तेषांफलानिवक्ष्यामितूकहीणांपृथकूपृथक्।मधुरस्य
रोभवेद्राजा।पुरुषोयुद्दवर्ज्जनात्।तैलस्यवर्ज्जनात्पार्थसुंदरांगःप्रजायते।मधुकंतैलत्या
गेनासोनाथ्यमतुलंभवेत्।कद्रुतैलपरित्यागात्शोकनाशमवाप्नुयात्।पुष्पादिभोग
त्यागेनस्वर्गेविद्याधरोभवेत्।योगाभ्यासीभवेद्यस्तुसब्रह्मपदमाप्नुयात्।कट्वम्लतिक्तम
धुरक्षारकषायजान्रसान्।योवर्ज्जयेत्सवैरूप्यंवैगंध्यंनाप्नुयात्।कपित्थानांबलवर्ज्जना
द्भोगीरक्तकंवश्यजायते।घृतत्यागात्सलावण्यसर्वस्निग्धवपुर्भवेत्।फलत्यागेनमति
मान्बहुपुत्रश्चजायते।शाकपत्राशनाद्भोगीअपक्वादोन्नदोभवेत्।पादाभ्यंगपरि
त्यागेशिराभ्यंगात्पार्थिवः।दीप्तिमान्दीप्तिकिरणोराज्ञोद्रव्यपतिर्भवेत्।दधिदुग्धादिनि
यमान्स्वर्गलोकंलभेन्नरः।भूमौस्त्रस्तरशायीचविष्णोरनुचरोभवेत्।सदामुनिःसदा
योगीमधुमांसस्यवर्ज्जनात्।निर्व्याधिर्निरुजोभवेत्खीसुरामधुविवर्ज्जनात्।एकांतरोपवा
सेनब्रह्मलोकेमहीयते।धारणात्नखलोम्नांचगंगास्नानंदिनेदिने।मौनव्रतीभवेद्यस्तु १२२

तस्याज्ञास्खलिताभवेत्।भुंक्तेसदायस्तुसपृथिव्याःपतिर्भवेत्।नमोनारायणा
यतिध्यानेनानंदफलं।पादाभिवंदनाद्विप्राल्लभेद्गोदानजंफलं।विष्णुपादांबुजस्पर्शा
त्तत्तत्फलयोभवेन्नरः।विष्णुदेवकुलेकुर्याद्रुपलेपनमार्जनं।कल्पस्थायीभवेद्राजास
नरानात्रसंशयः॥प्रदक्षिणायंशतंयस्तुकरोतिस्तुतिपाठकः॥हंसयुक्तविमानेनस
चविष्णुपदंव्रजेत्।त्वचाग्रेदत्तएकंदिव्यंस्थानमाप्नुरसंभवेत्।नक्तभोजीसमर्यंत्र
तीर्थयात्राफलंलभेत्।अयाचितेनवाप्नोतिवापीकूपक्रियाफलं।षष्ठान्नकालतोऽप
नस्वर्गस्थायीनराभवेत्।निश्चयस्नायीनरोयस्तुनरकंन[illegible]ष्यति।नांजनंवर्जयेद्यस्तुस
स्नानंपुष्करंलभेत्।पर्वस्त्रियानरोभुंक्तेकुरुक्षेत्रफलंलभेत्।यामद्वयंजलंत्यागा
न्नरोगःपरिदृश्यते।एवमादिव्रतैःपार्थयस्तुष्टिमायातिकेशवः।तथाचमत्स्यपुराणे
विशेषतः।आषाढादिचतुर्मासिमत्स्यंवर्जयेन्नरः।नाडनोपस्करंदधाम्नयांति
नवनंदरः।इनप्रीतिकरंब्रणांप्रीतिव्रतमिहोच्यते।आषाढादिषुमासेषुवर्जयेन्न

खर्वं ततं। वात्राकं वस्त्रं चातुर्मासं मधुसर्पिर्घृतान्वितं। कार्त्तिक्यां तत्तु नैवेद्यं ब्राह्मणाय
निवेदयेत्॥ स वैष्णवं पदं याति विष्णुव्रतमिदं स्मृतं। हेमानि कार्त्तिके दद्यात् गोप्रदानस
मन्वितं। एतत्फलव्रतं नाम सूर्यलोकप्रदं फलं। तदुक्तं। चातुर्मास्यव्रतारंभः शुक्र
गुरुमौढ्यादिष्वपि कार्यः॥ तदाह वृद्धगार्ग्यः। नक्षत्रे श्रावणे मासे चैत्रे शुक्रगुर्वोर्निवातिथयः। ष
ड्वं चिंतयेन्नत्र चातुर्मास्यस्य सन्निधौ। न रुद्ध्यति। अकरणे प्रत्यवायश्च महाभारते
प्रोक्तः। वार्षिकांश्चतुरो मासान् वाहयेत् केनचिन्नरः। व्रतेन नो विदान्नाति कल्मषं वत्स
राद्भवमिति। उपक्रमकालश्च सनत्कुमारेणोक्तः। एकादश्यां उत्कलीयां संक्रांतौ
कर्कटस्य वा। आषाढ्यां वा नरो नक्त्या चातुर्मास्यादि तं व्रतमिति। महाभारते पि वा
र्षिकांश्चतुरो मासान् व्रतं किंचित् समाचरेत्। असंत्यक्त्वोत्तलार्कपितकर्त्तव्यं प्रयत्नतः।
एतद्व्रतोपक्रमे समाघोषमंत्राः सनत्कुमारेणोक्ताः। इदं व्रतं मया देव गृहीतं पुर
तस्तव। निर्विघ्नं सिद्धिमायातु प्रसन्ने त्वयि केशव। गृहीतेऽस्मिन् व्रते देव यद्यपूर्णे १२३

वि प्रसादाज्जनार्दनः। इति। समाप्तिकालश्च महाभारते
याम्यदौ ततो न वत्सं पूर्णं चातुर्मास्यव्रतं नरः। कार्त्तिके शुक्लपक्षे तु द्वादश्यां तत्स
प्रोक्तः। चतुर्स्थित्वैवं पूर्णे ॥ छ॥ अथ येषु मासतिथिवारादिषु व्रतबंधा
मापयेत्॥ इति चातुर्मास्यव्रतनिर्णयः॥ माघमासि महाधनो धनपतिः प्रज्ञाधनः पा
धीयते स कालश्चोच्यते तदुक्तं सुरेश्वरेण। नैवैत्रेव वेदान्वितः। विशाखे सुभगः सुखी पटुमति
र्ज्येष्ठे मेधावी नवतिव्रतोपनयने चैत्रेव वेदान्वितः। विशाखे सुभगः सुखी पटुमतिस्तथा
ज्येष्ठे बलिष्ठो बुधः आषाढे पिपितामहो विपश्चित् विजयी ख्यातो महापंडित इति। तथा
ज्येष्ठबलिष्ठो बुधः आषाढे पि पितामहो विपश्चिद्विजयी ख्यातो महापंडित इति। तथा
चापस्तंबेन वर्णविशेषत उक्तः। यथा वसंते ब्राह्मणमुपनयेत् ग्रीष्मे राजन्यं शरदि वै
श्यमिति। अत्र ब्राह्मणादीनां वसंतादिऋतुत्रयं एव उपनयने श्रेष्ठं। तदसंभवे
माघादि आषाढांत मासेषु अनिषिद्धेषु कार्यं। तत्र माघादिमासाः सर्ववर्णसाधारणा
इति गार्ग्येणोक्तं। माघादिषु शुक्लादिषु पंचमासाः साधारणा वा सकलद्विजानां
इति विप्रस्य क्षत्रियस्यापि मौंजीस्यादुत्तरायणे दक्षि
इति वृद्धवशिष्ठेनत्वविशेष उक्तः।

णोंतुविशांकुर्यान्नातथ्ययेनसंक्रमइति। यत्तुबृहज्जार्य्यैवचनं। त्रनथ्यमपेप्रक्कवी
तयस्तुनेमित्तिकोन्नवेत्। सप्तमीमासस्तुकेतुतृतीयाचाद्वयाज्ञथा। बुधशुक्रेंडवा
राश्चशास्त्रातिव्रतबंधनइति। ततप्रायश्चित्तार्थेनियनविषयंयतः। सएववाद। प्राथम
यतिथयस्त्राश्राःस्तप्रतिपदादयः। प्रायश्चित्तनिमित्तेचमेषलाबंधनेमृता। इति।
अथतिथयः। तृतीयैकादशीचाद्यापंचमीद्वादशीतथा। द्वितीयाचैवमेधवीन
वेदश्चबिलाधिताः। रिक्तायामपिदानिस्यान्नपोसमास्यांतथैवचाप्रतिपद्यपिचाष्टम्यांक
लवृद्धिविनाशकृदिति। तथाचास्तम्यामष्टम्यांप्रतिपदिरिक्तात्रयोदश्यां। आयुर्विद्याव्र
तबंधेपंचदश्यांचानवषष्ठ्यांतथाष्टम्यांपंचदश्यांचपर्वणि। रिक्तायुतकर्त्तव्यस्यदस्य
प्रिवसेतथेऽति। अथनक्षत्रवारो। दम्पत्रयादश्चरिपुत्रयचशाकेंद्रपुष्पाश्विनिरवनी
षु। वारेषुशुक्राऽर्कबृहस्पतीनांद्विजातयबंधनविद्धमौंजिबंधः॥ इति॥ इतिव्रतबंधनि
र्णयः॥ अथविवाहोऽपयुक्तामासाःउच्यंते। तद्वक्तंज्योतिःसागरे। माघफाल्गुनवैशाख १२५

श्रीः

सामासाचातुर्वर्ण्यस्यनिश्चयः॥ नायेमासितथाऽप्येष्टदो
ज्यष्टाषाढमृगाख्याः॥ षाढात्प्रज्ञिशामासा। अष्टंपदेसुतंतिष्ठुक्तमसितस्याघं ५२
रंपरिणी। ज्येष्ठपुत्रदुहित्रस्तुयत्नेनपरिवर्जयेत्तुतथा। इतिदुर्गाख्येणचेत्रादिविश्रो
त्रिभागंतथा। रिक्तांघ्रातिथिंवर्जयेत्तयासंधिविशेषाःस्मृताः। कुर्वीतविदितंयुरकमचेतिग
प्रत्यक्षः। मीनेधनुषिसिंहेचस्थितेसस्तुरंगमोद्धारमन्तंनकुर्वीतविवाहमिति। शेरोधि
ग्रीष्मेपिसर्वस्तुविवाहःस्यात्। शोशारामासोपरिहार्यः। रत्नावल्याम्। तेसंबंधेचैत्रचान्निराघमा
शिरस्तुसंबंधिनां। चैत्रश्रीशिरस्तुचैत्र्यादोसंबंधपौषं। चैत्रेतसंबंधेचैत्र। पौषचमडुसे
षाढमासंचवर्जयित्वयथः। रत्नमालायां। नाषाढप्रभृतिचतुष्टयेविवाहोनपौषचमडुस
डकविधेइतिनद्वेषुवाक्येषुविरोधहस्पतेर्ज्योतिःसागरवाक्ये। आषाढस्थगांकयाऽइय
षाढस्यस्त्रीकारात्। गांगेयेनचैत्राषाढव्यतिरिक्तानांसर्वमासानांविवाहिकचाभिमना
तूरत्नमालायामाषाढप्रभृतिचतुष्टयवर्जनाद्रासच्चादेशाचारस्तेदनविरोधः। परिह
रणीयः। तथाहिकाश्मीरानाऽपदेविवाहादहस्पंतेशुक्रारम्भकात्तिकिएवमच्यत्रापिद

शाखा राद्दृष्टयः॥ अथ विवाहे तिथिषु विशेष उच्यते॥ प्रतिपद्दुःखजननी द्वितीया प्री-
तिवर्द्धनी॥ सौभाग्यदा तृतीया स्याच्चतुर्थी चास्वनाशनी॥ पंचमी सुखविज्ञा निषष्ठी विघ्न-
करा मता॥ विधवाशीलसुखाज्ञा स्यात् सप्तम्याः सफलाष्टमी॥ नवमी केशान्यदा श्रानं-
दो द्वादशी दिने॥ सुखदैकादशी ज्ञेया सफला च दशी स्मृता॥ मानपुत्रौ त्रयोदश्यां चतु-
र्दश्यां तु दोषदः॥ फलं बहुविधं नित्यं पंचदश्यां विशेषतः॥ नवे दृष्टे क्व प्रतिपदुदयंती॥
निषिध्यते॥ अत्रापि तल्लपक्षस्य दशमी च विवाहिकं॥ वर्द्धयनेव दशम्यक्षयं वैवाहिक-
मिति॥ अथ वाराः॥ गुरुशुक्रेंदुपुत्राणां दिनेषु परिणीयते या कन्या सा भवेन्नित्यं भर्तुश्चि-
तानुवर्तिनी॥ अर्कार्किभौमवाराणां दिनेषु कलहप्रिया॥ सापत्न्यं समवाप्नोति दुःखारकरवा-
सरे इति॥ अत्र दिन इति विशेषोपादानात् रात्रौ विवाहे न दोष इति गम्यते॥ तथैव ज्यो-
र्थांतरेपि॥ न वारदोषाः प्रभवंति रात्राविति॥ अत्र वर्जितेष्वपि तिथिवारेषु सिद्धियोगेस-
ति विवाहः कार्यः॥ तदुक्तं॥ नक्षत्रदिनमासस्य यदा रिक्तातिथिर्भवेत् तस्मिन्विवाहिता कं- १२५

न्या पतिसंततिवर्द्धनीति॥ गुरौ सिंहे मकरस्थे चक्रेष्वपि मासेषु विवाहो न कार्यः॥ तदुक्तं॥
ज्योतिःसागरे॥ सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत्॥ अन्यत्र सिंहभागे तु विवाहादि विधी-
यत इति॥ अत्रैव विशेषो लघ्वेनोक्तः॥ नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे गंडक्याः
पश्चिमपारे मकरस्थाने दोषहृदिति॥ यत्तु मिहिरवचनं सर्वकालिकमिच्छंति विवाहं गो-
न्मादय इति तन्नराशुराधर्मविवाहविषयं॥ तदुक्तं गृह्यपरिशिष्टे॥ धर्म्येष्वेव विवाहेषु कालप-
रीक्षणं नाधर्म्येष्विति॥ अत्र प्रासंगिकं किंचिल्लिख्यते॥ विवाहे विहिते तंत्रे होमकाल उपस्थि-
ते कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः॥ स्नापयित्वा तु तां कन्यां अर्चयित्वा यथावि-
धिः॥ युंजानमाहुतिं हुत्वा ततः कर्म प्रवर्तयेत्॥ स्मृतिचंद्रिकायां॥ विवाहहोमे प्रक्रांते यदि क-
न्या रजस्वला॥ त्रिरात्रं दंपती स्यातां पृथक्शय्याशनासनौ॥ चतुर्थेहनि संस्नातां तस्मिन्न-
ग्नौ यथाविधिः॥ विवाहहोमं कुर्यान्नां इत्यादि स्मृतिसंग्रह इति॥ स्मृत्यर्थसारविशेषस्तत्रमाः॥
विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ॥ अलंकृता वधूश्चैव सहशय्याशनासनाविति॥

विवाहविषयेपि कारणविशेषमाह ॥ एकोदरप्रसूतानामेकस्मिन्नेव वत्सरे । विवाहो नैव क
र्त्तव्यो गार्ग्यस्य वचनं यथेति । अत्रैकोदरप्रसूतानां पुंसामेव न कन्याविषये । तत्रैव विशेषा
न्तिधनात् । यथा । उद्वाहस्तु त्रीन् पिताविदध्यात्पुत्र्यं न रस्योद्वहनं कदाचित् । यावच्च
षष्ठ्दिनमंगलस्य समापनं तावदसौ विदध्यादिति । अन्योपि विशेषस्तत्रैवोक्तः । न पुंवि
वाहोर्ध्वमृतुत्रयेऽपि विवाहकार्यं दुहितुः प्रकल्प्यं । न मुंडनं चापि हि मुंडनं च स्यान्मुंडना
न्मुंडनमब्दगतिः । मुंडनं विवाहादि विवाहादूर्द्ध्वमृतुत्रयान्मौंजी नारउपनयनादिकं न कार्यमि
त्यर्थः ॥ अत्र प्रासंगिकं किंचिल्लिख्यते । विवाहानंतरं वर्षपर्यंतं व्रतबंधनं नरंभणमासपर्यंतं चो
लानंतरं त्रिमासपर्यंतं तिलतर्पणं पिंडसहितं श्राद्धं च न कुर्यात् । तदुक्तं स्मृत्यर्थसारे । वि
वाहे चोपनयने चौले सति यथाक्रमं । वर्षमर्द्धं तदर्द्धं च नेच्छेत्तिलतर्पणं । दद्यात्सत्यां च त
न्मासि नेच्छेत्तिलतर्पणं । तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा । पिंडान्तु सपिंडानो दद्यात्
प्रेतपिंडं विना क्वचित् । पित्र्ययज्ञे च यत्ने च गयायां दक्षरावते । गयासामार्ष्टका हस्य केचिदं १२६

दुःपुराणगाः ॥ ॥ अथ द्विरागमकालोऽभिधीयते । तदाह संस्तरः । माघे फाल्गुन वैशाखे शुक्ल
पक्षे शुभे दिने । गुर्वादित्यविशुद्धे स्यात् नित्यं पत्नीद्विरागमः इति । बादरायणोऽपि । मृदुःश्रोत
नगोचारविमुक्तवसनान्स्वगते नार्थवो । सूर्येकीटघटांगगेषु न दिने पक्षे च लग्नोत्तरे । द्विःचापिक
तिचीनगे बुधसितेनो लालाटके दृश्यते । वानीतार्गुणशालिनी नववधूर्नित्या सम्विवर्द्धते ॥
पूर्वतोऽप्यहितस्तुके प्रययाहृद्दक्षिणे नारं । पश्चादपक्ष दितेवं यायात्पूर्वे वीरसदिशामिति ॥
गुरुचाष्टानुराधाश्विनीशाके पौष्करवार्क्कतत्रालिंगतरं करपाणोदये नागवेडीवन्द्या
स्तु जिनां दिने नववधू संभःप्रवेशास्तु जड इति ॥ इति श्रीसूर्यसेनमहीपविरचिते निर्णया
मृते द्विरागमकालनिर्णयः ॥ ७ ॥ अथ श्राद्धप्रकरणमारभ्यते । तत्र श्राद्धस्वरूपं मरीचिनाह ।
प्रेतान्पितॄनुद्दिश्य भोज्यं यत्प्रियमात्मनः ॥ श्रद्धया दीयते यत्तु तच्छ्राद्धं परिकीर्तितं । तच्च द्विवि
धं । एकोद्दिष्टं पार्वणं चेति । तत्रैकमुद्दिश्य यच्छ्राद्धं एकोद्दिष्टमुदीरितं । त्रीनुद्दिश्य तु यच्छ्राद्धं
पार्वणं तु नयाविदुरिति । तत्पुनर्नित्यनैमित्तिककाम्यभेदेन त्रिविधं । नित्यं तत्र प्रत्या

द्दिकादि नैमित्तिकं प्रेतश्राद्धसपिंडीकरणादिकाम्यं श्राद्धं मलमास्योगादिषु क्रियमाणं।त
दाह कात्यायनः।मृताहे दर्शदृद्धश्राद्धं यत्र मलालये।तन्नित्यमुदितं सद्भिर्नित्यवच्छ्रिनि
श्चविधिर्न इति।तथा नैमित्तिकश्राद्धं गालवेनोक्तं।कश्चिन्निच्यं नैमित्तिकं काम्यं वृद्धि
श्राद्धमतः परं।पार्वणं चेति विज्ञेयं श्राद्धं पंचविधं बुधैरिति।पंचविधमुक्तं।कश्चिद्द्वा
विधं च मुक्तं।तत्र विचार्यमाणे सर्वेषां नैदानामुक्तेष्वत्रिष्वेवांतर्भावइति त्रिविधमेव
मुक्तं।अथ श्राद्धौ कालाः उच्यंते।तदाह याज्ञवल्क्यः।अमावास्याष्टका वृद्धिः कृष्णपक्षो
यनद्वयं।द्रव्यं ब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः।व्यतीपातो गजच्छाया ग्रहणं सूर्ययोः। वैद
श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः।इति।अत्र मार्गशीर्षपोषमाघफाल्गुनमा
सपदेषुकृष्णपक्षाष्टम्यो ष्टकाः।तत्र पूर्वसप्तम्यां पूर्वेद्युः।तत्परनवम्यामन्वष्टका।तदु
क्तं कालादर्शे।मार्गशीर्षेच पौषे च माघे प्रोष्ठे च फाल्गुने।कृष्णपक्षेषु पूर्वेद्युरन्वष्ट
क्यां तथाष्टकामिति।विष्णुस्मृतावपि।अमावास्यास्तिस्रोष्टकास्तिस्रोन्वष्टकाः प्रोष्ठप १२७

देहेमंतशिशिरयोः अपरपक्षेषु त्रयोदशी।वृद्धिस्त्रियोविवर्जितिः।अस्यार्थः।प्रोष्ठपदे
हेमंतशिशिरयोः अपरपक्षेषु त्रयोदशी।वृद्धिस्त्रियोविवर्जितिः।अस्यार्थः।प्रोष्ठपदेवहेमंत वेच्छा।केवगण्यते।माघफाल्गु
नस्याष्टमाष्टकाष्टका।मार्गशीर्षपौषयोः कृष्णाष्टम्यो हेमंत वेच्छा।केवगण्यते।माघफाल्गु
नयोरपि कृष्णाष्टम्यो शिशिरवाच्याः वाकेरिति।अष्टका एव मन्वष्टकाः।एवमन्वष्टकावा
याति स्त्राः पूर्वेद्युश्चवेदितव्याः।अत्र मासप्रयुक्तासु पंचस्वष्टमीषु सतीषु त्र्युक्तया द्वयोर
कवमनिधाय त्रित्वसंख्या या अनिर्धारणे किं कारणमिति चेत्तु सत्यं।देवता विशेषद्वयादि
शेषवत्रित्वचात्रित्वसंख्यानिधानमुपपद्यते।तदुक्तं वायुपुराणे।पित्र्यानादाय हृल्लं
स्युरष्टको क्षित्पावचालपहेवरिष्टादिभ्र्वश्चिंइति ग्राह्यते।प्राजापत्यद्वितीयास्या
त्रितीयावैश्वदेविकी।आद्या पूपैः सदा कार्या मांसैरन्या भवेत्सदा।शाकैः कार्या तृतीया
स्यादेषद्रव्यगतो विधिरिति।अत्रापि हेमंताष्टम्योरिंद्रो देवता।अष्टपाद्यं शिशिराष्टम्याः
प्रजापतिर्देवताः।मांसं द्रव्यं।नाडवाष्टम्यां विश्वेदेवा देवताः शाकोद्रव्यंइति।त्रित्वसंख्योपप
त्तिः।आश्वलायनस्तु हेमंतशिशिरयोश्चतुर्णामपरपक्षेषु चतस्रोष्टकाः इत्याह हेमंतशिशि

रयोः स्वर्गमपक्षाणामष्टौ अष्टका इति। गजच्छायायां यद्दत्तं पितृदेवत्ये दत्तं सत्यैव करोति

नः। त्रयोदशी गजच्छाया आद्धं तु एव रवाप्यते इति। अन्यत्सुगमं इति। प्रसंगादष्टकाश्रा

द्धानि निरूप्य प्रकृतमनुसंधीयते। यदुक्तं। नित्यश्राद्धं मृताहो दरियादि। तत्र मृताहस्याप्र

र्वोद्दिष्टत्वेन पूर्वं निर्णयत्वेपि तन्निर्णयस्य प्रत्याब्दिकेप्येवममावास्यातुल्यत्वादमा

वास्याऽनंतरमेव तन्निर्णयो वक्ष्यते। अहरहःश्राद्धं तु बहुरूपं तच्च विष्णुना प्रोक्तं।

यथा। अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितं। वैश्वदेवविहीनं तु दशक्तावुदके

नतीइति। अमावास्याश्राद्धं च नित्यं। अकरणे प्रत्यवायस्मरणात्। तदाह व्याघ्रः। न नि

र्वपति यः श्राद्धं प्रमीतपितृको द्विजः। इंदुक्षये मासि मासि प्रायश्चित्ती यते नरः इति। सा

चामावास्या शुद्धा विद्धा चेति द्विविधा। तत्र शुद्धा असंदिग्धा। विद्धा पुनस्त्रिधा। भूतविद्धै

व प्रतिपद्विद्धैव उभयविद्धा चेति। तत्रोभयविद्धा पुनश्चतुर्विधा पूर्वदिन एवापराह्णव्यापि

नी। परदिन एवापराह्णव्यापिनी। उभयत्रापराह्णव्यापिनी। नोभयत्रापराह्णव्यापिनी चे १२८

ति। अत्रोभयत्रापराह्णव्यापिनी चेति। अत्रोभयत्रापराह्णव्यापिनी पुनस्त्रिविधा।

तिथिक्षयोपेता तिथिवृद्ध्युपेता तिथिसाम्योपेता चेति। एवं विद्धाऽमावास्याऽष्टविधा।

तत्र भूतविद्धामावास्या चंद्रदर्शनसंभवा। सिनीवाली कथ्यते। प्रतिपद्विद्धा तु चंद्रादर्शन

संभवात्कुहूरित्युच्यते। तदुक्तं। दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूः स्मृतेति। एष्व

ष्टभेदेषु भूतविद्धा प्रतिपद्विद्धा द्वयविद्धा वापराह्णव्यापिनी पितृकर्मणि ग्राह्या। तथा च श्रु

तिः। पूर्वाह्णो वै देवानां मध्यंदिनो मनुष्याणामपराह्णः पितृणामिति। स्मृतावपि। पूर्वाह्णे दै

विकं कर्म अपराह्णे तु पैतृकं। एकोद्दिष्टं तु मध्याह्ने प्रातर्वृद्धिनिमित्तकमिति।

हारीतोऽपि। अपराह्णः पितृणां तु यापराह्णानुयायिनी। सा ग्राह्या पितृकार्ये तु न पूर्वा

ह्णानुयायिनीति। अपराह्णस्य गजच्छायात्मकत्वादपि पितृकर्मणि प्राशस्त्यं लघुहारीतो

क्तं। वनस्पतिगते सोमे छाया या पूर्वतोमुखी। गजच्छायापि सा तत्र पितृणां दत्तमक्षयमि

ति। चंद्रस्त्वमावास्यायामपराह्णात्मके चतुर्थे त्रिमुहूर्ते वनस्पतिगतो भवति। तथा च श्रुतिः

त्रिमुहूर्त्तं वसेदर्के त्रिमुहूर्त्तं जले वसेत्॥ त्रिमुहूर्त्तं वसेद्गोष्ठे त्रिमुहूर्त्तं वनस्पतौ॥ अ-
र्धं तारपि द्वियुगाद्यान्न छायादर्शश्चाद्यपराह्णिकी॥ गजच्छायेति सा प्रोक्ता पितॄणां
तृप्तिकारिणीति॥ अतश्च पितृकर्मण्यपराह्णस्य प्राशस्त्यात् भूतविद्धा प्रतिपद्विद्धा वा अपरा-
ह्णव्यापिन्येव ग्राह्या न तु भूतविद्धा अमावास्या मोहादज्ञानतोपि वा॥ श्राद्धकर्मणि ये
कुर्युः तेषामायुर्मदीयत इति॥ कात्यायनिवचनेन भूतविद्धाया निषेधात्॥ कथं तत्र
श्राद्धमिति चेत्॥ सत्यं॥ इदं वचनं भूतप्रतिपद्विद्धामावास्यायामपराह्णव्यापित्वात् केव-
लविद्धाया श्राद्धनिषेधपरमित्यविरोधः॥ प्रतिपन्मिश्रितायामपराह्णव्यापित्वाभाव-
भूतविद्धाविधानाच्च॥ तदुक्तं जाबालिना॥ प्रतिपद्यमावास्या नामपराह्णगता न वेत्तु
भूतविद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदा इति॥ पूर्वाह्णव्यापिन्येव नापराह्णव्यापिनी॥ ए-
षपि वचनेषु भूतविद्धाया अपराह्णव्यापित्वमनिषिद्धं॥ उभयत्रापराह्णव्यापित्वे ना-
वश्यमपरत्र कुतपकालिकी तिथिर्ग्राह्येति यत्तु मध्याह्नात् परतो यत्र चतुर्दश्यपेक्षया वर्त्तेतेति १२९

नीवाली च सा इष्ट्यापि इष्टकार्येषु निःफले इति॥ बौधायनवचनं॥ तत्रात्र धर्मविशेषः स्या-
क्रामधर्मागामध्यमक्रः ततः सायंकाल इत्यर्थः॥ अन्यत्रापराह्णव्यापिन्यां तु तिथिद्वये
आहिताग्निभिः पूर्वा सिनीवाली ग्राह्या॥ अनाहिताग्निभिः स्त्रीभिः शूद्रैश्चापरा कुहूर्ग्राह्या॥
तिथिद्वये साम्ये च सर्वैरपि कुहूरेव कार्या॥ तदुक्तं जाबालिना॥ अपराह्णद्वयव्यापि यदि
दर्शस्तिथिद्वये॥ आहिताग्नेः सिनीवाली द्विजैर्ग्राह्या निरग्न्यादेः कुहूर्मतेति॥ आदिशब्दा-
त्स्त्रीशूद्राणामुपसंग्रहः॥ कात्यायनेनापि॥ सिनीवाली द्विजैर्ग्राह्या साग्निकैः पितृकर्मणि॥
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैरिति॥ प्रचेतसाप्युक्तं॥ सिनीवाली कुहूश्चैव
स्क्रयके पितृकर्मणि स्यातां तयदि मध्यसन्द्रा॥ आद्यं तत्र कथं न वदिति॥ तिथिद्वये सिनीवाली
तिथिद्वये कुहूर्मता॥ साम्येपि च कुहूः इष्टा वेदवेदांगवेदिभिरिति॥ अत्र मध्यसन्द्रा दितिम-
ध्यमन्द्रा इमपराह्णस्यातामित्यर्थः॥ अस्मिन्नपि वाक्ये तिथिद्वये सिनीपूर्वोक्ते वसाग्नि-
कानग्निकादिव्यवस्था कल्पनीया॥ अन्यथा जाबालिकात्यायनादि इत्यादिवाक्यविरोधः॥

स्मृतौ। नोभयत्रापराह्णव्यापिनी उभयत्रैव कुतपकालव्यापिन्येव ग्राह्या। तदुक्तं हारीते-
न। भूतविद्धा ह्यमावास्या प्रतिपन्मिश्रितापि वा। पित्र्यकर्मणि विद्वद्भिर्ग्राह्या कुतपकालि-
की॥ तत्र कुतपशब्देनाष्टममुहूर्तमात्रमुच्यते। किंतु कुतपरोहिणं विरिंचाख्ययोर्मु-
हूर्तत्र्यं ते। तदुक्तं आपस्तंबेन। कुतपाद्यमुहूर्तत्रीन्यदाचरति भास्करः। स कालः कु-
तपस्तत्र पितृणां दत्तमक्षयमिति। अत्र परामावास्यायामपराह्णस्पर्शाभावात् मुहू-
र्त्तत्रयरूपकुतपकालव्यापित्वाभावेप्यष्टममुहूर्तैककुतपे उपक्रांतस्य श्राद्धस्याप्र-
तिपद्भागेपि समाप्तौ न दोषः। तदुक्तं गालवेन। पूर्वाह्णे चेदमावास्या नापराह्णे भवे-
द्यदि। प्रतिपद्यपि कर्त्तव्यं श्राद्धं श्राद्धविदो विदुरिति। तथा गौतमः। पूर्वाह्णे चेत्प्रतिपदो
भूते सायममादर्शेपि यदि। प्रारब्धं कुतपे श्राद्धं कुर्यादारोहिणं बुधः। विधिज्ञो विधिमा-
स्थाय रोहिणं न तु लंघयेत्। यत्तु। कन्यामकरमीने च तुलायां मिथुने तथा। भूतविद्धे
व सर्वेषां ग्राह्या स्याच्चैवेति यन्न तन्न। इति हारीतवचनं तद्भूतविषयं। तत्सादृशा वालिकेत्तला १२०

यां मकरे मीने कन्यायां मिथुनेऽप्यमा। भूतविद्धा व्रते ग्राह्या शेषेषु प्रतिपद्युतेति। आहिता-
ग्निर्दृष्टचंद्रायामपराह्णव्यापिन्याममावास्यायां पिंडपितृयज्ञं कुर्यात्। तदाहापस्तंबः।
अमावास्यायां यदहश्चंद्रमसं न पश्यंति तदहः पिंडपितृयज्ञं कुर्युरिति। कात्यायनोऽपि।
अमावास्यायामपराह्णे पिंडपितृयज्ञं कुर्युरिति। कांचौ यांचायायनोऽद्रदर्शनहृति।
पिंडपितृयज्ञं च दर्शश्राद्धं क्रमेण कुर्यात्। तदुक्तं मनुना। पिंडपितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्ष-
येऽग्निमान्। पिंडान्वाहार्यकं कुर्यान्मासान्मासानुमासिकमिति। अत्रान्वाहार्यशब्देन पिंडाः। अ-
नुज्ञाप्रणाशोऽनानंतरं आह्रियते तस्मिन्निति कल्पतरुः। पार्वणश्राद्धस्य नेऽत्र तथान्यान्यपि
न्यपि स्मृतिपुराणवाक्यानि भूतविद्धाश्राद्धनिषेधकानि। तानि चतुर्दश्याममावास्यायामप-
राह्णिकाद्यासावेव प्रतिपदि वा पराह्णिकश्चेत् उभयत्रामावास्याया अपराह्णव्यापित्वेति
थिसाम्ये तिथिद्वैधे तु यत्रापराह्णव्यापित्वं च प्रतिपन्मिश्रितायाममावास्यायां श्राद्धवि-
धिप्राणि वदितव्यानि यानि भूतविद्धायां श्राद्धविधायकानि तानि भूतत एवाऽपराह्ण

व्यापित्वेन मृतविद्धदर्शे श्राद्धविधिपराणि च। यत्रापराह्णव्यापित्वं च तिथिद्वये साम्येन वि
षये चतुर्दशीमिश्रामावास्याश्राद्धविधिपराणि च वेदितव्यानि। यानि तु कुतपकालव्यापि
कार्यां श्राद्धविधायकानि तान्यत्रापराह्णव्यापित्वाभावविषयाणि वेदितव्यानि। किंचि
दपराह्णानादरेण कुतपकालप्राधान्येनैवामावास्या निर्णीयते। तेषामयमभिप्रायः।
अपराह्णव्यापिन्यां कुतपकालमारभ्य श्राद्धं कर्तव्यमिति। अथैन्यथा। अपराह्णः पितॄणां
नु तु यापराह्णानुयायिनी। इत्यादिवचनोक्तस्मृतिपुराणवाक्यविरोधपरिहारः स्यात्। अतश्चा
क एव निर्णयः साधीयानिति। पौर्णमास्यपि श्राद्धविधावमावास्यावदेव निर्णयः। पौर्ण
मास्यां तु श्राद्धपरत्वेन। अमावास्यायथा पार्वणपिंडपितृयज्ञस्य कर्मणि। पौर्णमासी
तथा पार्वणविशेषोऽग्निकस्यनेति। इति श्रीसूर्यसेनमहेंद्रविरचिते निर्णयामृते द्वि
तीये श्राद्धप्रकरणे अमावास्यानिर्णयः॥छ॥ श्रीमत्पंडितसिद्धलक्ष्मणसुतः श्रीसिद्ध
लक्ष्मीपदद्वंद्वाराधनस्तुप्रसिद्धमहिमा यासिद्धसारस्वतः। आदेशाद्दत्ततेपसूर्यमहसः १२१

श्रीसूर्यसेननृपतेर्विधे कर्मणि कालनिर्णयमसावल्लाडनाथः सुधीः॥छ॥ अथ मृताहनि
र्णयः प्रस्तूयते। तत्र मृताहस्वरूपं स्मृतावुक्तं। मासपक्षतिथिस्पृष्टे यस्मिन्न्यो म्रियतेहनि। प्र
त्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुरिति। क्षयाहतिथिरप्यमावास्यावदपराह्णव्यापिनी ग्रा
ह्या। दिनद्वये मृततिथेरपराह्णव्यापित्वेऽधिकाऽपराह्णव्यापिनी ग्राह्या। उक्तं यात्रापरा
ह्णस्य तावेव पूर्वे सायंकालव्यापिनी ग्राह्या। तत्र वाक्यानि। अपराह्णः पितॄणां तु यापरा
ह्णानुयायिनी। सा ग्राह्या पितृकार्येषु न पूर्वाह्णानुयायिनी। मरीचिरपि। याऽपराह्णव्यापि
नी स्यादाब्दिकस्य यदा तिथिः। महती यत्र तद्दिनं संप्रशंसंति महर्षय इति। याऽपराह्णव्याप्ता
नी स्यादाब्दिकस्य यदा तिथिः। महती यत्र तद्दिनं संप्रशंसंति महर्षय इति। पूर्वविद्धमकुर्वाणो नरकं प्रति
पद्यत इति। तथा च स्मृत्यंतरं। द्विरह्णव्यापिनी चेत्स्यान्मृताहस्य यदा तिथिः। पूर्वविद्धा प्रक
र्तव्या त्रिमुहूर्ता न चेद्भवेत्। इति पूर्वेद्युः सायमिति वाक्यशेषः। ननु अत्र कोऽभ्यवेलायां
कलामात्राय दातिथिः। स व प्रत्याब्दिके ग्राह्या नापराह्णव्यापिनी दा इति कार्ष्णाजिनिवचनेन

श्राद्धमर्धकलामात्रातिथेः श्रीकारात्तु त्रिमुहूर्तान्नवेद्यदीतिवचनविरोध इति चेन्न नाके मुनि
कन्यायेन कलामात्रापि ग्राह्या किंतु त्रिमुहूर्तैव पश्चादस्य वाक्यस्य पूर्वे कः सा
यं त्रिमुहूर्तव्यापिताभावे परिवक्कुतपकालव्यापिनी ग्राह्या न तु दारुणो निशात्रिमुहूर्ता
न च ग्राह्या परिवक्कुतपे हिंसेति न तु सायंकालव्यापिन्याः पूर्वविद्धायाः ग्रहणे कुतपादिमु
हूर्तस्पर्शाभावात् प्रत्यक्कुतपे श्राद्धं कुर्यात् आरोहिणं तु यदि इति श्राद्धस्य कुतपारं
भारोहिणसमाप्तिविधानात् कथं तत्र श्राद्धमिति चेन्न सर्वत्र तिथिस्तदहोरात्रं स्यादयस्या
समियाद्रविः यया संसविता याति पितरस्तामुपासते या दिवा केपराह्नमयतिथिः श्राद्धकर्म
णि संपूर्णत्वाविधानात् कुतप एवारब्धश्राद्धं कार्यमिति ॥ छ ॥ अथ प्रासंगिकाः श्राद्धप्रदेशा
उच्यंते तदुक्तं विष्णुधर्मोत्तरे दक्षिणाप्रवणे देशे तीर्थे चैव गृहेऽपि वा भूसंस्कारादिसंयुक्ते श्रा
द्धं कुर्यात् प्रयत्नत इति यमस्तु विशेषमाह परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः तद्भूमिपि
तृभिः स्वामिश्राद्धकर्म विहन्यत इति ॥ अत्र परकीयप्रदेशाः परस्वीकृतगृहाः तीर्थादिनां वेद्य १३२

द्धस्वामिना किंचिन्निःक्रयद्रव्यं दत्वा परकीयप्रदेशे वा कार्यं तीर्थादीनां सर्वसाधारण
मेवात् तदुक्तं पुराणसमुच्चये अटवीः पर्वताः पुण्या नदीतीराणि यानि च सर्वाण्यस्वामिकान्या
हुर्नहि तत्र परिग्रह इति वनानि गिरयो नद्यस्तीर्थान्यायतनानि च देवखातसगर्त्ताश्च
न स्वामी तत्र विद्यत इति आयतनानि देवतायतनानि ॥ इति श्राद्धप्रदेशाः ॥ छ ॥ अथ श्राद्ध
कर्तुर्नियमा उच्यंते तत्र मरीचिः श्राद्धीयादौ दशम्यां च द्वादश्यां व्रतवासरे एकादश्यां व्य
तीते पातले लं मांसं विवर्जयेत् इति गालिलोऽपि श्वः कर्तास्मीति निश्चित्य दाता विप्रान्निमंत्र
येत् निरामिषं सकृद्भुक्त्वा सर्वक्षौरकं जनः रोस्मृत्यर्थसारेपि दंतधावनतांबूलं स्निग्धस्नानमभो
जनं रत्यौषधिपरान्नानि श्राद्धकृत्सप्त वर्जयेदिति ॥ इति श्राद्धकर्तृनियमाः ॥ तत्रच्छायादश्रा
द्धं पित्रोरेकोद्दिष्टं पार्वणं वा यथाकुलाचारं वा कुर्यात् नज्यंव धर्मयकवाक्यबलाद्दानि
चोक्तं यथाद्यमः सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं नरः मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृते
दिने इति शातातपोऽपि सपिंडीकरणं तत्वा कुर्यात्तु पार्वणवत्सदा प्रतिसंवत्सरं श्राद्धं छ

गलेयो दिनो विधिरिति। एतदेव विज्ञानेश्वरयोगिनोऽपि। श्रीदिपवद्विकल्पइत्युक्तं।
अमावास्यायामपरपक्षे च। मृतानां पार्वणमेव। नैकोद्दिष्टं। तदुक्तं शंखेन। अमायां वा
दयायस्य प्रेतपक्षेऽथवा यदि। पार्वणं तस्य कर्तव्यं नैकोद्दिष्टं कदाचनेऽति। संन्यासिनां तु
पार्वणमेव। तदुक्तं प्रचेतसा। दंडग्रहणमात्रेण नितत्मेतानवद्यदि। अतः सुतेन कर्तव्यं
पार्वणं तस्य सर्वदेति। अनाघ्रगन्त्रिपृष्ट श्राद्धे यवादीनामेकोद्दिष्टमेव कार्यं। तदाह शाता
तपः। अनाघ्रगर्तज्येष्ठोऽपि चातासज्ज्ञितिगघतो। तेतसपिंडनतस्यानिवपार्वणमाचरे
तू। अन्नांनाघ्रगर्त्तेयाशिक्षान्यदाघ्रगर्त्तज्येष्ठश्राद्धः पितृवत्स्वपार्वणं एकोद्दिष्टं वा यथा
चारं कुर्यादिति गम्यते। सुमंतुरपि। यस्य मंत्रप्रदानास्याघश्चाविघांप्रच्छति। गुरुता
वपिकर्वीत तयोर्नैव तु पार्वणं। पिंडनाशपिंडीकरणादिना पार्वणं न कर्वीतेत्यर्थः।
ह्वव विष्टोऽपि। सपिंडीकरणादूर्ध्वं यत्र मंत्रप्रदीयते। भ्रातेनगिन्ये पुत्राय स्वामिने
मातुलाय च। मित्राय गुरवे श्राद्धं एकोद्दिष्टं न पार्वणमिति। पुत्रादिकत्र्नीपावेत्रपत्नी। १२३

स्वयमेव तु कुर्युः सपिंडीकरणं त्वथ प्रत्यब्दं पार्वणमेव कुर्यात्। तदाह लौगाक्षिः। सवर्णा
वेस्वयं पत्न्यः स्वजातीयमन्त्रकं सपिंडीकरणं कुर्युः। अतः पार्वणमेव चेऽति। सुमंतुरपि।
अपुत्रे मंच्छितेकत्रनिजवश्राद्धकर्मणि। तत्र पत्न्यापि कर्वीत सापिंड्यं पार्वणं तथेति।
अपुत्राणां पत्नीव्यतिरिक्तकर्तृत्वे एकोद्दिष्टमेवेति तदुक्तं। अपुत्रा ये मृताः केचित्पुरु
षा वा स्त्रियोऽपि वा। तेषां च पिंडनाशा वा एकोद्दिष्टं न पार्वणमिति। स्त्रीणां तु क्षया
हादिव्यतिरिक्तश्राद्धे पुपत्न्या सदेव श्राद्धं कार्यं। क्षयाहादिषु पृथक् कार्यं। तदाह व्या
घ्रकर्णः। क्षयाहवर्जं पितृकं स्त्रीणां नास्ति पृथक्क्रिया। कश्चिदिच्छति नारीणां अन्वष्टका
पि महर्षयइति। अन्यत्राष्टकादिष्वपि। तदुक्तं। अष्टक्येकं तथा वृद्धिमाहश्राद्धं
मृतेऽहनि। एकोद्दिष्टं तथोक्तं स्त्रीणां नाम्य पृथक् भवेदिति। शातातपोऽपि। नांदीमु
खेऽष्टके श्राद्धे गयायां च मृतेऽहनि। पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेदिति।
कात्यायनोऽपि। अष्टकादिषु वृद्धौ तु गयायां च मृतेऽहनि। मातुः श्राद्धं पृथक्कुर्या

दन्यत्रपतिनांसहेति। मातुरितिस्त्रीणां। सपत्नलक्षणं। अचारोदणमृतासुस्त्रीषुवि
शेषोनिधीयते। तत्र भर्तुर्मरणदिनएवंएकचित्यारोहणेन स्त्रियामरणेसतिप्रत्यूहे
मृताहश्राद्धेकालेकांक्षेकपाकेकांनवति। पिंडोपिद्विपित्रकश्राद्धवद्वयोरुद्दे
शेनैकएवदेयः। नवश्राद्धंपृथक्भवति। तदाहलौगाक्षिः। मृतेहनिसमासेनपिंडनिर्व
पणंपृथक्। नवश्राद्धंतुदंपत्योरन्वारोहणएवतुसमासेनपिंडनिर्वपणं। नवश्राद्धंपृ
थगिष्यते। अत्रमृताहनीतिविशेषोपादानान्निधनदिनभिन्नदिनेपृथगेवश्राद्धंकुर्यान्न
समासेनेतिगम्यते। किंचमृताहनिसमासेनेतिकुर्यादिति। विशेषाभिधानादवसांव
त्सरिकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणाष्टकादिश्राद्धेषुवचनांतरे
णापृथग्विहितपृथक्कर्त्तव्यतायांप्राप्तायांनवश्राद्धंपृथगितिपरिसंख्यायानवश्राद्ध
स्यैवपृथक्त्वविधानान्नवश्राद्धव्यतिरिक्तेषुसांवत्सरिकवत्समासेनैवविधानं। एवमेकं
चित्यारूढानांसर्वासांबह्वीनामपिद्विजाग्रहदर्शनेवत्त्रिपितृकश्राद्धवदेकएवपिंडोदेयः। १३७

यत्तु। स्मृत्यंतरवचनं। एकचित्यांसमारूढौदंपतीनिधनंगतौ। पृथक्श्राद्धंतयोःकुर्यादोद
नंचपृथक्पृथक्। इति। तन्नवश्राद्धविषयं। नवश्राद्धंकेचित्पक्षांतरेक्रियतइत्यंगिर
सोवाक्येनगम्यते। तद्विषयमोदनंचपृथक्पृथगिति। वाक्यंच। नवश्राद्धेत्वयंविशेषःदप
त्यौषितंचयत्नाद्दंपत्योर्भुक्तशेषंसदन्नंभुंजीतकश्चिद्विवित्तइतिप्यदाचेकस्यामेवतिथौद्वयोः
दिनद्वयव्यापिन्यांपूर्वदिनव्यापितिथिभागेपत्युर्मरणेउत्तरदिनव्यापिभागेपत्न्याःएकचि
त्यारोहणेनमरणंतदापिसमासेनैवपिंडादिविधेयंकेवलात्मृततिथेरेकत्वा
त्कर्तुश्चप्राधान्यात्तदर्शशरीरस्थतायाःपत्न्याअपितादेवमरणंसंकल्पेनमृतप्रायत्वात्
भिन्नदिनमरणरूपैकनिमित्तापेक्षयाबहूनांमध्येयदोन्याय्यइतितिथ्येकत्वादिनि
मित्तानामवन्यायचार्तभर्तुर्मरणदिनप्रभृत्येवदिनगणनांत्वचानिलोदकंपिंडदानाशौचा
दिकंकर्त्तव्यं। यानिपुनर्भर्तुर्मरणानंतरंचिरकालव्यवधानेप्यनुगमनेनमृतायाअपिप
त्यारेकस्मिन्मरणसमकालमेवमरणप्रतिपादकानिवाक्यानितान्यर्थवादरूपाणिप्रशंसा

हकानि। नान्यपि तीर्थे वैदिक विषये योजनीयानि। यत्तु मृत्युवचनं। यास मारोहणं कर्या
कर्तुर्थित्यां पतिव्रता। नां मृतादनिसं प्राप्ते पृथक्पिंडं नियोजयेत्। प्रत्यक्षं नवश्राद्धं युगपच्च
समापयेदिति। तद्दृष्टमृततिथिव्यतिरिक्ता निर्णयतिथावन्वारोहणविषयं। इति स्त्री वि
षयविशेषं उक्त्वा संघातमृतानामाह्निकादि विषयविशेषो निधीयते। यदा देववशाद
कस्मिन्दिने मृतानां पितृमातृभ्रात्रादीनां युगपच्छ्राद्धसंनिपातः तदा प्राधान्यक्रमेण पृथ
क्पाकेन कुर्यात्। यदा तु श्राद्धानां बहुत्वात् कृतपाककालेकर्तुमशक्यत्वादेकपा
केनैव पूर्वं पितृब्राह्मणनिमंत्रणं ततो मातृब्राह्मणनिमंत्रणं ततोन्येषां यथा प्राधा
न्येन वा एवं पादप्रक्षालनादिकं कृत्वा युगपत्सर्वश्राद्धानि समापयेत्। तदुक्तं स्मृत्यंतरे।
एककालेगतासूनां बहूनामथवा द्वयोः। तंत्रेण श्रपणं कुर्यात् श्राद्धं त्वेव पृथक्पृथगि
ति। ऋष्यशृंगोपि। भ्रातृवद्यादिसपिंडानां युगपन्मरणं यदा। संबंधक्रमतो ज्ञात्वा तत्
क्रमाच्छ्राद्धमाचरेत्। इति। तत्क्रमादिति संबंधक्रमादिति यत्तु वचनं तच्चापूर्वं मृत १२५

स्यादौ द्वितीयस्य ततः पुनः। तृतीयस्य ततः कुर्यात्संनिपाते त्वयं क्रमः। इति। इदं तु मात
पितृव्यतिरिक्तानां तुल्यसंबंधिनामेकस्मिन्दिने क्रमेण मृतानां मरणक्रमेण श्राद्धक
र्तव्यमित्येवंपरं। ऋष्यशृंगवाक्ये तु अल्पाधिकपदद्वयेन तुल्यकालमृतविषयं मात
पितृविशेषमाह। कात्यायनः। पित्रोः श्राद्धं समं प्राप्ते नवपक्षेपि तेपि वा। पितृपूर्वं त
तः कुर्यादन्यत्रासंनियोगतः। ननु नैकश्राद्धद्वयं कुसमानेहनि कुत्रचिदिति। प्रचेतसाए
कस्मिन्दिने श्राद्धद्वयकरणं निषिद्धं। तत्कथमुच्यते संबंधक्रमेण एको बहूनि श्राद्धानि
कुर्यादिति। सत्यं। दैवतान्नेदनिमित्तान्नेदो वैकस्यानेकश्राद्धविधानात्। तदुक्तं जाबालि
ना। श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने। नैमित्तिकं च कर्तव्यं निमित्तानुक्रमोदयाऽ
ति। यथा श्राद्धं कृत्वा तु पुनः श्राद्धं न कुर्यादेकवासरे। यदि न निमित्तकं न स्यादेको दृष्टं न
विदिति। कात्यायनोपि। बहूनि निमित्तानि नानायेरन्नेकवासरे। निमित्तका नि कार्याणि
निमित्तोत्पत्तिक्रमादिति। इति नियतं निमित्तयोः श्राद्धयोः संनिपाते नियतनिमि

स्यादृष्टानादेव नियतनिमित्तमपि सिध्यतीत्यनियतनिमित्तमेव कुर्यात्। यथा नि
त्यश्राद्धदर्शिकश्राद्धयोः संनिपाते दर्शश्राद्धेनैव श्राद्धविधिसिद्धिः तदुक्तं तन्मासिक
योर्मासिकेनैवोदकुंभसिद्धिः एवं फाल्गुनामावास्यायां मन्वादिनिमित्तश्राद्धेनैव
दार्शिकश्राद्धसिद्धिः तदुक्तं कालादर्शे। नित्यदार्शिकयोः श्वोदकुंभमासिकयोरपि।
दार्शिकस्य युगादश्च दार्शिकालस्य योगतः। दार्शिकस्य च मन्वादेः संपाते श्राद्धकर्म
णः प्रसंगादितरस्यापि सिद्धिरुक्तमस्यादिति। नियतानिमित्तनिमित्तेऽपि देवता
दैन श्राद्धद्वयं कार्यं। तदुक्तं कालादर्शे एवानित्यस्य चोदकुंभस्य दार्शमासिकयोरपि। नि
त्यस्य चाह्निकस्यापि दार्शिकाह्निकयोरपि। युगाद्याह्निकयोश्चापि मन्वाद्याह्निकयोरपि।
प्रत्याह्निके युगाद्यालस्य योगस्तु विदितस्य वा संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् अ
त्र नित्यदार्शिकयोः तथा दर्शग्रहणादिद्वय घाल[?]स्य योगश्राद्धेनैव दार्शिकश्राद्धसि
द्धिः पाह्लवकं न चातुःप्रत्याह्निकस्यास्त्रिदेवतत्वादेकोद्दिष्टत्वाच्च देवताभेद इति। अत्रा १३६

प्यनियतनिमित्तस्यैव प्राबल्यात् पूर्वं तदुक्तं तदानीं मासिकाद्याह्निकाद्यनियतनिमित्तोप
स्थानियतनिमित्ते। नित्यदार्शिकादि श्राद्धं कुर्यात्। तथा चोक्तं कालादर्शे। निमित्तानित्य
तिश्चात्र ह्यवतिष्ठानकारणमिति। पार्वणैकोद्दिष्टयोरेकत्र कार्ये च पार्वणं कुर्यादेकोद्दि
ष्टं कुर्यात्। तदाह जाबालिः। यद्येकत्र भवेयातां एकोद्दिष्टं च पार्वणं। पार्वणं च त्रिनिर्वर्त्यैण
कोद्दिष्टं समाचरेत्। अज्ञानादिनिमित्तेन श्राद्धविघ्ने कृते सति। ऊनैकादश्यामावा
स्यायां वा श्राद्धं कुर्यात्। तदुक्तं मरीचिना। श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि। क
र्यादेनेन त्वविज्ञातपीत्यः नवयनंअनथमृताद[?] श्राद्धस्य वमासिकस्य सांवत्सरिकस्य च तद रि ६
त्वैकादश्यामावास्ययोर्विधानं। नामावास्यादितिथिः श्राद्धस्य सूतकेनाह्निकश्राद्ध
सूतकं तरितसूतकानंतरदिने तत् कुर्यात्। तदाह ऋष्यशृंगः। आह्निके चैव संप्राप्ते आ
शौचं यदि जायते। आशौचे तु व्यतिक्रांते ततः श्राद्धं विधीयते। इति। आशौचानंतरदि
नेऽपि कारणात् संभवेत्। अमावास्यायां कुर्यात्। तदाह गोभिलः। दैवे पत्याह्निके श्राद्धे

अंतरामृतसूतके। आशौचांतेनंतरं कुर्यात्मासेऽद्वयपि वेति। केचिदाशौचानंतरं पु
नः कुर्याद्दिनिथावद्वकार्यमित्याहुः। यथा। नदद्यात्तु प्रदुष्येत केनचित्सूतकादिना। सू
तकानंतरं कुर्यात्पुनस्तद्दहारवचेति। अत्र सूतकानंतरपदं विघ्ननिमित्तोपलक्षणं
यदा पत्नी धनत्रुः श्राद्धकर्त्री श्राद्धदिने रजस्वला नवति। तदा पंचमेदिने इति। तथा चा आ
ह्निकसमुच्चये प्राप्ते यस्य नार्या रजस्वला। पंचमेदिने तच्छ्राद्धं नकुर्यात्तन्मृताहनीति। यस्य
नार्या रजस्वला तस्याश्राद्धं तार्यकर्त्री मृतादहनी युक्तानकुर्यात्तु रजोदर्शनात्तु पंचमे
दिने तु कुर्यादिति अथ। यत्तु आपद्यनग्नाती र्थे च प्रवसेत्पुत्रजन्मनि। आमश्राद्धं प्र
कुर्वीत नार्यायस्य रजस्वलेति यथा। आपदि देशकालानां विस्तवं संप्रदर्शितं।
आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि इति। कात्यायनवाक्यं पदवचनात्पा
त्रादिकर्त्री सुतार्यायां रजस्वलायामामश्राद्धं कुर्याद्दिष्टकोनन्मृताहश्राद्धं मृतिति
थि विषयी तदाह लौगाक्षिः। अवमस्य पिनारीषु विदेशस्थोप्यनग्निकाः। अन्नाभावे १३७

ह्निकं कुर्यात्तु देम्नावामेन नक्रचित्। अन्नेनपक्वान्नेन। तदाह लौगाक्षिः। मरीचिरपि।
अनग्निः प्रवासी च यस्य नार्या रजस्वला। आमश्राद्धं प्रकुर्वीत न कुर्यात्तन्मृताहनीति
कात्यायिनिरपि। अपत्नीको ह्याह्निकं नैवकुर्यात्तदामेन कुर्वीत चित्। अन्नेन तदभार्यानुज्ञ
सेवादरि वासरइत्यादि वाक्यान्ताह्निकं आमश्राद्धनिषेधपरः स्वलांगनाऽपि श्रयमे
वा वाणं वि पक्वान्नेन प्रयाह्निकं श्राद्धं कुर्यात्तु रजस्वला कर्त्री चेत्तासा पंचमे दिने कु
र्यादिति सिद्धं यस्य तु परादेशादिमृतस्य मृतमासा ज्ञायते तदिनं न ज्ञायते तस्य तन्मा
स्य मावास्यायां स्वैकादश्यां वाह्निकं कुर्यात्तेन दाल्भ्य बृहस्पतिः। न ज्ञायते मृताहश्च
प्रोषितसंस्थितस्य तु। मासश्च तु प्रतिविज्ञाततत्तदर्शेदथा ह्निकमिति। मरीचिरपि। आ
हविज्ञसमुत्पन्ने वाप्यविज्ञाते मृताहनि एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः इति। दि
नज्ञाने मासाज्ञाने चाषाढमाघे वा तद्दिनकार्यं। तदुक्तं बृहस्पतिना। यदा मासो न वि
ज्ञातो विज्ञातं दिनमेव तु। तदाषाढकेमासि मासि माघेवा तद्दिनं भवेदिति। यदासृ

मपि ज्ञानं ज्ञायते तदा प्रवासमासदिवसौ ग्राह्यौ। तदाह बृहस्पतिः। दिनमासौ
न विज्ञातौ मरणस्य यदा पुनः। प्रस्थानमासदिवसौ ग्राह्यौ पूर्वोक्तया दिशा॥ पूर्वो
क्तस्याविशेषस्यायमर्थः। यदा प्रस्थानमासदिवसौ ज्ञातौ तदा तावेव ग्राह्यौ। यदि
मासो ज्ञातो दिनं न ज्ञातं तदा तन्मासैकदर्शो तद्दिनं। यदा दिनं ज्ञातं मासो न ज्ञात
स्तदाषाढमाघयोरिति। यदा मरणप्रस्थानमासदिनाज्ञानं तदा मृतवर्षश्रवण
दिनं। तत्राप्यसंभवे वात्र श्रवणमासामावास्यायां वा कुर्यात्। तदुक्तं प्रचेतसा। अ
परिज्ञाते अमावास्यायां श्रवणदिने च। तौ प्रकुर्यात्। तदुक्तं पिंडमात्रं प्रदातव्यंम
न्तावे श्राद्धविप्रयोः। श्राद्धादिनि च संप्राप्ते न वान्निरक्षानोऽपि वेति। पात्राभावे तु वि
शेषस्तु ययौ तारप्रोक्तः। पात्राभावे परं ब्रह्मा पित्र्ययज्ञविधिर्नरः। निर्दिश्य पाद्यमुद्धृत्य
यत्र पात्रं ततो नयेदिति। पित्र्ययज्ञविधिः श्राद्धविधिः। अयत्रापि। सर्वाभावे क्षिपेदग्नौ
गवे दद्यात्तथाप्सु वा। नतु प्राश्नस्थलोपाक्षिपेट्टकस्य विशेषत इति। सर्वस्याभा १३०

निषेधस्य पात्रस्याभावाद्यथा। अतिदरिद्रस्य तर्पणमात्रपर्याप्ततिलाद्यभावोद्ध
द्ववशिष्टविशेषवक्तः। अग्निना दाह्यकाष्ठं श्राद्धकालसमागमे तेतस्मिन्नोपवस
दक्षिणापेक्षाश्राद्धसंहितामिति। कच्छटेन संगृहीतो विष्णुपुराणोक्तो सर्वाभावे वनं गत्वा
कक्षामूलप्रदर्शकः। सूर्यादिलोकपालानामिदमुच्चैः पठिष्यति। नमेऽस्ति वित्तं न धनं च नान्य वित्तंन
च्छ्राद्धोपयोगि स्वपितृन्नतोऽस्मि। तृप्यंतु भक्त्या पितरो मयैतौ भुजौ ततौ वर्त्मनि मारुतस्य
इत्येतत्पितृगीतं भावाभावप्रयोजकीयः करोति तेन श्राद्धं कृतं भवति पार्थिवेति। तद्
याद्यतिथौ ग्रहणे सति। तोऽत्र नाशाद्द्विजाप्यामान्नेन हेम्ना वा प्रत्याब्दिकं कुर्यात्। तोऽत्र सं
नव उपकान्नेन न कुर्यात्। तदाह गोभिलः। दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितं। अ
नेनासंभवे हेम्ना कुर्यादामेन वाशु तदिति। अत्र दर्शादिशब्दः पूर्णिमाचंद्रग्रहणादी
नामुपलक्षकः। अतश्च पुत्रव्यतिरिक्तेनाप्यधिकारिणा आवश्यकसपिंडश्राद्धं चंद्रग्र
हणे तथामेन हेम्ना वा कार्यं न्यायस्य तुल्यत्वात्। एवं मासिकविहीये मासिकसांवत्स

रिकव्यतिरिक्तं तु श्राद्धं विघ्नेऽसि विद्विजो ह्यामान्नेनैव कुर्यात् तौ तदुक्तं श्राद्धविघ्ने द्विजा
तीनां आमश्राद्धं प्रकीर्तितं। अमावास्यादि नियतं माससंवत्सरादृते इति। ग्रहणव्य
तिरिक्तविषयं ग्रहणविषये माससंवत्सरिकयोरपि। गोभिलवाक्ये नामश्राद्धविधा
नात्। अथ प्रसंगादन्योप्यामश्राद्धकाल उच्यते। तदाह कात्यायनः। आपद्यनग्नौ ती
र्थे च प्रवासे पुत्रजन्मनि। हेमश्राद्धं प्रकुर्वीत नार्यो रजसि संक्रमे इति। बौधायनोपि।
अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संक्रमे च द्विजः शूद्रः समाचरेदिति।
ब्राह्मण क्षत्रियविषयं। संक्रमादिष्वेव हेमश्राद्धाधिकारः शूद्रस्य तु सदैव। तथा च सुमं
तुः पाकाभावे विधिकारस्मान्नु विप्रादीनां नराधिप। अपत्नीनां महावादो विदेशागमनादि
षु। सदा चैव तु शूद्राणां आमश्राद्धं विदुर्बुधा इति। क्रम दग्निरपि। यावत्स्यान्नाग्निसंयु
क्त त्वच्छिन्नाग्निरथापि वा। आमश्राद्धं तथा कुर्याद्धोमौकरणं न वै दिति। प्रचेता अपि।
शूद्रः श्वपचः श्वेव जात कर्माणि याप्यथा। आमश्राद्धं तथा कुर्याद्धोमौकरणं नवैदिति। १३९

विधिना पार्वणेन चेति। अपचः स्वयं पचती अपत्नीकश्च यथः आमश्राद्धे पक्वान्नस्थाने आ
मान्नमात्रं विशेषः। विधिः सर्वोपि स एवोक्तः कात्यायिनो। सिद्धान्नेन तु विधिवत्स्यादामश्रा
द्धे ह्ययं विधिः। आवाहनादि सर्वं स्यात्तु पिंडदानं च नारतो दद्याद्धि द्विजातीनां स्वतं वा स्वद
मेव वा। तेनाग्नौ करणं कुर्यात् पिंडांस्तेनैव निर्वपेदिति। षट्त्रिंशन्मते पिंडदानविशेष
उक्तः। आमश्राद्धं यदा कुर्यात् पिंडदानं कथं नवेत्। इष्टपाकान्न मुद्धृत्य सक्तुभिः पाय
सेन च इति। अत्रावेदमार्यथा तानंत्वीकारः। आमान्नेन तु व्यासेन चविशेषउक्तः। आ
मं दत्वा तु कोन यदद्यादामचतुर्गुणमित्ति चतुर्गुणं च पुरुषादारापेक्षया। द्विजान्न
दानविषयं चैतत्कविषयावेदितव्याः। किं चिन्मंत्रेषु कुर्वमपि। मरीचिराह। आवा
हनं स्वधाकारमंत्राकुर्यात् विसर्जनं। अन्यकर्मन्यदस्तु रामश्राद्धविधिः स्मृत इति।
आमश्राद्धविधिस्तु गालवेनोक्तः। आमश्राद्धं च पूर्वाह्णे सिद्धान्नेन तु मध्यतः। पार्वणं
चापराह्णे तु वृद्धिश्राद्धं तथाह्निकमिति। अत्र सिद्धान्नेन तु मध्यत इति। एकोद्दिष्टप्र

नीयते। पार्वणस्यापराह्णे विधानात्। एकोद्दिष्टं च मध्याह्न इति। वचनबलाच्चाग्नि
कमिति। अन्यथा धननिमित्तं एतच्चामश्राद्धं शूद्रस्य ब्राह्मणभोजननिषेधात्। निषे
धस्तु सुमन्तुनोक्तः। न पक्वं भोजयेद्विप्रान् सच्छूद्रोपि कदाचन। भोजनं प्रत्यवायी नृ॰
स्यात्तच्च तस्य फलं न वदेदिति। अत आनित्यं शूद्रकर्तृकामश्राद्धं अपराह्णे कार्यं। न तु कौ
मध्याह्नात्परतो सखुकुतः समुदाहृतः। आममात्रेण तत्रैव पितॄणां दत्तमक्षयमि
ति। आमश्राद्धं च पूर्वाह्णे इत्येतद्द्विजकर्तृकमिति। नित्यामश्राद्धविषयो अतश्चैवाक्य
योर्न विरोधः। इत्यामश्राद्धविधिः॥ ॥ अथ जीवत्पितृकस्य श्राद्धकालः उच्यते। सपित्रः
पितृत्रयेष्वधिकारो न विद्यते। न जीवन्तमतिक्रम्य केचिद्दद्यादिति श्रुतिरिति। कात्या
यनेन। जीवत्पितृकस्य श्राद्धाधिकारनिषिद्धे पित्र्ये परिशिष्टे तदपवाद उक्तः। उद्वा
हे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति। जीव
त्पितृकस्य षडेते श्राद्धकाला इत्यर्थः। पित्र्येष्टिश्चैत्रमस्योस्तु विहिता पिंडपितृयज्ञव १४०

पितरि पातित्यादिदोषयुक्ते सत्यपि च अकाले अतिरिक्तकाले अपि कुर्यात्। ब्राह्मणादि
नेतातेपतितसंगवर्जितो। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति। सुमंतुरपि न
तु पितृकः कुर्यात्तु आद्यमग्निमंतद्द्विजः। येभ्य एव पिता कुर्यात्तेभ्यः कुर्वीत साग्निक इति
नेकस्याहिताग्नेः। अनाहिताग्नेरपि यद्धारीतवचनं। अनग्निकोपि कुर्वीत जन्मा
दौ वृद्धिकर्मणि। येभ्य एव पिता दद्यात्तानेवोद्दिश्य पार्वणमिति। अत्रानग्निक इति। अना
हिताग्निरप्येतत्। अन्यथा सुमंतुवचनेन विरोधः स्यात्। विशेषस्तूक्तः। ध्रियमाणे तु पितरि
पूर्वेषामेव निर्वपेत्। विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेदिति। पितामहे जीवति पितृपिता
महप्रपितामहयोर्मृतयोः। स एवाह। पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः। पितुः स
नाम संकीर्त्य कीर्तयेत्प्रपितामहमिति। पितामहो वा तं श्राद्धं भुंजीतेत्यब्रवीन्मनुः। पितुः
स नामेति अस्मत्पितुः पितामहेति। प्रपितामहं कीर्तयेदित्यर्थः। पितरि पितामहे
च जीवति प्रपितामहादीनां त्रयाणां श्राद्धं कुर्यात्। त्रिषु जीवत्सु न कुर्यात्। तदुक्तं वि

स्तुना। पितरि जीवति यः कुर्यात्तु येषां पिता कुर्यात्तेषां कुर्यान्नो। पितरि पितामहे
च जीवति येषां पितामहः। पितरि पितामहे प्रपितामहे चाजीवति नैव कुर्यात्तु। यस्य
पिता प्रेतस्यात्तु स पित्रे पिंडं निधाय प्रपितामहाय दद्यात्तु। यस्य पितामहः प्रेतस्या
त्तु स तस्मै पिंडं निधाय प्रपितामहात्तु पराभ्यां दद्यात्तु। यस्य पिता प्रपितामहश्च प्रेतौ
स्यातां स पित्रे पिंडं निधाय पितामहात्तु परं द्वाभ्यां दद्यादिति। निगमे। पियो जीवत्
पितृणां तं भोजयेत्तु स्व पितृस्थाने इत्येक जीवतामजीवतां वा देयमिति हिरण्य एके
ब्रुरिति॥ ब्रा॥ अथ जीवत्पितृर्यत्र श्राद्ध निषेधस्तद् यत्रे। यथा लौकिकादिः। आमश्रा
द्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणमिति। क्र
तुरपि। अष्टकासु च संक्रान्तौ मघादिषु युगादिषु। चन्द्रसूर्यग्रहे पाते कृछ्रया प्रत्यभाग
तः जीवत्पिता न कुर्यात्तु श्राद्धं काम्यं तथाखिलमिति। अत्राष्टकाच्चष्टकाव्यतिरिक्त
एवाद्या चष्टका श्राद्धविधानात्। न कुर्वन्मैत्रयस्य त्वपरिशिष्टाच्च त्रष्टका गयायां प्राप्तो सत्यां १४१

यत्र मृतेऽहनि मातुः श्राद्धं सुतः कुर्यात्तु पितर्यपि च जीवति। अत्र गयाप्राप्तौ सत्यामिति दै
वात्तु प्रासंगिक प्राप्तौ गयायां श्राद्धं विधेयकं। आमश्राद्धं गयाश्राद्धमिति श्राद्धोद्देशेनैव
गयायां गत्वा तत्र श्राद्धं न कर्त्तव्यमित्येतत्परं। अतश्च न विरोधः॥ इति श्रीसूर्यसेनमहेन्द्रवि
रचिते निर्णयामृते श्राद्धप्रकरणे जीवत्पितृनिर्णयः॥ ब्रा॥ श्रीमत्पण्डितसुधीः॥ ब्रा॥ अ
थ महालयापरपक्षश्राद्धनिर्णयः प्रस्तूयते। आश्विनमासस्य कृष्णपक्षोऽपरपक्षः। स एव
महालयोपक्षश्चोक्तो। तत्र षोडशादिना नियममिति। शुक्लप्रतिपदा सह षोडशाः सर्वाख्यापू
रणं। तस्यामपि दृश्याविशेषात् तत्पक्षचमेवात् तदुक्तं देवलेन। अहः षोडशकं यत्तु
शुक्लप्रतिपदा सहांशच्छायाविशेषेणसापि दर्शान्तिका स्मृता इति। न तस्याः स्वपरप
क्षायत्र कन्यां व्रजेद्रविः। स महालयसंज्ञः स्यात्तु गजच्छायाह्वयस्तथा इति। अत्र न न
स्याति शुक्लप्रतिपदाति प्रायेणायमोऽपि। आषाढीमवधिं कृत्वा यः पक्षः पंचमो भवेत्।
तत्र श्राद्धं प्रकुर्वीत कन्यार्कस्थोऽजवन्न वेति। शांखायनिरपि पृथ्व्याः कन्यां गतः सूर्यः।

तृतीयः पक्षश्च पंचमः। कन्यास्थार्काद्वितीयः पक्षः सोऽत्यंतं पुण्यतम उच्यत इति। अत्र पंचमपक्षो
महालयसंबंधी यदाऽधिमासो न वेत्तो तदा तमतिक्रम्य शुद्धपक्ष एव श्राद्धादिकं कार्यं।
तदाह शृंगः। एकराशिस्थिते सूर्ये यदा दर्शद्वयं भवेत् हव्यकव्यक्रियादत्ता तदाद्यायाधि
मासकः। वृद्धिश्राद्धं तथा सोमम् अग्न्याधेयं महालयं। राजाभिषेकं काम्यं च न कुर्याद्भा
नुलंघित इति। यत्तु कं। कन्यास्थोर्कोनिवर्त्तेत। तदा सोमध्यावसाने वा कन्यांगते वा
सूर्ये प्रतिपदमारभ्य पक्षश्राद्धं कर्तव्यं। संपूर्णपक्षस्य कन्यागतत्वं च सूचकार्थं। तदाह का
त्यायनिः। आदौ मध्यावसाने वा यत्र कन्यां व्रजेद्रविः। स पक्षः सकलः पूज्यः श्राद्धषोडश
के प्रतीति। जाबालिरपि। अंगते पिरवा कन्यां श्राद्धं कुर्वीत सर्वदा। आषाढ्याः पंच
मः पक्षः प्रशस्तः पितृकर्मणि इति। अत एवापरपक्षश्राद्धमावश्यकं तत्पार्वणविधिना ष
ड्दैवतं कार्यं। तदाह गौतमः। पितरो यत्र पूज्यंते तत्र मातामहा ध्रुवं। अविशेषेण कर्तव्यं
विशेषान्नरकं व्रजेत्। कोऽपि। अपरपक्षे विशिष्टाः कन्यायां नाम तिष्ठितोऽल्पप १४२

दोगजच्छाया समानः पितृकर्मसु पार्वणस्यातः कुर्यादकोधः श्राद्धमत्रवित्। आहता
प्रकारेण। जाबालिरपि। पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा। प्राप्नोति पंचमे कुर्वन्
श्राद्धं कामांस्तथा परान्। इति तेन च परपक्षश्राद्धं नित्यमित्युक्तं। अत्र च फलश्रवणात्काम्यं
प्रतीयते। ननु कथं विरोधपरिहार इति चेन्न सत्यं। नित्यानि नैमित्तिकानि नावश्यकानि फ
लप्रयोगाः काम्यानि भवंतीत्यनयरूपाणि। अतश्च न विरोधः। अस्य चाद्यं तद्दैवतत्वेन दाशि
कादित्यानदः। तदाह देवलः। देवाद्यंते वक्रवी तद्देवांतान्नवकुर्वन्निति। देवाद्यंतद्दकुर्वी
तश्राद्धरक्षणहेतुनेति। आदौ देवा विश्वेदेवाः। अंते देवता विष्णुरिति। एवं सर्वस्मिन्नपि प
क्षे श्राद्धं कुर्यात्। तदाह गौतमः। तथा परपक्षे श्राद्धं पितृभ्यो दद्यात्। पंचम्यादि दर्शांतमष्ट
म्यादि दशम्यादि सर्वस्मिन्वेति तदुक्तं ब्रह्मांडपुराणे। अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्याद्दि
ने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्धमेव वा। अत्राश्वयुगिति प्रतिपदादिमासाभिधा
यिणि। त्रिभागहीनं पंचम्यादि दर्शांतं। त्रिभागो दशम्यां। अर्धमष्टम्यादि दर्शांतेति पंच तिथयोऽस्

नाऽतिविना गर्हितं चो दशम्यादि दर्शान्तं॥ तत्रापि चतुर्दश्यां सद्दशतिथ्योर्दिनानवं
नीति॥ अद्यमिष्टम्यादि दर्शान्तं॥ पंचम्यादिषु पक्षेषु चतुर्दशीं वर्जयित्वा आरु विधानात्
यथाह मनुः॥ कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीं॥ श्राद्धे प्रशस्तास्तिथयो यथैता न
तथेतरा इति॥ अत्र दशम्या द्याविथ्यादि शाद्धे न पंचम्या षष्ठम्यादिपक्षे॥ अरुपसंग्रहः॥ प्र
तिपदादि पक्षे चतुर्दश्यादि न वर्ज्ये तदाह कात्यायनः॥ न तस्यापरपक्षे श्राद्धं कुर्या
द्दिने दिने॥ निवर्नंदादि वर्ज्यं स्यात् न्निव वद्यां चतुर्दशीं॥ यत्तु याज्ञवल्क्यवचनं प्रतिप
त्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीं॥ मिति॥ तन्द्रपूर्वं चतुर्थ्यादि दद्यः संपद्यते॥ सम्याक्
द्वयंदद्यः संपद्यते कर्धं निवम्याः यदद्यः संपद्यते॥ तत चतुर्दशीं॥ तां केनाप्यपरपक्षे
नातिक्रामेत्यादि विशेषवचनबलात्॥ आघपक्ष व्यतिरिक्तपक्षे स्त्वेवावतिष्ठते॥ आ
षाढ्याः पंचमेपक्षे कन्यासंस्थे दिवाकरे॥ मातः तत्रिषु न यो विश्राद्धं दास्यति मानवः॥ तस्य
संवत्सरं यावत् तृप्ताः स्युः पितरो ध्रुवं॥ तस्मात् तत्र दातव्यं श्राद्धं श्रद्धापरैर्नरैरिति॥ १४३

यदा चैकस्मिन्नेव दिने श्राद्धं कुर्यात्तदा नंदादिशुक्रवारश्च वर्जयेत्॥ तदाह गार्ग्यः॥ नं
दायां भार्गवदिने चतुर्दश्यां त्रिजन्मनि॥ एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयादिति॥ का
श्यपादिनिरपि॥ कृतानैमित्तिकं श्राद्धं काम्यं श्राद्धं कर्तुमिच्छति यदा तदेष्टपुत्रस्तु नाशः
स्यादिति॥ सर्वानामिति॥ तथा॥ मघायां पिंडदाने ज्येष्ठपुत्रो विनश्यतीऽति॥ अत्र पिंड
दानस्य श्राद्धपूर्वकत्वात् श्राद्धनिषिद्ध एवावसानमिति॥ वृद्धगार्ग्योऽपि॥ प्राजापत्ये स
पौष्णे च पित्र्यर्क्षे भार्गवे तथा॥ यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यतीऽति॥ प्राजापत्यं रो
हिणी॥ पौष्णं रेवती॥ पित्र्यर्क्षं मघा॥ भार्गवः शुक्रवारः॥ तथा॥ नानो लोमत्रयोदश्यां नंदासु
युमघासु च॥ पिंडदानं गृहस्थानां न कुर्यात्तिलतर्पणमिति॥ एतानि वर्ज्यानि वर्जयित्वा तु एकस्मि
न्नेव दिने श्राद्धं कुर्यात्॥ तत्र श्राद्धं साधारणोपतिलास सहा पृथग्वा कुर्यात्॥ तदुक्तं॥ अपरा
ह्णे गयामहालया पृथक् कुसहवा स्यु रष्टकर्त्तृकमिति सिद्धिरिति॥ स्मृत्यर्थसारेऽपि॥ तत्र मा
तृश्राद्धं पृथक् कुर्यात्॥ अस्मं मातामहानां सपत्नीकमेवेति॥ चतुर्विंशतिमतेऽपि॥ केचिदिच्छंति ना

रीणां पृथक् श्राद्धमर्हंतीति। तत्र एकस्मिन्नेव काले एकपाकेनैव एक एककर्त्राचार्य
त्रात्रादिकानां एकोद्दिष्टविधानेन श्राद्धं कुर्यात्। तदुक्तं चतुर्विंशतिमते। आचार्यस्य
रुः शिष्यस्य सखिज्ञातिश्च एव चात्मपत्नी च यस्य सर्वान्यग्धस्थे वचनलांजलीनां पिंडांश्च श्राः
सदा दद्यात् कन्यानां इयदेवरा। तीर्थे चैव तु सर्वेषु माघमासे मघासु च। एकस्मिन्त्रा
ह्मणे सर्वान् आचार्यादीन् प्रपूजयेत्। दद्याद्दद्याद्वापि पिंडानुद्देशादकरणं न त्वा। नियोगि
को विधिर्दूष्पत्रश्चयेत्। अत्र किंचिदुक्तं। एककालगतानां बहूनामथवा द्वयोः।
तंत्रेण श्रपणं सर्वा श्राद्धं कुर्यात्तु पृथक् पृथगिति। उक्तो सर्वदेवप्रवाससंनिपातेष्वयं
क्रमइति। स्मृत्यर्थसारेपि। गुरुवाचार्यपितृव्यमातुलस्खविकुलोपाध्यायत्राटसखि
प्रियपुत्रशिष्यादीनां ततु स्त्रीणां च श्राद्धं कार्यं। अपुत्राणां विशेषेण कार्यं। तत्र एकपाकः
विश्वेदेवतंत्रं पिंडवर्दिश्चैकमिति। एतासामेकोद्दिष्टविधानं स्वमंत्रराहास्तपिंडीकर
णाहर्द्वयत्रयत्र प्रदीयते। आत्र न त्रिपुत्राय स्वाभिनेमातुलाय च। मित्राय गुरवे श्रा १५५

द्धं एकोद्दिष्टं न पार्वणमिति। पुराणसमुच्चये विशेष उक्तः। एकादश्यां प्रकुर्वीत एको
द्दिष्टानि सर्वतः। सर्वस्य देवता विष्णुः पितृवर्गस्य पालकः इति। अत्रापि संबंधव्यतिक्रमेण श्रा
द्धं कुर्यात्। अत्राष्टम्यां आरुगया श्राद्धसमं। तदुक्तं ब्रह्मपुराणे। आषाढ्याः पंचमपक्षे गयाम
ध्यमष्टमी स्मृता। त्रयोदशी गजच्छाया तुल्यास्तु पितृदा इति। त्रयोदशी च मघानक्षत्रयोगा
द्गजच्छायेत्युच्यते। तदुक्तं यमस्मृतौ। यदेन्दुः पितृदैवत्ये हंसश्चैव करे स्थितः। याम्या तिथि
र्भवेत्सा हि गजच्छाया प्रकीर्तितेति। पितृदैवत्यं मघा। करो हस्तनक्षत्रं। हंसः सूर्यः। याम्या ति
थिस्त्रयोदशी। नन्दत्रयोदश्याः प्रशस्यमुक्तं। त्रयोदश्यां तु पक्षे या श्राद्धं कुरुते नरः। पंच
त वंतस्पज्ञानीया इष्टपुत्रस्य निश्चितं। इत्यंगिरसा। त्रयोदश्यां श्राद्धं निषिद्धं। अतश्च विरा
ध इति चेत्तत्सत्यं त्रयोदश्यां मातामहवर्गे परित्यज्य पितृवर्गस्य श्राद्धं न कर्तव्यमित्येवं
परत्वनिषेधस्य वाक्यविधिः। एकवर्गे श्राद्धनिषेधश्चाकाल्पांजिनि प्राक्ता। श्राद्धं नैवक
वर्गस्य त्रयोदश्यां सुपक्वमेतात्रटमासास्त्रयस्य स्तुप्रडाहिंसंतितैमिति। मघासु कृत

योदश्यां श्राद्धं प्रशंसादर्शनात्। तदाह यमः। पिता पितामहश्चैव तथैव प्रपितामहः।
जातं पुत्रं प्रशंसंति पिप्पलं शकुना इव। मधुमांसेन षड्केन पयसा पायसेन वा। एष दा-
स्यति नः सुप्रवर्षासु च मघासु चेति। अस्यां मघायुक्तायां ज्येष्ठपुत्रवता पिंडरहितं
श्राद्धं कर्त्तव्यं। तदुक्तं देवीपुराणे। अपरपक्षत्रकमे। तत्रापि मघनी। प्रजाकर्त्तव्या पितृ-
देवते। ज्येष्ठे पिंडप्रदानं ज्येष्ठपुत्री विवर्जयेदिति। ननु केवलं त्रयोदश्यामपि श्रा-
द्धं काम्यायनेन निषिद्धं। त्रयोदश्यां युवा न म्रियत इति। तत्काम्यविषयं। अप-
रपक्षत्रयोदशी युगादिः। अतस्तद्युगादिनिमित्तमपि पिंडरहितमेव कर्त्तव्यं। पिंडनि-
षेधश्च युगादिनिर्णये वक्ष्यते। अत्र पक्षे नरणमहती प्रोक्ता। तदुक्तं मत्स्यपुराणे। न-
रणी प्रतपक्षस्थमहती परिकीर्तिता। अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत्। इति।
अत्र नवम्यां वा एकवचनं वा देवतं श्राद्धं कार्यं। तदुक्तं। अष्टकास्तु नवभिः पिंडैः श्राद्धं
समाचरेत्। इति। पित्रादि मातामह ध्रुवं तथा मातामहाद्विकमिति। येनेर कर्द डिविर्दद १४५

नो वा तत्पक्षद्वादश्यामेव पार्वणं कुर्यात्। तदुक्तं वायुपुराणे। संन्यासिनोप्याब्दिका-
दि पुत्रः कुर्याद्यथाविधि। महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु इति। अतः पुत्रपदं मधि-
कारोपलक्षणं। तत्पक्षचतुर्दश्यां शस्त्रहतस्यैव एकोद्दिष्टं कार्यं। तदुक्तं मरीचिना। सम्य-
गमागतस्यापि पितुः शस्त्रहतस्य वै एकोद्दिष्टं कर्त्तव्यं चतुर्दश्यां महालये इति। सम-
गागतस्य सपिंडीकृतस्यास्य पित्रादयस्त्रयोपि शस्त्रहतास्तेन चतुर्दश्यां पार्वणमे-
कमेव कार्यं। तदाह पराशरः। चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणे कृते एकोद्दिष्टविधाने-
न तत्कुर्याच्छस्त्रघातिनां। पित्रादयस्त्रयो यस्य शस्त्रघातास्तु तत्क्रमात्। संभूते पार्वणं
कुर्यात्तु आब्दिकानि पृथक्पृथक्। अत्र शस्त्रहतपदं प्रायोनाशकशस्त्रोक्तमार्गेण मृ-
तानां चोपलक्षणं। तदुक्तं ब्रह्मांडपुराणे। प्रायो नाशशस्त्राग्निविषोद्बंधनिनां तथा। चतुर्दश्यां
तु कर्त्तव्यं तृप्त्यर्थमिह निश्चय इति। मरीचिरपि। विषशस्त्रश्वापदाहितिर्यग्ब्राह्मणघाति-
नां। चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता। घातिनामिति हतानामित्य

षेष्ठां दर्सप्रयोगः॥ इदं केचित्॥ शास्त्रहतस्य चतुर्दश्येव चतुर्दशी च शास्त्रहतस्यैव
तिवसंत ब्राह्मणोग्नीनाद्धीते ति वक्तव्यनियम इति॥ तथा वचनं॥ यस्य पिता शास्त्रह
तः पितामहो जीवति तद्विषयत्वेन योजनीयं॥ अन्यथा शास्त्रहत पितृकस्य पितामहप्र
पितामहयोरपरपक्षे श्राद्धमेव न संभवेत्॥ तद्विहितं यथा॥ कांक्षंति पुत्रापौत्रेभ्यः
पायसं मधुसंयुतं॥ तस्मात्तान् तत्र विधिना तर्पयेत्तु पायसेन चेति॥ तत्रैवापरपक्षप्रकर
णे॥ किंचान्यनियमे उच्यमाने देवीपुराणवचनविरोधः स्यात्॥ यथा॥ आषाढ्यादिष्ट विपन्ना
नां जलाग्निहत्युपातिनां चतुर्दश्यां न चेत् पुत्राद्यमावास्यां तु कामिकी इति॥ अत्र कामि
कीयमावास्या विहितफलकामस्यामावास्यायामिव तिथ्यंतरविहितफलपेकामस्य
तिथ्यंतरपि श्राद्धं॥ यथाह॥ सदैव प्रतिपदादितिथिषु श्राद्धविधानं मनुरादा॥ कुर्वन्
प्रतिपदि श्राद्धं सुरूपान् लभते सुतान्॥ कन्यकायां द्वितीयायां तृतीयायां तु वंदितः॥
पशून्क्षुद्रांश्चतुर्थ्यां तु पंचम्यां शोभनान् सुतान्॥ षष्ठ्यां द्यूतं कृषिं चापि सप्तम्यां लभते नरः॥ १५८

अष्टम्यामथ वाणिज्यं लभते श्राद्धदः सदा॥ स्यान्नवम्यामेकखुरं दशम्यां द्विखुरं बहु॥
एकादश्यां तथा रूप्यं ब्रह्मवर्चस्विनः सुतान्॥ द्वादश्यां जातरूपं च रजतं कुप्यमेव च॥ ज्ञातिश्रैष्ठ्यं त्र
योदश्यां चतुर्दश्यां तु क्रूरप्रजाः॥ ज्ञायंते पितरश्चास्यां ये शास्त्रेण हतारणे॥ पक्षे त्र्यादि विधिं, ला
नुमनसः प्रियान्॥ श्राद्धदः पंचदश्यां तु सर्वान् कामान् समश्नुते इति॥ याज्ञवल्क्यवचनेन नवि
शेष उक्तः॥ कन्यां कन्यावेदिनश्च पशून् वरसुतानपि॥ द्यूतं कृषिं च वाणिज्यं द्विशफैकशफां
स्तथा॥ ब्रह्मवर्चस्विनः पुत्रान् स्वर्णरौप्ये सकुप्यकेः॥ ज्ञातिश्रैष्ठ्यं सर्वान् कामानाप्नोति श्राद्धदः
सदा॥ प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमिति॥ कन्यावेदिनो जामातरः॥ कुप्यं त्रपुसीसा
दि॥ द्यूतं द्यूतविजयः॥ कृषिवाणिज्ये तल्लाभं॥ अत्रामावास्यायां सर्वकामप्राप्तिरिस्फिकास्यां
पि क्रमेणैककासंख्याकामावास्याश्राद्धानुष्ठाने न सिध्यति॥ न त्वेकस्यामेवामावास्यायां
सर्वकामावाप्तिः॥ इदमेव सर्वेभ्यः कामेभ्यो दर्शः प्रोक्त इति भासते॥ विस्तरस्तु वाक्यविचारे मीमांसा
यां प्रतिपादितं॥ अत एवामावास्यायां तु कामिकानिबंधनो देवीपुराणस्यामावास्याया

सर्वप्राप्तिर्नवतीयमावास्यायामिति। सर्वतिथ्यंकपलं लक्षणमित्यग्निप्रायश्चित्तलमतिप्र
संगेन। अपरपक्षेयदिकेनापिव्रतेनाश्राद्धंनकृतंस्यात्तदादीपोत्सवामावास्यायांकुर्या
तु। तदाहशंखः। येयंदीपान्विताराजन्ख्यातापंचदशीभुवि। तस्यांदद्यान्नचेदन्नंपितॄणां
विमहालयः इति। इत्यपरपक्षनिर्णयः॥छ॥ अथप्रसंगागतलक्षत्रादौकाम्यमपक्षयन्तो
तदाहयाज्ञवल्क्यः। स्वर्गंह्यपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा। पुत्रश्रैष्ठ्यंससौभाग्यंस
मृद्धिंमुख्यतांशुभं। प्रवृत्तचक्रतांचैववाणिज्यप्रभृतीनपि। अरोगित्वंयशोवीतशोकतां
परमांगतिं। धनंवेदान्भिषक्सिद्धिंकुप्यंगामप्यजाविकं। अश्वानायुश्चविधिवद्यःश्राद्धं
प्रयच्छति। कृत्तिकादिभरण्यंतांसकामानाप्नुयादिमानिति। एवंविष्कंभादियोगेष्वपिश्राद्धकरणेऽ
त्रिकादिनक्षत्रेविहितमेवफलंक्रमेणानवनीतदाल्भ्यमरीचिः। कृत्तिकासुनक्षत्रेषुश्राद्धेयत्फ
लमीरितं। विष्कंभादिषुयोगेषुतत्तदेवफलमश्नुत इति। रव्यादिषुवारेषुबवादिकरणेषु
च। श्राद्धफलंहृद्स्मृतिनोक्तं। यथा। आरोग्यंचैवसौभाग्यंसांग्रामजयमेवच। सर्वान्कामा १५७

न्प्रियंविद्यांधनमायुर्यथाक्रमं। सूर्यादिवारेष्विष्टेषुश्राद्धकृल्लभतेफलमिति। बवादिक
रणेष्विष्टेषुश्राद्धकृल्लभतेफलमिति। किंवामन्वादियुगाद्यलक्ष्ययोगेपुचकाम्यश्राद्धंक
र्यात्। तत्रमन्वादिषुयुगादिषुकार्यं संक्रांतिषुनैमित्तिकंपिंडरहितमेवकार्यं तदाह
लघ्व्यः। अयनद्वितयेश्राद्धंविषुवद्द्विवसेतथा। युगादिषुचसर्वासुपिंडनिर्वपणादृते इति। अ
त्रयुगादिष्वितिसाहचर्यात्मन्वादीनामप्युपलक्षणं। तदुक्तंकालादर्शे। विषुवायन
संक्रांतिमन्वादिषुयुगादिषु। विदध्यात्पिंडनिर्वापंश्राद्धंसर्वसमाचरेत्। मन्वादिषुयुगा
द्यलक्ष्ययोगास्वतिथिनिर्णयएवोक्ताः॥छ॥ इतिश्रीसूर्यसेनमहीमहेन्द्रविरचितेश्रीनिर्ण
यामृतेमहालयनिर्णयः। नित्यश्राद्धादिश्राद्धनिर्णयः॥छ॥ श्रीमत्पंडित॰नाथसुधीः॥छ॥ एवं
नित्यश्राद्धंनिर्णीयप्रसंगतःकाम्यंश्राद्धंचनिर्णीयक्रमप्राप्तंनैमित्तिकंश्राद्धंप्रस्तूयते। तत्र
नवश्राद्धंप्रभृतिसपिंडीकरणांतंप्रेतश्राद्धंयद्दर्शेषुसंक्रांतिषुचश्राद्धंवृद्धिश्राद्धंसंव
त्सरादर्वाक्श्राद्धंचानैमित्तिकमुच्यते। तत्रनवश्राद्धंनामसूतकेतृतीयादिनेषुक्रियमाणं

प्रथमन् दि१

नवीनं श्राद्धषट्कं तेनोक्तमंगिरसा । प्रथमे ऽह्नि तृतीये ऽह्नि पंचमे सप्तमे तथा । नवमैका
दशे चैव नवश्राद्धं प्रकीर्तितमिति । द्वैवत्रिष्टो ऽपि । सप्तमे ऽह्नि तृतीये ऽह्नि प्रथमे नवमे त
था एकादशे पंचमे सम्यग्नवश्राद्धानि षट् तथेति । बौधायनसूत्रे पंचैव नवश्राद्धानि नवमं
तरितं एकादशे ऽह्नि कार्यमित्याह । यथा । मरणादिविषमदिनेषु केचित्कुर्यात् । न दानवमा
द्यत्र नवमं विच्छिद्यते एकादशे ऽह्नि तत्कुर्यात् । विष्णुस्वामिना त्वाश्वलायनानां पंचाश्वा
पस्तंबानां षट् । अन्येषां विनाष्टि तिथ्यवस्थानेनता । नवश्राद्धानि पंचाश्वलायनस्या
खिनः । आपस्तंबाः षडिच्छा ऊर्ध्वं विनाशात्त्रिरिराणमिति । न विष्णुपुराणे । चत्वारि विष
येष्ववस्थानं क्रो । यथा नवसप्तविंशं राज्ञो नवश्राद्धा च्युतक्रमात् । आद्यंतयोस्तु वर्ष
योः षड्विंशा ऊर्ध्वं विषय इति । विशां नव राज्ञां सप्त विप्रशूद्रयोः षडित्यर्थः । दिवोदत्तरि
तं नवश्राद्धं चांतनस दहकुर्यात् । न तदा दहकमेव । नवश्राद्धं मासिकं च यद्यदत्तरितं नव
त्वतत्र दुत्तरसानंत्यादनुष्ठेयं प्रकृतत्वादिति । इति नवश्राद्धनिर्णयः । अथ मासिक १४८

निर्णयः । तानि च मासिकानि द्वादशसु मासेषु षोडश भवंति । यथा । मरणमासादारभ्य
संवत्सरप्राप्तिपर्यंतं प्रतिमासं विधीयमानानि द्वादश मासिकानि । ऊनमासिकं त्रैपाक्षि
कं ऊनषाण्मासिकं ऊनाब्दिकं चेति । तदा द्वादशाहस्य च ॥ द्वादश प्रतिमास्यानि आद्यं षा
ण्मासिकं तथा । त्रैपाक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश इति । अत्र द्वादश प्रतिमा
नि स्यं षाण्मासिद्वि आब्दिक ऊनषाण्मासिकोनषण्मासिकोनाब्दिकपराः । एतानि षोडशश्रा
द्धानि सपिंडीकरणात्पूर्वं एकोद्दिष्टविधिना कुर्यात् । सपिंडीकरणादूर्ध्वं तु प्रत्याब्दिक
वत्पार्वणं यथाचारं कुर्यात् । न तदा ह पैठीनसिः । सपिंडीकरणादूर्ध्वं तथा कुर्यात्सना
द्यपि इति । कुत्राप्याद्यमासिकं एकादशे ऽह्नि पार्वतं कुर्यात् । न तदा दयाइत्व्यक्षम्नेत द
नि ऊकर्षं प्रतिमासं तु वंशं प्रति संवत्सरं चैवमाद्यमेकादशे ऽहनि । अत्र प्रतिमासं प्र
तिसंवत्सरमित्यभिधानया द्यमेकादशे ऽह्नि नीत क्व चा दाद्यमासिकमाद्याब्दिकं चैका
दशे ऽह्नि कुर्यात् । अनेन वा विप्रायेण गोभिलोप्यादि यस्य द्विरावृत्तिमाद्या ब्राह्मणं भोज

येद्य घदोतव्यमनलेन धा। पुनस्थनोऽजयद्विप्रंद्विरा इति निर्वेदिति। अत्र तस्य एकादशाह्नि
विधीयमानमाद्याब्दिकं प्रथमब्दतीते द्वितीयाब्दप्रारंभे मृतादि विधीयमानं द्वितीया-
ब्दिकं। एवं तृतीयाब्दप्रारंभे मृतादि विधीयमानं तृतीयाब्दिकं। चतुर्थाब्दिकारंभे विधीय-
मानं अब्दं। अत्र तस्य मरणादिनमारभ्य त्रिषष्ट्यतीते तु विधीयमानं श्राद्धं तदब्दमित्य-
र्थः। आद्यं श्राद्धं तु त्रियादिरप्येकादशाहे एव कार्यं तु। तदा पदष्ट एव शिष्टः। एकादशाह्नि
यत् श्राद्धं तस्मामाद्यमुदाहृतं। चतुस्समिपिवत्सानां सूतकं तु पृथक् पृथक् इति। न
नु शुध्विनाकर्म कर्तव्यमिति विधानात् श्राद्धे त्रियादेरेकादशाह्नि सूतकानपगमात् क-
थं श्राद्धमिति चेत्। सत्यं। लोगाक्षिणा। कर्तुस्तात्कालिकी शुद्धेरं निधनात्। यथा। आ-
द्यं श्राद्धमशुद्धोपि कुर्यादेकादशेऽहनि। कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। इ-
ति। ननु एवं सति ब्राह्मणानिस्वपितृषु एवाद्यश्राद्धं कुर्वतां तस्यापि तात्कालिकशु-
द्धिकं स्यादित्यादि चेत्। न। तत्र विधिनाभावात्। आद्यमेकादशाहे नीयेकादशे कृपवनि १५९

धेनाश। अतस्तत्रैकादशाह्नि विहितं आद्यं श्राद्धं त्रियादिरशुद्धोपि कुर्यात्। नचाशौचां-
तरमित्यलमतिविस्तरेण। यत्तु वचनं। अथाशौचापगमे इति। तद्ब्राह्मविषये पक्षपपद्यते इत्य-
विरोधः। प्रायोनाशादि विहितमार्गेण मृतानां सद्यःशौचाप्याद्यमेकादशे एवाह्नि कुर्यात्।
तथा दक्षः। एकाः सद्यःशौचेपि दातव्यं प्रेतस्यैकादशेऽहनि। सएव दिवसस्तस्य श्राद्धशय्यासनादि-
षु इति। ऊनमासिकं तु द्वादशाहे ऊनमासिकं वा कार्यं। तदाह गालवः। मरणाद्द्वादशाहे स्या-
त् मासोने वोनमासिकं। ऊनषण्मासिकं ऊनषष्ठेमासि ऊनाब्दिकं ऊनद्वादशेमासि त्रिप-
क्षिकं तृतीयपक्षे कार्यं। तदाह गालवः। ऊनषण्मासिकं षष्ठेमास्यूने न्यूनमासिको त्रिपाक्षि-
कं त्रिपक्षे स्यात् द्व्यूनाब्दं द्वादशे तथा इति। अत्रोनमासिकादीन्यूनमासादिषु कार्याणि। ऊनत्वं
तत्र कियद्भिर्दिनैरुक्तेषु कार्याणि यत्राच्यते। तदाह गालवः। त्रिभिर्वा दिवसैरूना एकेन
द्वितयेन वा। आद्यादिषु च मासेषु कुर्यादाह्निकाह्निकमिति। कार्ष्णाजिनिरपि। ऊना-
न्यूनेषु मासेषु विषमादेसामपिन्ना। त्रिपक्षिकं त्रिपक्षे स्यात् न्यूनाद्विधिवेनराणि। नन्वान-

अथ मृतं मत्स्ये द्वितीयमासिकस्योर्ध्वं त्रयोदशः तदनंतर मिलस्यानर्थकं च। यथा कृते तु मृत तिथिमात्रला आर्द्रं त दनंतर मासिकं
च तार्द्र मिलरणे त्रियङ्कं नन्ततानि मृता देवे ते बवचेद। थमे पक्षिके सानिद्र विश्वके तस्या निय मा तदत्ति तावा मेघवको तिर

विष्णुपुराणे। त्रिपक्षिकं भवेद्धत्तो त्रिपक्षे तदनंतर मित्युक्ते। कात्यायिनिना तु त्रिपक्षेऽ
ष्क क्रमिति विरोधः इति चेन्न। तदर्थं चापि यत्न इति न लिङ्गत्व इत्यर्थः। किंतु पूर्वं वृत्त इति सामान्येन तु म
रणदिनादन्यस्मिन् दिने दाहे सति दहनदिनमारभ्य नवश्राद्धानि एकादशाहादिकं त्रिपक्षि
कांतं कुर्यात्। तदनंतरं श्राद्धं मरणदिन एवेति न दाहदिनात्‌ तत्कथ्यः। ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृता
हान्यवत् तद्भवेत्। अधस्तु कार्यं दाहाद्यादितात्र द्विजसत्तम इति। देवादंतरितं मासिकं चान्य
स्मिन्मासे मृताह एव कुर्यात्। तदाह ऋष्यशृंगः। एकोद्दिष्टं तु संप्राप्ते यदि विघ्नः प्रजायते। मा
सेन्यस्मिंस्तिथौ तस्यां कुर्यात् तेन तिथौ चयदिति। अत्र च कारणान्मासिकस्य द्वयस्य अंत
रितं तन्मासिकं कुर्यादित्यर्थः। एतानि षोडशश्राद्धानि दाहादिसंवत्सरादर्वाक्
कालेसपिंडीकरणेऽपि स्पृष्टमिति निश्चयं सपिंडीकरणं कुर्यात्। तदाह लौगाक्षिः। श्राद्धानि
षोडशापाद्य विदधीत सपिंडनमिति। गोभिलोऽपि। श्राद्धानि षोडशादत्वा नैव कुर्यात्स
पिंडतामिति। सपिंडीकरणानंतरमपि पुनः स्वस्वकाले कार्याण्येव। तदाह गिरागायस्य १५०

संवत्सरादर्वाक् सपिंडीकरणं यत्र मासिकेषादिकं संचदेयं तस्यापि वत्सरमिति। स
पिंडीकरणार्थं अपकृष्टानि यान्येतानि विवाहादिषु षोडशपश्चिनायां तु न पक्षा
दह एव कार्याणि। तदाह शाट्यायनिः। सपिंडीकरणादर्वाग् अपकृष्टानि तानि पि
तृहेऽपि। तदाह शाट्यायनिः। प्रेतश्राद्धानि शिष्टानि सपिं
डापकृष्टानि तेष्वतद्यदनिषेधनादिति। शाट्यायनिः। प्रेतश्राद्धानि शिष्टानि सपि
ण्डीकरणं तथा। अपकृष्यापि कुर्वीत कर्ता नांदीमुखं द्विजः। इत्यनंतरं निषेधश्च कार्या
नेनोक्ताः। निवर्त्य वृद्धिनि तत्र तु मासिकानि वर्तन्त्रयेत्। अयात यामं मरणं न त्रयेत् पुनर
पवित्रिति। अयातयाम न वा तथा। अनंतरणमनर्वैयावृद्धिप्रेतश्राद्धानि कर्षेति। अत्र
श्राद्धी नरकं घोरं पितृभिः सह मज्जतीति। अत्र ऊनमासिको नाह्निकानि। नंदादिषु कार्या
णि। नंदानां भार्गवदिनं च चतुर्दश्यां त्रिपुष्कारा ऊनश्राद्धं प्रकुर्वीत यदि पुत्रधनक्ष
यादिति। मरीचिरपि। त्रिपुष्कारवनंदासु सिनीवाल्यां भृगोर्दिने। चतुर्दश्यां च नाना
निष्ठत्रिका सु त्रिपुष्करु इति। त्रिपुष्करं च त्रिपादनक्षत्र नन्दा तिथि गुरुतौमर विवा

राणां मत्पतमस्य मेलने भवति। द्वयोर्मेलने त्रिपुष्करं। तदुक्तं रत्नमालायां। विषमचर
णधिष्ण्यं नंदा तिथिर्यदि जायते। सुरगुरू रविदिना पुत्राणां कथंचन वासरोयामुनि नि
रूदितः सोयंयोगस्त्रिपुष्करसंज्ञक इति॥ इति मासिकनिर्णयः॥ ०॥ अथ सपिंडीकर
णं तस्याष्टौ काला भवंति। तदुक्तं कालादर्शे। एकादशेऽह्नि द्वादशेऽह्नि त्रिपक्षे वा त्रिमासि
वा। षष्ठे चैकादशे वाब्दे संपूर्णे वा शुभागमे इति। शुभागम इति यदैव विवाहाद्याभ्युद
यिकं प्राप्तं। ततः पूर्वं सपिंडीकरणं कुर्यात्। एषु चैकादशाहरूपः कालः कर्त्तरि पुत्रे साग्नौ
रेकादशेऽह्नि द्वादशे सति स्यात्। तदाह जोकाम्पाडिनिः। सपिंडीकरणं कुर्यात् पूर्ववि
त्ताग्निमान् सुतः। परतो दशरात्राच्चेत् कुर्यादपरीतरः इति। दशरात्रात्परः एकादशा
हनीत्यर्थः। इतरोऽनग्निः। दारीतोऽपि। यातु पूर्वममावास्यां मृताहादशमी भवेत्। सपिं
डीकरणं तस्याः कुर्याद्देवसुतोऽग्निमानिति। अत्रापि मृताहाद् द्वितीयदिनात्परि
गणने एकादशाहे न भवति। तस्याममावास्यायां दिनं वेद्यर्थः। इद्व वसिष्ठोऽपि प्रथ १५१

मास्यादमावास्यामृता दादशामेह्नि सपिंडीकरणं तत्र कुर्याद्देवसुतोऽग्निमानिति। अत्रा
पि पंचमामर्यां दायां कृताहाद्द्वि दिनमारभ्येत्यर्थः। आग्नेरेकादशोक्ति दर्शायातो पिंड
पितृयज्ञार्थं पूर्वं सपिंडीकरणविधानं। तदाह गालवः। सपिंडीकरणात् प्रेतः पैतृकं पद
मास्थितो। आहिताग्निः सिनीवाल्यां पितृयज्ञः प्रवर्त्तत इति। प्रेतेऽत्र नमौ कर्त्तरि पुत्रेऽग्निम
हादशाहापि कालः। तदुक्तं भविष्योत्तरे। यजमानो निरग्निमान् राजन् पुत्रेण आनग्निमान् न
वत्ता द्वादशाहेन दाता कार्यं सपिंडीकरणं सुतैरिति। यजमानः क ज्ञेय यदा एकादशेऽह्नि स
पिंडीकरणं कुर्यात्। तत्रैव पूर्वमाद्यादि षोडशश्राद्धं तच्चापृथक्पाकेन सपिंडीकरणं कु
र्यात्। यत्तु कात्यायनवचनं। एकादशेऽह्नि निर्वर्त्य प्राक् दशाहं यथाविधिः। प्रकुर्वीताग्नि
मान्विप्रो मातापित्रोः सपिंडतामिति। अस्यायमर्थः। दशाहादूर्ध्वमेकादशाहं एकादशा
हमाद्यं श्राद्धं निवर्त्य पश्चात्सपिंडतां कुर्वीत इत्यर्थः। अत्र आद्यास्वमेव वसूनामाद्यमे
कादशाहनीति वाक्यविरोधः स्यात्। एकादशाहमिति षोडशश्राद्धोपलक्षणं। श्राद्धा

निषोडशाद्वा नैव कुर्यात्सपिंडतामिति। षोडशश्राद्धकरणे सपिंडीकरणेधिकाराना
वात्। कर्तव्यं न भोक्तेवाहिताग्नेः तृतीयः पक्षः कालः। तदाह सुमंतुः। प्रेतश्चेदाहिताग्नि
स्यात्कर्ता निरग्निर्यदा भवेत्। सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयकमिति। अनग्नी
नां तु द्वादशाहाद्याः सप्त काला भवंति। न च द्वापरे इतरद्व्यनग्नेः संवत्सरादूर्ध्वं कार्यमि
ति निवचनात्सपिंडीकरणविधिना कथं सप्तकाल इति चेत्। सत्यं। स एव मुख्यः का
लः। तत्र देशकालादिस्थाध्यनियतया द्वादशाह एव कार्यं। तदाह व्याघ्रः। आनंत्या
त्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते। अ
ति तत्रादिसंभवेच्च पक्षादिकालश्चेनोक्तः। तदुक्तं भविष्ये। वरा सपिंडीकरणं कुर्याद्वि
डमानस्तु न त्रिमासे। अनाहिताग्नेः प्रेतस्य पूर्णे संवत्सरे द्वादशेहनि षष्ठे वा त्रि
पक्षे वा त्रिमासि वा। एकादशेपि वा मासि मांगल्यं स्याद्युपस्थितं। षष्ठे मासीत्यत्रयं
ननु साग्निकस्य कर्तुरेकादशाहद्वादशाहरूपकालानियम उक्तः। साग्नेः प्रेतस्यापि १५२

पक्षे नियमः। यदा प्रमादात्तत्र न स्यात्तदैव। तदा सपिंडीकरणलोप इति चेन्न। गोभि
लेन कालांतरविधानात्। द्वादशाहादिकालेषु प्रमादादननुष्ठितं। केनसाहेच्छाशांक
यात्तु यत्। तत्र विष्णुः। संवत्सरांते प्रेताय तत्पित्रे तत्पितामहाय च ब्राह्मणान्देवपू
र्वं भोजयेदिति। प्रेतपिंडमर्घ्यपात्रं देवतपिंडत्रये निदध्यादिति। पितामहे जीवति
तु ब्रह्मपुराणे विशेष उक्तः। मृते पितरि यस्याथ विद्यते च पितामहः। तेन देयास्त्रयः
पिंडाः प्रपितामहपूर्वकाः। तत्रश्चापिष्टकः पिंडा नियोक्तव्यस्तु पूर्ववदिति। यदा पिता
मह प्रपितामहौ जीवतः तदा प्रेतपितृपितामहपूर्वकाः त्रयः पिंडा देयाः। ननु प्रेतस्य पि
तृपितामहप्रपितामहैः सपिंडीकरणं युक्तं। पितृपितामहयोर्जीवतोः केवलप्रपितामह
मात्रेण कथं पितृत्वमिति चेत्। सत्यं। त्रयाणां मध्ये एकेनापि सपिंडने पितृत्वासिद्धेना
त्। तदाह सुमंतुः। त्रयाणामपि पिंडानामेकेनापि सपिंडने। पितृत्वमश्नुते प्रेत इति च
मोत्यवस्थितं। त्रयाणां पिंडानां प्रेतसंबंधिपितृपितामहप्रपितामहपिंडानां ननु चक्र

मृतानां सपिंडीकरणं निषिद्धं। यथा। वृद्धक्रमात्प्रमीतानां नैव कार्यं सपिंड
नमिति। अत्र पितामहे जीवति प्रपितामहादिरित्यादिकं कथमुपपद्यत इति चेन्न।
उच्यते। निषेधवाक्यं मातापितृभर्तृव्यतिरिक्तविषयं। तदुक्तं स्कंदपुराणे। अक्रमे
णमृतानां तु सपिंडीकृतिरिष्यते। यदि माता यदि पिता भर्ता नैष विधिः स्मृत इति।
पितामहे पुत्रांतरैरसंस्कृते प्रपितामहे वा संस्कृते पितृमरणे सति। असंस्कृताभ्यां
पितुः सपिंडीकरणं कुर्यात्। न च सत्याधिकारित्वे तानपि पितृपितामहौ संस्कुर्यात्। तदा
ह कात्यायनः। असंस्कृतौ न संस्कार्यौ प्रपितामहयोरसंस्कृतयोः पितुः सपिंडीक
रणं कथं न स्यादिति चेन्न। स्यां असंस्कृताभ्यामपि ताभ्यामेव सपिंडीकरणं कार्यं। तदा
ह कात्यायनः। पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वा। पितामहेन पितरं संस्कुर्या
दिति निश्चय इति। अत्रापि पापिष्ठमति संस्कारस्य दितानु पापानित्यादिना पति
तानां सपिंडीकरणनिषेधस्तु यथा। गौतमः। पापकर्मणा न संस्कृतेनैव स्त्रियश्च १५३

दुक्तं स्मृत्यर्थसारे। अन्वारोहैकदिनमरणे स्त्रियाः पृथक् सपिंडीकरणं न का
र्यं। भर्तुश्चान्तौ स्त्रियाश्चकृतं भवति। दिनांतरमृते पुत्रः स्वपितृपितामहपिंडमध्ये
कुशानंतर्वा पित्रैकेन मातुः सापिंड्यं कुर्यात्। सर्वत्र भर्तुः सापिंड्यमेके नेच्छं। अ
खुरणानिषिद्धमिति। यमोऽपि। पश्चाच्चैकेन कर्त्तव्यं सपिंडीकरणं स्त्रियाः। सा मृतापि
हि तेन कां गता मंत्राहुतिव्रतैरिति। शातातपोऽपि। मृता याऽनुगता नाथं सा तेन सह पिं
इतो। अर्द्धं तिष्ठति स्वर्गवासो पियावदाहूतसंप्लवमिति। अत्र केचिदाहुः। पश्चाच्चैकेने
ति पतिपदं पितृवर्गोपलक्षणं। अतश्च पितृपितामहैः सपिंडीकरणं कार्यं। अन्य
था सपिंडीकरणप्रमाणविरोधः स्यात्। एकेन चैकविधया सुराहिविवाहोढाया
मातामह्यादिभिः सह सापिंड्यं प्राप्नोति। अत्र आरोहणे चैकेन पतिवर्गेनैव सपिंडीक
रणं कर्तव्यमित्येवंपरमिति। एवं सति देशाचारभेदेन व्यवस्था कल्पनीया। आसुर
गांधर्वराक्षसपैशाचविवाहोढायाः पुत्रो मातामह्यादिभिः सपिंडनं कुर्यात्। नदाहव्या

तांतपः।तन्माता तत्पितामह्या तत्श्वश्रूवा सपिंडनं।आसुरादिविवाहेषु विन्नानां वापितां
स्मृतं।तन्मात्रा तत्पितामह्यंत्र तस्या मातुः सार्धं पितामह्या च इत्यर्थः।ततश्च चेति
मातुः पितामह्याश्च मातुः प्रपितामह्या इत्यर्थः।मातामहेन वाक्यात्तदनुसुमंतुः।
पिता पितामहे पुत्रः पुत्रे संवत्सरात्परतः।माता मातामहे तद्वदित्याह भगवानृषिवह
ति।अत्रापि स्मृतिरियं आसुरादिविवाहोढास्त्रीतः।अत्र आसुरादिविवाहविषयलिखनादा
सुरादिव्यतिरिक्त ब्राह्मदैवार्षप्राजापत्य विवाहवत्वे इयोढायाः पितामह्यादिभिः न
त्रैव सपिंडीकरणं प्रतीयते।तथा च मार्कंडेयः।ब्राह्मादिषु विवाहेषु या व्यूढा कन्य
का सवेत्।भर्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया।आसुरादिविवाहेषु पितृगो
त्रेण धर्मवित्।अष्टवर्षं पितृवत्तारामासंधिनो।पुत्रिका भर्तुमातामहादिभिः स
पिंडीकरणं कुर्यात्।तदाह कात्यायनः।मातुः सपिंडीकरणं पितामह्या सहोदितं।
यथोक्तेन विधानेन पुत्रिकालं च स्मृत इति।पुत्रिकासुतश्चेन मातामहादिभिः क १५५

विधायिणीरिति।असति पुत्रांते पौत्रेणैवंतु पितामहस्य संस्कारः कार्यः।तदाह
कात्यायनः।पितामहः पितुः पश्चात्पंचत्वं यदि गच्छति।पौत्रेणैकादशाहादि कर्तव्यं
श्राद्धषोडशं।नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः।पितुः सपिंडनं कृत्वा पूर्वं सपिं
डनं तथा।पितामहप्रपितामहयोः पश्चात्संस्कारं कुर्यात्।ननु सत्यधिकार्येतारपिपि
ट पितामहो संस्कुर्यात्।असति त्वेककर्याद्विवश्यपरार्कस्मरणात्।पितामहे मृते वृद्धा
दमध्य एव पितृमरणे सति प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति उपक्रांतपिता
महसंस्कारेण विनैव दशाहं ह्येसमापनीय पितृसंस्कारणां तरितिसति पितृसंस्का
रान्नंतरं पुनः पितामहस्य संस्कारं कृत्वा सर्वमावर्तयेत्।अत्र त्वाद्यादिना पितानुष्ठातेन
पौत्रेण पितामहश्राद्धे उपक्रांते पितृमरणे सति।पित्राशौचं वहन्नेव च काले पिता
महश्राद्धं कुर्यात्।उपक्रांतं वा कर्तुं स्याद्वा कर्मणि कौशुद्धिरिति वचनात्।अपुत्रस्य तु
पत्नी सपिंडीकरणं कुर्यात्।तदाह लौगाक्षिः।सर्वजावेषयं पत्नी तत्पूर्णाममंत्रकं

सपिंडीकरणं कुर्यात्ततः पार्वणमेव वा ॥ सुमंतुरपि ॥ अपुत्रेण प्रक्षिते कचनि नवेश्रा-
द्धकर्मणि ॥ तत्र पत्न्याः पितृकर्त्तृ न सापिंड्यात् पार्वणं तथेति ॥ स्त्रीणां सपिंडीकरणं तु
विशेषस्तु उच्यते ॥ तदाह शंखः ॥ मातुः सपिंडीकरणं कथं कार्यं भवेत्सुत ॥ पितामह्या
दिभिः सार्द्धं सपिंडीकरणं स्मृतमिति ॥ पितामह्यादिभिरिति पितामही प्रपितामहीभिः
सार्द्धं सपिंडीकरणं स्मृतमिति ॥ पितामह्यां जीवंत्यां प्रपितामह्यादिभिः कुर्यात् तत्
डुक्तं ब्रह्मपुराणे ॥ मातर्यग्रे मृतायां च विद्यते च पितामही ॥ प्रपितामही पूर्वमुक्ता कार्यस्त
त्राप्ययं विधिः ॥ इति ॥ प्रपितामह्यामपि जीवंत्यां त्रयाणामपि पिंडानामिति वचनात्
पितुः ॥ प्रपितामह्यादिभिः कुर्यात् ॥ अपुत्रायाः पतिरेव श्वश्रूस्त्रादिभिः सापिंड्यं कुर्यात् ॥
तदाह पैठीनसिरपीति ॥ अपुत्रायां मृतायां तु पितुः कुर्यात् सपिंडताम् ॥ श्वश्रूस्त्रादिभिः से
द्दवास्याः सपिंडीकरणं भवेदिति ॥ अथवा रादणात्तु पुत्रः पश्चात् सपिंडनं कुर्यात् ॥ प
कस्मिन्नेव दिने पश्चात् एवं सपिंडीकरणं कुर्यात् ॥ तनिवतस्या अपि जतंस्यात् ॥ तत् १५४

र्यादित्यर्थः ॥ बौधायनोऽपि ॥ आदिष्टौ प्रथमे पिंडे मातरं पुत्रिकासु न इति ॥ द्वितीये पि
तरं तस्यास्तृतीये च पितामह इति ॥ एवं येन केनापि मातुः सापिंड्ये त्रिघष्टकादिश्रा
द्धपितामह्यादिभिः पार्वणं कर्त्तव्यं ॥ इदं सपिंडीकरणं चिरादपि पुत्रैरेव कार्यं ॥ तदु
क्तं च ब्रह्मपुराणे ॥ श्राद्धानि षोडशादत्वा कुर्यान्न तु सपिंडताम् ॥ प्रोषिते पितरि सति पुत्रः का
लादपि चिरादपि ॥ एतद्व्याख्यातमपरार्के ॥ प्रोषिते वसते प्रवासावसाने पुत्रश्चिरा
दपि कालात् सपिंडनं कुर्यात् ॥ ततः षोडशश्राद्धादन्यत्रान्न कुर्यात् ॥ यदि तानि कनिष्ठ
त्रात्रादिष्वदत्तानि ॥ तदा सपिंडनमेव कुर्यादिति ॥ सन्यासिनां तु षोडशश्राद्धसपि
डीकरणानि ॥ न संति ॥ तदाहोशनाः ॥ एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा ॥ अहन्येका
दशे तेषां पार्वणं च विधीयते ॥ सपिंडीकरणं तेषां न कर्त्तव्यं सुतादिभिः ॥ त्रिदंडग्रह
णादेव प्रेतत्वं निवर्तते ॥ इति ॥ त्रिदंडी चैकदंडस्याप्युपलक्षणो ॥ तदुक्तं चतुर्वि
यातिमतो ॥ चतुर्थमाश्रमं गत्वा ब्रह्मविद्यापरायणः ॥ एकदंडी त्रिदंडी वा सर्वसंगविव

ड्ढं तइति। शातातपोऽपि। एकोद्दिष्टं जलं पिंडमाशौचं प्रेतसत्क्रियां। न कुर्यात्पार्वणा
दन्यत् ब्रह्मचारी व्रतावधि तावत्। ब्रह्मचर्यादिविषयं स्मृत्यर्थसारविशेषे तूक्तं। यथा ब्राह्मणा
दिहतानां पतितानां प्रायश्चित्तकरणं ब्रह्मचारिणामनुपयानां च सपिंडीकरणं ना
स्ति। तेषां सदैकोद्दिष्टमेव। सत्रानग्निकानां द्वादशाहादयः सप्तकाला उक्ताः। तत्र ब्रा
ह्मणाद्यह्नि सूतकांतोपलक्षणं। ततश्च क्षत्रियवैश्ययोरपि सूतकांत एव सपि
डीकरणं। तदाह कात्यायनः। सर्वेषामेव वर्णानां सूतकांते सपिंडनमिति। वृद्धमनु
रपि। द्वादशाह इति विप्राणां आशौचांत इत्यूह्यतां। विशां नं च त्रिपक्षाद्वा वर्षवास्याम
पिंडनमिति। शूद्रस्यापि द्वादशाह एवेति तदाह विष्णुः। मंत्रवर्ज्यं हि शूद्राणां द्वादशाहे
नमिति विष्णुना। शूद्रस्य द्वादशाहाभिधानात्। सर्वेषामपि वर्णानामिति वचनं। ब्राह्म
णादिवर्णत्रये विशेषमेवोक्तकालेष्वपि सपिंड्यत्कं तेषु न कर्तव्यविशेषः। स्मृत्य
र्थसारे नोक्तः। अन्वराधर्दि कसत्वशूद्राणां वा समाचारदिति। गालवोऽपि। सपिंडीक १५६

रणश्राद्धं उक्तकाले न चेत्कृतं। षोडशे च रात्रिणां मंत्रेणैवासमाचारदिति।
तोऽर्धं मघा। मित्रमनुराधा। संवत्सरादर्वाक् सपिंडीकरणे कृतेऽपि संवत्सरपर्यंतं
संकल्पविधानेन पार्वणं सोदकुंभं श्राद्धं कुर्यात्। तदाह याज्ञवल्क्यः। अर्वाक् सपिं
डीकरणं यस्य संवत्सराद्भवेत्। तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विज इति। तस्या
पीय पिंडाष्टेन संवत्सरादर्वाक् कृतस्य सपिंडस्य समुच्चयः। अयं तु विशेषः। अस्मा
तसपिंडास्यैकोद्दिष्टोक्तत्वात् सपिंडनस्य पार्वणो। तत्रापि विशेषो। तमनाकः। अदेवं
पार्वणश्राद्धं सोदकुंभं मासिकं। कुर्यान्नु प्रत्याब्दिकश्राद्धात् संकल्पविधिना चह
मिति। अधर्मकं दानोक्ताः। पुनर्नोडिनाद्विधमरिहितं। विवाहमौंजीबंधनाद्यर्द्धव
र्षमर्द्धवर्षं च सपिंडीकरणं न वृद्ध्याद्यषोडशश्राद्धप्रत्याब्दिकगयामहालयश्राद्धव
तिरिक्ते अमावास्याश्राद्धं पिंडरहितं तत्कुर्यात्। तदाह कात्यायनः। मौंजीबंधनादि
वा। अर्द्धवर्षं वर्षमेव वा। पिंडासपिंडानादेकः सपिंडीकरणाद्धत इति। सपिंडीकर

ण्यां द्यो: वनवासादयोऽष्टौ श्राद्धानामपकर्षकाः॥ स्मृतिसंग्रहे: पितुर्विवाहोप
नयनादूर्ध्वं वर्षं वर्षार्द्धमेव वा। न कुर्यात्पितृपिंडनिर्वापं न दद्यात्करणानि च। तीर्थगमनम
एवाह। महालयं गयाश्राद्धं मातापित्रोर्मृतेऽहनि। कृते चाहोपि कुर्वीत पिंडनिर्वपणं
सुत इति। उक्तकालव्यतिरिक्ते च अमावास्याकाले संकल्पश्राद्धं कुर्यात्॥ इति सपिं
डीकरणनिर्णयः॥ अथ संकल्पश्राद्धं। सांगपार्वणादिश्राद्धकरणे अशक्तस्याक्ला
न्तस्य संकल्पश्राद्धं कुर्यात्। अत्र क्रिया आवाहनादिना न चालस्यनात्तदुक्तं स्मृतिसंग्र
हे। अंगानि पितृयज्ञस्य यदा कर्तुं न शक्नुयात्। संकल्पश्राद्धमेवासौ कुर्याद्दर्शादि
वर्जितमिति। आदिशब्दादावाहनाद्युपसंग्रहः। संकल्पश्राद्धे अर्घ्यावाहनानौकर
णपिंडप्रदानवाचनानि विवर्जयेदिति। व्यासोपि। यत्र कार्ये पार्वणं नैव नैकोद्दिष्ट
सपिंडनं। तत्र कार्यं स्वपिंडाक्षितं तस्मात्संकल्पेन तत्रयेदिति। अकार्यं नाक्षिकेना
रुष्टाये॥ इति श्रीसूर्यसेनविरचिते निर्णयामृते सात्विकसपिंडीकरणादिनिर्णयः॥ १५७

ना॥ अथाभ्युदयिकं। तच्च त्रिविधं। विवाहादिनित्यनिमित्तं। पुत्रजन्माद्यनियतनिमि
त्तं। अग्न्याधानादिनिमित्तं चेति। तत्र विवाहादिनिमित्तं प्रातः कार्यं। तदाह शातातपः
प्रातर्वृद्धिनिमित्तकमिति। अत्र प्रातःशब्दः सार्धप्रहरात्मककालवाचकः। तदाह
गार्ग्यः। ललाटसंमितेनानौ प्रथमः प्रहरः स्मृतः। स एवार्धसंयुक्तः प्रातरित्यभिधीय
त इति। अग्न्याधाननिमित्तं वृद्धिश्राद्धं अपराह्णे कुर्यादिति स्थितिः। पुत्रजन्मादिनिमि
त्तस्यानियतत्वान्नियतानंतरमेव तत्कार्यं। आभ्युदयिकश्राद्धं मातृपूर्वकमेव कार्यं।
तदुक्तं। मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनंतरं। ततो मातामहानां तु एवं नांदीमु
खं च वदति। नांदीमुखं आभ्युदयिकं श्राद्धं॥ अथ नांदीमुखनिमित्तान्युच्यंते। तत्र
कार्ष्णाजिनिः। कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः। नामकर्मणि बालानां चूडाक
र्मादिके तथा। सीमंतोन्नयने चैव पुत्रादिमुखदर्शने। नांदीमुखान्पितृगणान्पूज
यत्प्रयतो गृही। पुत्रादीत्यादिशब्दात्पुत्रमुखदर्शनादेरुपसंग्रहः। गार्ग्योपि

पुत्रोत्पत्तिप्रतिष्ठासु सुतमौंजीत्यागबंधने। चूडायां च विवाहे च वृद्धिश्राद्धं विधीयत इ
ति। वृद्धगार्ग्योपि। अस्याधानानि पकादाविष्टापूर्ते स्त्रियाहृते। वृद्धिश्राद्धं प्रकुर्वीत।
श्रमयदृणेन थतो। स्त्रियः कृता वा यथ एवा मत्स्यपुराणेऽपि। पित्र्यमवानंदसंतानं यज्ञोढा
द्वादिमंगले। मातरः प्रथमं पूज्याः पितरस्तदनंतरं। ततो मातामहानां च विश्वेदेवास्त
थैव च। इति। अत्रैव विशेषो गार्ग्येणोक्तः। मातृश्राद्धं तु पूर्वेद्युः कर्माहनि तु पैतृकं। मा
तामहं चोत्तरद्युः वृद्धौ श्राद्धत्रयं स्मृतं। इति दिनत्रयकरणादिसं नवशुनकर्मदिना
नुपूर्वदिने श्राद्धत्रयमपि कुर्यात्। तदाह शातातपः। इष्टयदिन वृशक्य एकस्मिन्नपू
र्ववासरे श्राद्धत्रयं तु कुर्वीत वैश्वदेवं तु तांत्रिकमिति। वृद्धिश्राद्धे दधिबदराद्भिः पि
डदानं कुलाचारप्राप्तं चेत्कुर्यान्नि चेन्न कुर्यात्। तदुक्तं नविष्योत्तरे। पिंडनिर्वपणं कु
र्यान्निवाकुर्यान्नराधिप। वृद्धिश्राद्धे महाबाहो कुलधर्माननवेक्ष्य त्विति।। इति वृद्धिश्रा
द्धनिर्णयः।। ।। अथ जीवच्छ्राद्धं।। वर्जं तु रसतिअच्छादिना वा जीवा यश्राद्धं दद्यात् तत १५८

दुक्तं ब्रह्मपुराणे। देशकालधनश्राद्धव्यवस्थायेसमुच्छ्रितो जीवितमतिर्जीवाय
दद्याच्छ्राद्धं यथेनर इति। इति जीवच्छ्राद्धं।। ।। अथ संक्रांतिनिर्णयः प्रारभ्यते। तात्र कुंलं 3
संक्रांतयो द्वादश तासु मकरकर्कटौ तु दृग्दक्षिणायनौ तुलामेषौ विषुवौ वृष
वृ वृश्चिकसिंहा घा विष्णुपद्यः। धनुर्मीनकन्यामिथुनाः षडशीतयः। तथाह वृद्धवसिष्ठः।। अथ
नं विषुवं च तस्य षडशीतयः। वनस्था विष्णुपदास्तु संक्रांत्यो द्वादश स्मृताः।। मृगा
मकर्कटसंक्रांती द्वे तु दृग्दक्षिणायने। विषुवे तु तुलामेषौ गोलमध्ये ततोपराः इति। मृगो
मकरः। गोलं चलनं। अयनविषुवयोर्गोलकमध्यस्थ्यर्थः। ज्योतिर्विसिद्धोपि। वृष
वृश्चिककुंभेषु सिंहे चैव यदा रविः। एतत् पदं नाम विषुवादधिकं फलं। कन्यायां मि
थुने मीने धनुष्यपि रवेर्गतिः। षडशीतिमुखाः प्रोक्ताः षडशीतिगुणाः फलैरिति। अ
सामवसंक्रांतीनां वारनेदेन संज्ञानंदो रत्नमालायामुक्ताः। घोरा रवौ ध्वांक्षं तदुक्त
नोवसंक्रांति घोरा च महोदरी स्यात्। मंदाकिनी इंदुचरा च मंदा मिश्रा बुधे गौरसहासि
ग

काष्टिकेवा॥ एतासां च फलं तत्रैवोक्तं। ध्वांक्षी वित्तदानू सुखयति महोदर्यलं चौरसार्थान्
घोरा शूद्रानथ नरपतीन् वमं दाकिनी चो मंदाख्यातद्विजवरगणान् मिश्रकाख्या प-
शूंश्च चंडालानां प्रहंति मखिलो राक्षसी संज्ञिता चेति। इदमेव फलं येनचित्रे योगि
संपूर्णं भूर्लवृत्तौ ताप्यपि स एवाह। तत्रैव हि प्रचारो मैत्रध्रुवमिश्राख्यदारुणाः। उक्तध्वां-
पे:१ संक्रांति केर्कस्य घोराद्याः क्रमशः मताः॥ अस्यार्थः। रविवारस्त्वग्रसंज्ञिकानां पूर्वात्रि
यभरणी मघानां नामन्यतमसंयोगे यदा संक्रांतिर्भवति तदा घोरफलं संपूर्णं। उ
नयं यथा घोरत्वासिद्धेः सोमवारे लघुसंज्ञानामश्विनी पुष्यहस्ताभिजितामन्यतमसं
योगसंक्रांतौ महोदरी फलं संपूर्णं। बुधवारे मैत्रसंज्ञकानां चित्रा रेवती मृगशिरा-
नुराधनामन्यतमसंयोगे संक्रांतौ मंदाकिनी फलं संपूर्णं। गुरुवारे ध्रुवसंज्ञि-
कानां रोहिणी उत्तरात्रयाणामन्यतमसंयोगे संक्रांतौ मंदा फलं संपूर्णं। शुक्रवारे मिश्र १५९
संज्ञयोः कृत्तिकाविशाखयोरन्यतमसंयोगे संक्रांतौ मिश्रफलं संपूर्णं। शनिवा
ध्वांक्षीफलं संपूर्णं। भौमवारे धनिष्ठा पूर्वत्रय भरणी स्वाति शतभिषानामन्यतमसंयोगे संक्रांतौ ०

क्षिप्रसंज्ञानां लघु क्षिप्रम् हस्तअश्विपुष्य...

पूर्वसंहिताकामां० म्ह ५४

४ मूल। न २

र दारुणानां ज्येष्ठार्द्राश्लेषामूलानामन्यतमसंयोगे संक्रांतौ राक्षसीफलं संपूर्णं
भवति। वारनक्षत्रयोर्विपर्यये वारनक्षत्रप्राबल्यं मिश्रफलं भवतीति। आसामेव
वेलाभेदेनापि फलभेदं स एवाह। पूर्वाह्निकाले नृपतिं द्विजेंद्रान् मध्यंदिने वाथ
विशः परान्हे शूद्रान् रवावस्तमिते प्रदोषे पिशाचान् निकानर्धरात्रे चरान् निशीथेन
टादिकांश्चापररात्रिकाले प्रत्यूषकाले पशुपालकांश्च संक्रांतिरर्कस्य समघ्न
लिंगिप्रातस्तं संध्यासमये निहंति। सर्वासु संक्रांतिषु श्राद्धस्नानदानादिक्रिया
ता तदर्कं पुलक्ष्यन। अयनद्वितये श्राद्धं विषुवद्वितये तथा। युगादिषु च कुर्वीत
पिंडनिर्वपणादृते इति। इति वृद्धवसिष्ठोऽपि। अयने कोटिगुणं स्यात् लक्षं तु विषु
वे फलं। षडशीत्यास्तु सहस्रं तु फलं विष्णुपदीषु चेति। अयनादिषु तत्स्नानदानादि
कं कोटिगुणादिफलं भवतीत्यर्थः। शातातपोऽपि। सूर्यस्य संक्रमे पुण्ये न स्ना
यादिह मानवः। सप्तजन्मनि रोगी स्यात् दुःखभागी च जायते। संक्रांत्यां यानि दत्ता

निर्द्दिष्टानि मानवैः। तानि तेभ्यो दद्याद्दायर्कीसमत्रोन्मानिनिश्चितमिति। स्मृ
त्यंतरविशेषस्तु क्वः। मध्ये विषुवति दानं विष्णुपदे दक्षिणायने चादौ। षडशीति
मुखे तीते तथा चैंदगयने स्तूरि फलमिति मत्स्यसंक्रांत्यादिषु स्नानं विहितं सर्वसं
क्रांतिसमयो निमेषादपि सूक्ष्मत्वेन चात्तुरा तं ज्ञातुं शक्यः। अथ तावति काले स्नानादि
कं कर्त्तुं कथं शक्यमिति चेन्नु सत्यं। मुख्यकालस्य सूक्ष्मत्वात् तत्संनिहित पूर्वस्मि
न्परस्मिन्वा काले स्नानादिकं कार्यं। तदाह वृद्धवसिष्ठः। संक्रांतिसमयः सूक्ष्मो दु
र्ज्ञेयः पिशितेक्षणैः। तद्योगाच्चाप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रकाः इति। इदं सामा
न्यात्सर्वसंक्रांतितिथिविषयं। विशेषस्तूच्यते। कर्कटे पूर्वतस्त्रिंशन्नाड्यो मकरा
परा विंशतिर्नाड्यः पुण्याः। तदाह वृद्धवसिष्ठः। अतीतानागते देदद्दक्षिणायने
त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः परा इति। विषुवतोश्च प्राक्पश्चाच्च दश
दश नाड्यः पुण्या यथा एवादौ वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दशेति। वि १६०

प

ष्णुपदीषु तु प्राक् षोडश पश्चात् षोडश नाड्यः पुण्याः। तदाह वृद्धवसिष्ठः। पु
ण्यायां विष्णुपद्यां तु प्राक् पश्चादपि षोडशेति। षडशीतिमुखेष्वनु षष्टिनाड्यः पु
ण्याः। यथाह स एव। षडशीत्यां व्यतीतायां षष्टिरुक्तास्तु नाडिकाः। अत्र केचित्तु
षडशीतिमुखानां पुण्या विष्णुवायनाधिकफलत्वमसहमाना इदं वचनमन्य
था व्याख्यातवंतः। यथा षडशीतिमुखीनां संक्रांतीनां चतसृणामेकैकस्याः पंच
दश पंचदशेति मितानां पुण्याख्याः षष्टिनाड्यो भवंति। यद्येकैकस्याः षष्टिपु
ण्याः स्युस्तदा नूनं तदेतासामेव सर्वाभ्यः प्रकर्षः प्राप्नोति। प्रकृतपुण्यकालत्वात्। यथा
सती। देवीपुराणे विष्णुवायनसन्निधौ विहितविष्णुवायनसंज्ञितानां प्रकर्षविधा
नेन विरोध इति तन्निरस्तं सद्भिः। अधिकफलत्वस्यैतद्विष्णुपदं नाम विष्णुवादधि
कफलमिति चेन्न। अथवा दरूपेणापि वर्षे यितुं शक्यत्वान्नाप्यधिकफलत्वानावे
किंचिन्नियामकं। देवीपुराणवचनं च विष्णुवायनयोः प्रकर्षमभिधत्ते न तु नदिरे

प्रादिपर्यन्तः। बौधायनपक्षेहुत्तरसंक्रान्तीनामपि। वाक्यान्तरेण प्रकर्षाभिधानान्न
चैवं लभ्यते। विष्णुपदीनां चतुर्विधत्वरूपार्थ दशश्यकेऽन्न शिव इति। अन्यथा विष्णु
पदीषडशीतिमुखेष्वाधिकफलत्वनिरासायोतासामपि मिलितानां षोडश नाड्यः
पुण्या। इति। व्याख्यानं प्रसज्यते। न चापि कश्चिदेवं व्याचष्टे। प्राक् पश्चादपि षो
डशेति प्रागष्टौ पश्चादप्यष्टाविति मिलित्वा षोडशेति। एवं च सति वर्त्तमाने तुला
मेषयोर्नाड्यः सूत्रयतो दशोच्यत्राप्येवंविधव्याख्यानस्य वक्तुं शक्यत्वान्नानिमित्त
सिद्धिः। किं चायतनष्टौ मिलितानां षष्टिर्नाड्यः पुण्या इत्युक्तेऽपि विष्णुपद्याधिकफ
लत्वं तदवस्थमेवानयोरर्थान्तरस्यैवं व्याख्यानमित्यपेक्षणीयमित्यलमतिविस्त
रेण। न तु संक्रान्तिसामान्यविषयत्वेनाथश्रोत्रिंशन्नाड्यः पवित्रा इत्युक्तं। वा
क्यान्तरेषु दश षोडशादीनां पुण्यत्वमुक्तमिति विरोध इति चेत्। न। त्रिंशन्नाडीनां
पुण्यत्वं षोडशादीनां नाडीनां तत्रैवात्यासन्नत्वादिति। तातु पुण्यतरत्वं तेनापि सान्नि १६१

दिनार्धं पुण्यतमं मत्रमिश्रविधानः। तदाह वसिष्ठः। याम्यायां संनिहितानां नाड्यः स्नानाद्याः पु
ण्यतमाः स्मृता इति। यत्तु वृद्धवसिष्ठवचनं। अर्धरात्रः संक्रमणे पुण्यमहः इत्युक्तं प्रकीर्तितमि
ति। तत्रापि पृथक्त्वे एवं संनिधिविशेषात् फलविशेषः कल्पनीयः। अयं निर्णयो दि
नद्वयसंक्रान्तिविषयः। रात्रिसंक्रमे तु विशेष उच्यते। अर्धरात्रादधो रात्रौ संक्रमे
पूर्वमहो मध्यमः कालः तु परस्नानादौ पुण्यं। अर्धरात्रादूर्ध्वं संक्रमे तु परदिनो मध्यमा
पर्यन्तं पुण्यं। तदाह वृद्धवसिष्ठः। रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः। अर्ध
रात्रादधस्तस्मिन् मध्यमस्योपरि क्रिया। ऊर्ध्वं संक्रमणे चोर्ध्वमुदयात्प्रहरद्वयमिति
तथाच। अस्तं संक्रमे पुण्यं दिनार्धं स्नानदानयोः। रिति। यदा संध्येऽर्धरात्रे संक्रान्तिस्ता
न्तदा दिनद्वयं पुण्यं। तदाह वृद्धवसिष्ठः। संक्रमस्तु निशीथस्याप्रद्याममात्पूर्व पश्चिमाः
संक्रान्तिकाले विद्यात्पूर्वतः स्नानादिकं चरादिति। द्योतिर्वसिष्ठोऽपि पूर्णे निशीथे वार्धे
रात्रे यदा संक्रमते रविः। तदा दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ। विति मकरक

कर्कटयोस्तु विशेषः। तदाह वृद्धगार्ग्यः। यद्यस्तमयवेलायां मकरं याति भास्करः। प्रदो-
षे वार्धरात्रे वा स्नानं दानं परेऽहनि। अर्धरात्रे तदूर्ध्वं वा संक्रान्तौ दक्षिणायने। पूर्वमे-
व दिनं ग्राह्यं यावन्नोदयते रविरिति। भविष्योत्तरेऽपि। मिथुनात्कर्कसंक्रान्तिर्यदि
स्यादंशुमालिनः। प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः। कार्मुकं तु परित्यज्य [redacted]षं
संक्रमते रविः। प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनीति। ऋषं मकरं चेत्युवचनं। आ-
दौ पुण्यं विजानीयाद्धनुर्भिन्नातिथिर्भवेत्। अर्धरात्रे व्यतीते तु विज्ञेयमपरेऽहनी-
ति। अस्यार्थः। यद्यर्धरात्रे पूर्वदिनतिथ्या अभिन्ना तिथिर्भवति तदा पूर्वदिनं पुण्यं।
भिन्नायां तिथावर्धरात्रे व्यती[redacted]ते च परदिनं पुण्यमिति। तथा। आसन्नसंक्रमं पुण्य-
मित्यादिवाक्यानि तु मकरकर्कटव्यतिरिक्तसंक्रान्तिगोचराणि विषयत्वा[redacted]निरवकाशानि।
अतश्च सावकाशानि निरवकाशो विधिर्बलवानिति न्यायात् [redacted] परदिनस्य पु-
ण्यत्वं। कर्कटे तु पूर्वदिनस्य पुण्यत्वं चयुक्तं मन्त्रायचा। आसन्नसंक्रममित्यादेस्तु १६२

निरवकाशये २ सर्व ३ सा: [redacted]रवकाशानि। मिथुनात्कर्कसंक्रान्तिरित्यादि। नितु मकर
कर्कटमात्रविषयादन्यत्र २

तुऊश्री व्यनुक्ता ४

नो

सामान्यविशेषयोर्मिथुनात्कर्कसंक्रान्तिरित्यादिना विशेषविधिर्बाधितः इ[redacted]त्यपि
मकरकर्कटयोः परपूर्वदिवसयोरेव पुण्यत्वमुक्तं। कर्कटे पूर्वदिनस्य पुण्यत्वं
तु क्वाचित्कं युक्तमिति युक्तं। आसन्नसंक्रम इत्यादीनि देवीपुराणोक्तवाक्यानि मूलवाक्यानि
मिथुनात्कर्कटे[redacted] संक्रान्तिरित्यादिवाक्यानि दृश्यमानानि यानि कानि[redacted] नात्र किंचिन्निया- न्यधुनातन नीह वाक्यत्व ५
मकं। मूलवाक्यत्वे [redacted]तु वृद्धगार्ग्यभविष्योत्तरप्रतिपादकानि वचनानि बंधनएवं प्रमा-
णं। यज्ञातीरवाक्ये। आह्निकचन्द्रिकायां स्मृत्यन्तरे रात्रौ वेदान्समुद्धयं। संक्रान्तिः पक्षिणी ज्ञे-
या दानाध्ययनकर्मसु इति। [redacted]त्रवाक्ये मकरकर्कटदिनद्वयस्यापि पक्षित्वमुक्तं तदा
नाध्ययनकर्मविषये द्रष्टव्यं। अत्र दानं वेदाध्यापनं। अत्र कर्माणि चाध्यायनांगानि
एवेति तदपि न युक्तिसहं। अयनस्यानध्ययवचनं तत्राध्ययनस्यासंभवात्। तदा-
ह याज्ञवल्क्यः। अयने विषुवे चैव शयने बोधने तथा। चातुर्मास्यद्वितीयासु वेदाध्ययनं
विवर्जयेदिति। किंचाध्यापकानामध्ययनमयं समुदा[redacted]चारः। तेन मकरकर्क-

योपंतु ५

टयोर्दिनद्वयं दिनद्वयं नाध्ययपर्यंतिरात्रौ।नाधीयीतेत्युक्तं स्मरणस्य वचनेनैव
विरोधेपिस्यात् तन्नाध्ययनेप्ययं दोषः समान इति चेत् न।अत्राध्ययनशब्दे
नस्वाध्ययनेनार्द्रये दर्षीनिति।प्रत्यहं विहितधर्मे ब्रह्मयज्ञरूपस्वाध्यायस्यावि
वहितत्वात्।तस्यानध्ययेप्यपि न निषेधः।तदुक्तं स्मृतिसंग्रहे।नानुरोधोस्त्य
नध्याये होममंत्रेषु चैव हि वेदोपक्रमणे चैव स्वाध्याये नित्यके इति।अतश्च म येव ५
करकर्कटयोरुक्त एव निर्णयः साधीयान्।अत्रापि रात्रिनागसंनिहितयात्तु पुण्य
तमत्वात् संक्रांत्यां तु रात्रौ न कुर्वीत दानं चैव विशेषत इति।रात्रौ स्नानदाननिषेध
सति कथं रात्रिनागस्य पुण्यमिति चेत् तस्यां संक्रांत्यादिषु रात्रावपि स्नाना
दिविधानात्।तदाह व्यासः।राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु।स्ना
नदानादिकं कुर्यात् तु निशि काम्यव्रतेषु च।इति श्रीसूर्यसेनमहीमहेन्द्रवि
रचिते निर्णयामृते संक्रांतिनिर्णयः॥ ॥श्रीमत्पंडितनाथः सुधीः॥ ॥अथप १६२

स्नानं ५

संगान्नदीनां रजोदोषप्रसंगः।अत्यते तदाह व्याघ्रपदः।सिंहकर्कटयोर्मध्ये सर्वनद्यो रज
स्वलाः।तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥इति।मदनदीपे विशेषो विष्णुना।आदौ
कर्कटके देवि महानद्यो रजस्वलाः।त्रिदिनं तु चतुर्थेह्नि शुद्धाः स्युर्जाह्नवी यथा।इति।गंगादिविष
ये तु स्मृतिसंग्रहे विशेष उक्तः।तपनस्य सुता गंगा गौतमी च सरस्वती।रजसा नाभिभूयंते वेणा
च नदसंज्ञिता इति।रजोदुष्टजलं गंगादिजलसंयुक्तमदुष्टं भवति।तदुक्तं महाभारते।अप
वित्रमपि प्राप्य गंगायाति पवित्रताम् इति।मत्स्यपुराणेपि पुण्यांभसा समायोगाद् दुष्टम
प्यंबु पावनमिति।इति संक्रांतिप्रसंगान्नदीनां रजोदोष उक्तो मलमासस्यापि संक्रांति
मूलत्वान्मलमासनिर्णयं ब्रूयते।मलमासो नाम संक्रांतिरहितो मासः।संक्रांतिद्वययुक्तो
प्रस्तु ४ वा।तदुक्तं काठकगृह्ये।यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा।मलमासः स विज्ञेयो
मासः स्यात्तु त्रयोदश इति।अयं च मासश्चांद्र एव।अतश्च यत्रामावास्याद्वयमध्ये संक्रांति
द्वयं वा भवेत् स मलमासः स्यादर्थः।तदाह गार्ग्यः।अमावास्याद्वयं यत्र रविसंक्रांतिवर्जितं म

श्रा॰

त्तमासः स विज्ञेयो मासः स्यात्त्रिंशत्तु वासरः इति। अस्यैव मलिम्लुच इति संज्ञा। तदाह
वसिष्ठः। मासे संवत्सरस्यैव वतिथिद्वैधं यथा भवेत्। तत्रोत्तरोत्तमो ज्ञेयः पूर्वस्तातु मलिम्लु
च इति। अधिकमाससंज्ञापि। असंक्रान्तमासस्त्वाद्यो मलिम्लुचो ज्वरः स्मृतः। द्विसंक्रान्ति
मासस्तु मलमास एव नाधिकमासः। तदाह सत्यव्रतः। राशिद्वयं यत्र मासे संक्रमेत दिवा
करः। नाधिमासो भवेद्दैव मलमासस्तु केवल इति। अयं द्विसंक्रान्तमासः क्षयाख्यः। पि
तदुक्तं ज्योतिःशास्त्रे। असंक्रान्तमासोधिमासः स्फुटं स्यात् द्विसंक्रान्तमासः क्षयाख्यः क
दाचित्क्षयः कार्त्तिकादित्रयेनान्यतः स्यात्तदा वर्षमध्येधिमासद्वयं चेति। द्विसंक्रान्तिमासो य
त्र भवति तत्र वर्षमध्ये मासद्वयं भवति। तदा परो दुष्टः। आद्यः शुद्धः। तदुक्तं तत्रैव। एकैमास २४
द्वितयं च दिस्याद्द्वौ अधिकं तत्र पराधिमासः। आद्यो द्वितीयश्च तिरादवेदवत्तर्दर्शःक्कापिन
२८७ चास्ति दृष्टः इति। अयं त्रयोमासश्चांशः एवं न सोऽयं। तदुक्तं। अस्ति त्रयोदशो मासः स
वत्सश्चांनिगद्यते। असोवांशामंसोर स्यात् नास्ति सोरस्य तद्दश इति। अयं त्रया १६४

दशो मासस्त्रिंशन्मासादूर्ध्वं षड्विंशाद्वमान्मासात्पूर्वं भवतीति नियमः। तदुक्तं
ज्योतिःशास्त्रे। त्रिंशात् षड्विंशमासस्य बाह्याभ्यन्तरयोर्द्वयोः। अधिमासो वकल्पे नवा
दरायणकी त्तित इति। अयेनोरवा संक्रान्तस्य संसर्पक इति। संक्रान्तस्याद्वर्पतिरिक्त
संज्ञातरवा। तदुक्तं दर्शद्वयं यदेकस्मिन्नसौ स्यात्संसर्पको भवेत्। अदर्शतिर्यादिकस्मि
श्चांद्रो संक्रमो न तदा संसर्पोद्वर्पती वति द्विविधश्चाधिमासको। मासोऽहस्पतिरोतु छोपर
पूर्वो श्रुतावदा इति। अत्राधिमासशब्देनोपचारतो मलमास एवोच्यते। अन्यथाना
धिमासो भवेद्दोष इति सत्यव्रतवचनविरोधः स्यात्। अत्र द्विविधेपि मलमासे नित्यगति
कं नित्यनैमित्तिकं च कुर्यात्। तदुक्तं काठकगृह्यपरिशिष्टे। मले नित्यगतिं नित्यां कुर्या
न्नैमित्तिकीं क्रियामिति। बृहस्पतिरपि। नित्यनैमित्तिके कुर्यात् प्रयतः सन्मलिम्लुचे।
तीर्थश्राद्धं गजच्छायां प्रेतश्राद्धं तथैव चेति। अमापिंडगर्ते वार्धुषिके कृत्ये श्राद्धकर्मा
णि मासिके। सपिंडीकरणं नित्यनाधिमासं विवर्जयेत्। तीर्थस्नानं जपो होमो यव

:मायेप :तदोत्तरेप

द्धीदितिलादिभिः॥ जातकर्मान्नकर्माणि नवश्राद्धं तथैव च॥ मघात्रयोदशीश्राद्धं
श्राद्धान्यपि च षोडश॥ चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं॥ कार्याणि मलमासे
पि नित्यं नैमित्तिकं तथा॥ अथ तीर्थस्नानमपि अपूर्वतीर्थस्नानं न भवति॥ तस्य मलमा
सेपि निषेधनात्॥ तदुक्तं॥ मलमासेप्यनावृत्ततीर्थयात्रां विवर्जयेदिति॥ नैमित्ति
कं च यदि पूर्वमासे निमित्तमुत्पद्यते॥ तदा पूर्वं यदा त्वपरमासे उत्पद्यते च तन्मासे
पि कुर्यात्॥ तदाह गार्ग्यः॥ जातकर्मणि यच्छ्राद्धं नवश्राद्धं तथैव च॥ ग्रहणं पुंसवादौ च
तत्पूर्वत्र परत्र चेति॥ निमित्तवशादिति वाक्यशेषः॥ मत्स्यपुराणेप्युक्तं॥ चंद्रसूर्यग्र
हे चैव मरणे पुत्रजन्मनि॥ मलमासेपि देयं स्याद्दत्तमक्षयकारकमिति॥ मरीचिरपि॥
योगे वा नित्ययोगे च सीमंते पुंसवेपि च॥ यद्दानादिकमुद्दिष्टं कृत्वापि न दुष्यतीति॥ नित्यमु नित्यम
ख्यानामपि संध्योपासनादीनां मासद्वयेपि कार्याणि॥ तदुक्तं मंत्रेण॥ मासद्वये यद्य
मि ब्दकेंसंक्रमतादृशौ॥ तत्राद्यो मलिम्लुचः॥ श्राद्धान्यः पार्वणोष्टिरग्निहोम आय १६५

यणं संध्योपासनं पार्वणस्थालीपाकश्च यान्यन्यानि नित्यानि हापयेन्नैनं प्रीजाय
तइति विज्ञायत इति व्यासवचनं॥ अतस्मात्क्रियायाश्च दर्शे मासिकी क्रिया॥
त्रयोदशोत्तताः सर्वराहस्यापरिकीर्त्तिता इति॥ तत्काम्येष्ट्यादिविषयं॥ तदुक्तं गृ
ह्यपरिशिष्टे॥ अवषट्कारहोमाश्च पर्व चाग्रयणं तथा॥ मलमासेपि कर्तव्याः काम्या
इष्टीर्विवर्जयेदिति॥ अवषट्कारहोमा अग्निहोत्रोपासनवैश्वदेवाद्याः पर्व दर्शा
पौर्णमासेष्टिः॥ पार्वणस्थालीपाकश्चाग्रयणं नवान्नेन क्रियमाणेष्टिः॥ स्वापदिपु
रातनान्नालाभे नवान्नलाभार्थं कर्तव्या॥ नवनापदि तस्य निषेधमेव वक्ष्यते॥ नस्य
पुराणेपि॥ दर्शे वा हरहः श्राद्धं दानं च प्रतिवासरं॥ गोभूतिलहिरण्यानां मासेपि स्या
न्मलिम्लुच इति॥ न च मलमासे दर्शश्राद्धकर्त्तव्यमित्युक्तौ ऋष्यशृंगवाक्येन च नि
षिद्धं यथा संवत्सरातिरिक्तेण मासोपि स्यान्मलिम्लुचः॥ तस्मिंस्त्रयोदशश्राद्धं न कु
[illegible] संदधयादिति विरोध इति चेत्न॥ निषेधस्य दर्शाविहितस्य काम्यश्राद्धविषय

यातु तदाद्व्रतावालिः। नित्यं नैमित्तिकं चैव श्राद्धं कुर्यान्मलिम्लुचे। तिथिनक्षत्रवा
रार्कं काम्यं नैव कदाचन। मलमासमृतानां तु भनः प्रत्याब्दिके मलमासे प्राप्ते
मलमास एव कार्यं शुद्धे न दाह्वयः। मलमासमृतानां च यच्छ्राद्धं प्रतिवत्सरं म
लमासे तु तत्कार्यं नान्येषां तु कदाचनेति। वृत्रहाऽप्येवार्थे। संयत पाक्षिकं वर्षे वर्षे
च यच्छ्राद्धं मृतादेतन्मलिम्लुचे। कुर्यान्नित्रयमीतानां नान्येषां तु ग्रासक्षिति। अन्ये
षामिति मलमासादन्यत्र मृतानां शुद्धमास एव कार्यमित्यर्थः। तदुक्तं संग्रहे तेन
वर्षे वर्षे तु यच्छ्राद्धं प्रतिमासं तथैव च। प्रतिसंवत्सरं प्राप्तं मलमासेऽपि नन्यमृत इत्यादि
दमपि मलमासमृताब्दिकविषयं। एवमन्यान्यपि मलमासप्रत्याब्दिकविषयवाक्या
नि मलमासमृतविषयाणि विज्ञेयानि। यत्तु वृद्धवसिष्ठवचनं। आब्दीयादन्निसं
प्राप्तेऽधिमासो भवेद्यदि। मासद्वयेऽपि कुर्वीत श्राद्धमेवं न दुष्यतीति। तथा व्यास
वचनं षष्टिर्दिवसैर्मासः कथितो बादरायणैः। पूर्वमर्धं परित्यज्य कार्या पित्र्यकार्याणि १६६

निवावेद्व्रतोद्यापोऽसग्रहडाकरणमेषलां। मंगलमभिषेकं च मलमासे विवर्जयेदिति। वृषो
त्सर्गः काम्य एवान्येकादशाद्दे क्रियमाणो मलमास एव एतानि वर्जयेद्देवदर्शनमिति देवदर्श
नमपूर्वं। तत्र गार्ग्यः। अदृष्टदेवतां दृष्ट्वा अवसिस्पुनष्टमार्गवी मलमासेऽपि नात्रप्रतीर्थया
त्रां विवर्जयेदिति। शातातपोऽपि। अस्तंगते गुरौ शुक्रे बाले वृद्धे मलिम्लुचे। बंधनं गार्ग्योऽपि ना
मान्नप्राशनं चौलं विवाहं मौंजिबंधनं। निष्क्रमं जातकर्मापि काम्यं वृषविसर्जनं। अस्तंगते
गुरौ शुक्रे बाले वृद्धे मलिम्लुच इति। उद्यापनमपारब्धव्रतानां नैव कारयेत्। नामेति वृका
लातमेवान्दाह गार्ग्यः। नामकर्म जातेष्टिं यथाकालं समाचरेत्। चविपाते कुर्वीत प्रशस्ते
मासि शुद्ध एव इति। वसिष्ठोऽपि। वापीकूपतडागादिप्रतिष्ठां यज्ञकर्म च। न कुर्यान्मलमासेऽपि
महादेवव्रतानि चेति। मरीचिरपि। गृहप्रवेशगोदानस्नानासनदोऽश्ववाहनं न कुर्यान्मलमा
सेऽपि गुरौ शुक्रे तथास्तगे इति। मत्स्योऽपि। आधानं यज्ञकर्मापि प्रायश्चित्तव्रतानि वान
कुर्यान्मलमासेऽपि शुक्रे गुरौ रूपप्लव इति। स्मृतिसंग्रहेऽपि। आधानं पौषमासे द्वार

अपरार्के मयस्यास्यापी द्वाद्वाद्वे के वैरोचपक्षे ४

न्निदोत्रस्यचादिमो प्रतिश्राःपंच कर्माधाम लमासे विवर्जयेदिति। अत्र प्रासंगिकं रु
रोरुद्रक्रयामधिसत्यते। मोघं नामाग्रमयग्रहणात्। त्रापि युरुद्रक्रयामोघं रु
त्रादि कर्मसु परिहरणीयत्वम्। प्रसिद्धं मोघं वृद्धत्वं पश्चात् बाल्यं च मोघं वार्द्धक्ये परिहर
णीयं। नत्वकं ब्रह्मसिद्धांत। सूरविणासतिरन्येषां ग्रहाणां मदग्ने च्युते। तेनोक्तं विद्यार्थकं
मौढ्यादिद्वं बाल्यं प्रकीर्तितं इति। अत्र मौढ्यादर्वशिवस्थावाधिकं मौढ्यादूर्ध्वविस्थावा
ल्यं प्रकीर्तितमिति। तत्र वार्द्धकबाल्ययोः किं प्रमाणमित्यत्रोच्यते। तदुक्तं ब्रह्मसिद्धा
न्ते। पक्षं प्राग्दिशि दृष्टं वृद्धं पश्चात् पंचदिनं कवेः। गौरशाव प्राक् पंचाक पश्चाद्दशदिनं स्मृ
तं। दशाशक्यं तु किं पक्षं प्राक् पक्षौ चौथ्याश्च दृष्टवृद्धस्य पतिरिति। अत्रैव व्यंथां तार भूम्नाधि
कन्नावः प्रतिपादिकः। यथा रत्नमालायां प्राग्भृगुनतः। शिष्यरद्दश्रितयं सितस्पाल्पश्चा
त्। द्वादशमथ पंचदिनानि हृष्टः। प्रत्यक् पक्षं ममरज्यगुरुः स पंचं प्रागथ वागपिवदंति
वसिष्ठमुख्याः। वार्हस्पत्ये पि प्राक् पक्षांड इति। शुक्रः पंचसप्तदिनं शिष्टाः। विपरीतं १६८

वोजयोरिति। इदं वचनद्वयं सांवत्सरव्यतिरिक्तमासिकादिश्राद्धविषयं। तदुक्तं स्मृ
तिचंद्रिकायां योगादिकं मासिकं च श्राद्धं चापरपाक्षिकं। मघादिकं तिथिकं च तथा कुर्या
न्न प्रत्याब्दिकमिति। प्रतिमासिकं कृष्णपक्षे विधीयमानं श्राद्धमुच्यते। न चाश्विनसंबंधि
महालयनिमित्तश्राद्धं नक्तयुक्तितुलयितं इति महालयादिकं तिथौ तु प्रविष्टं वा
कार्यं मलमासे निषेधतः। सर्वमासकृष्णपक्षेषु श्राद्धं आपस्तंबेषु न विहितं। तथा ना
सिमास्यपरपक्षस्यापराह्णः श्रेयान्। तदापरपक्षस्य यद्यन्यान्यहानि सर्वे चापरप
क्षस्याद्यः सुदत्तं पितॄन् प्रीणातीति। मलमासादन्यत्र मृतानामपि देवाद्वैत्रयोदशो
मासेति प्रथमाब्दिकं मलमास एव कार्यं। संवत्सरसपूर्णे सपिंडीकरणपक्षे अयणे
तत्रैव सपिंडीकरणं कुर्यात्। तदाह वसिष्ठः। असंक्रांतेपि कर्तव्यमाब्दिकं प्रथमं वि
नैः। तथैव मासिकं श्राद्धं सपिंडीकरणं तथेति। द्वयमासेपि तत्रैव प्रत्याब्दिकमपि का
र्यं। तदाह सत्यव्रतः। एक एव यदा मासः संक्रांतिद्वयसंयुतः। मासद्वयगतं श्राद्धं म

लमासेपित्र्यास्पत इति। गालवाः। प्रतिवर्षं च षट्त्रयश्राद्धं मातापित्रोर्मृतेदिने मासद्वयेपितत्
कुर्यात् व्याघ्रस्य वचनं यथेति। संक्रांतिद्वयसंयुक्ते वान्मासद्वयात्मिके द्वयमासद्वयर्थः। त्रे
पित्र्याद्वे एवकारार्थः। एवंविधान्याद्यपि वाक्यानि अस्मिन्नेव विषये योज्यानि। कालादर्शका
रिस्तु। प्रत्याब्दिकमपि मासद्वयेपि कर्तव्यमित्युक्त्वा तत्र हेमाद्र्याचारप्राप्तं चान्यमलमासेपि द्वय
दिनस्य वंध्यत्वनिरासार्थं पितृरुद्देशेन ब्राह्मणं भोजयित्वा शुद्धमासे श्राद्धं कुर्यादित्यनवद्या।
नित्यानित्यान्यपि सोमयागादिकर्माणि मलिम्लुचे कार्याणि। तदुक्तं परिशिष्टे। सोमयागादि
कर्माणि नित्यान्यपि मलिम्लुचे। तथैवाग्रयणं न चातुर्मास्यादिकान्यपि। महालयाष्टका
श्राद्धपाककर्माद्यपि कर्म यत्। स्पष्टमासविशेषविहितं वर्जयेन्मल इति। स्पष्टमासे मासवि
शेषनामग्रहणेन विशेषे कर्तव्यमित्याह्निकं मलिम्लुचे वर्जयेदित्यर्थः। अनित्यमनि
मित्तं च महादानादिकमिति ज्ञानकर्म नामान्नप्राशन काम्यव्रतारंभोत्सवव्रतादिकं देव
प्रतिष्ठादिकं च वर्जयेत्। तदाह बृहस्पतिः। अग्न्याधानं प्रतिष्ठां च यज्ञदानव्रतानि १६३

[illegible] हूणेषु [illegible] देशे त्रिदिनं वदंति २

उहुवेन न च देवगुरोरपीति। इत्यादिषु वाक्येषु स्वल्पकालादेशेन दोषापवादिवाक्या
त्यानदानामिहदिशिः। वदवादर्शिताः। कालाप्येवाल्पवादकेपि वा। याद्यास्तत्राधिकारा ग३
पादेशानदाडदेदिति। देशान्तरेन नदस्य गार्ग्यणोक्तः। यथा गुरुः शुक्रो प्राक्पराक्चबा
६४ लाविंध्ये वलिष्ठसप्तरात्रं गंगोत्तरे व्याघ्रवर्षे पूर्वे चिरदेशे त्रिदानं वदंति। अत्र वर्ज्यमग्न्याधा
नं प्रतिष्ठां चेत्यादि मलमासनिषिद्धमेवोक्तं श्राद्धं हेमाद्रौ अपि। यदा रवर्मंडलमतिकाव्यावि
नष्टे तनागुरुरथैव। कालः सदीक्षः विवाहयज्ञोत्सवनाशहेतुरिति। अत्रापि तीर्थया
त्रा अपूर्वविपूर्वाद्यकार्यं। एवं गुरुस्तिंग तद्वद्वक्रातिचारगतः सिंहराशिगतोपि [illegible] कर्म
सुत्याद्याः। तदुक्तं। नीचस्थे वक्रसंस्थेप्यतिचरणगते बालवृद्धास्तगे वा संन्यासो यज्ञयात्राव्रत
नियमविधिः कर्णवेधस्तु दीक्षा। मौञ्जीबंधोगतानां परिणयनविधिर्वास्तुदेवप्रतिष्ठाव
र्ज्याः सद्भिः प्रयत्नात् त्रिदशपतिगुरौ सिंहराशिस्थिते वा। उद्यानकूपव्रतबंधदीक्षाविवा
हयात्रा च वधूप्रवेशः। तडागकूपादिदेवप्रतिष्ठा बृहस्पतौ सिंहगते न कुर्यात्तु गया
शुक्रो गुरुः प्रागपराक्च बालो विंध्ये दशावंतिषु सप्तरात्रौ वंगेषु हूणेषु च ष
ट्वर्षं पंचदश सर्वदेशे त्रिदिनं वदंति॥

विषयविशेषो वास्तु पुराणे चोक्तः। गयायां सर्वकालेषु पिंडं दद्याद्विचक्षणः। अधिमासे जन्मदिने चास्ते गुरुशुक्रयोः। न त्यक्तव्यं गयाश्राद्धं सिंहस्थेपि बृहस्पताविति। अत्र यात्रा पूर्वं चान्यनिषिद्धेत्यर्थः॥ इति श्रीसूर्यसेनमहीमहेंद्रविरचिते निर्णयामृते मलमासनिर्णयः॥ श्री॥ श्रीमत्पंडितपद्धतिः सुधीः॥ ७॥ अथ ग्रहणनिर्णयः प्रस्तूयते। ग्रहणं नाम पर्वप्रतिपत्संधौ राहुणा सूर्यचंद्रमसोर्ग्रसनं। तदुक्तं वृद्धगार्ग्येण। पूर्णिमाप्रतिपत्संधौ राहुः संपूर्णं ग्रसते च यं दर्शप्रतिपदंत इति। तत्र संधौ पर्वणोंतिमानां गःस्पर्शनीगं कालः प्रतिपदादिमाद्यकालः। एतावान्मिश्रकालो ग्रहणे निश्चितः। तदुक्तं ब्रह्मसिद्धांते यावत्कालः पर्वणोंते यावान्प्रतिपदादिमः। रवींदुग्रहणानेहा संपूर्णः समासि वेदिति। अनेहा कालः। अत्र ग्रहणकाले गंगादिषु महानदीषु स्नानं कुर्यात्। महानदीषु चान्यासु स्नानं कुर्याद्यथाविधिरिति वसिष्ठोपि। इंदोर्लक्षगुणं पुण्यं रवेर्दशगुणं स्मृतं। गंगातोयेषु संप्राप्ते इंदोः कोटी रवेर्दश। गवां कोटिप्रदानेन सम्यक् दत्तेन यत्फ १६९

लं गंगास्नाने तत्फलं स्याद्राहुग्रस्ते निशाकरे दिवाकरे तु नत्तुदरा[…]स्यात्सुदा ह्नमिति। अत्र गंगाशब्देन कृष्णवेणी गोदावरी जाह्नवी च तौ तदुक्तं ब्रह्मपुराणे। तिस्रा नद्यो महापुण्या वेणी गोदावरी कावेरी गांधारी चांद्रगता प्राग्गंगा इति हि कीर्तिता। तदसंभवेन्यास्वपि नदीषु वापीकूपतडागादिषु यथासंनिहितेषु स्नानं कार्यं तदुक्तं च। नद्यां नदे देवखाते सरसीषु संदत्तमिति। तल्लाखनौ। वापीकूपतडागेषु गिरिप्रस्रवणेषु च। अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विंदति। अदकेन वा स्नायान्मृतके सूतकेपि वा। अत्र श्राद्धमत्ररूपं कार्यं तदुक्तं लिंगपुराणे। व्यतीपातकालस्यापि गजच्छाया कूपचारे तत्र श्राद्धं संप्रोक्तापि दिवणां दत्तमक्षयमिति। महाग्रहणकालस्य ... तद्वयाया वर्जं द्रव्यं सूर्यग्रहणे। गजच्छाया तु संप्रोक्ता ... अत्र कवणिग्नु नास्ति काम्यं केगोरिव न्यारतेपि। सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति। अत्र आममात्रेन दत्त्वा वा कुर्यादिति तदाह व्यासः। आपद्यनग्नौ तीर्थे च चंद्रसूर्यग्रहे तथा। आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात्सदैव हीति। तथा अन्नाभावे द्विजाना वंद्रसूर्ययोः। आमश्राद्धं द्विजो दद्यात् ...

चेप्रवासेषु तु जन्मनि। देव्याः श्राद्धं सग्रहे च सूर्यः कुर्यात्सदैव हीति। ननु ग्रहणे रात्रौ संध्या
यां वा नातः सति संध्यारात्र्योः श्राद्धनिषेधात्कथं तत्र श्राद्धानुष्ठानमिति चेत् सत्यं वचन
सामर्थ्यात्। तथा विष्णुः। संध्यारात्र्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः। द्वयोरपि च कर्तव्यं
यदि स्याद्राहुदर्शनमिति। अत्र भूम्यादिदानं। यथा गर्त्यानुसारेण दद्यात्। तदुक्तं म
हाभारते। भूमिश्च तिलसुवर्णं वा धान्यं वा यथा दीयते। न सर्वं ग्रहणे देयमात्मनः। अत्र
श्रोत्रः श्रोत्रियो वा ब्राह्मणो दानपात्रं। तदाह बौधायनः। अत्र श्रोत्रियः श्रोत्रियो वा पात्रं
पात्रं पात्रमेव वा। विप्रहस्तेऽपि वा विप्रा ग्रहणे दानमर्हतीति। व्यासोऽपि। सर्वं गंगासमं तोयं
सर्वे व्याससमा द्विजाः। सर्वं भूमिसमं दानं ग्रहणे चन्द्रसूर्ययोरिति। ग्रहणे त्वाशौचवता
पि श्राद्धादिकं कुर्यात्। तदाहांगिराः। सर्वेषामेव वर्णानां सूतके मृतके राहुदर्शने। स्नात्वा श्राद्धं
प्रकुर्वीरन् दानं चाप्यविवर्जितमिति। लिंगपुराणे। सूतके मृतके चैव न दोषो राहुदर्शने। ता
वदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इति। व्याघ्रोऽपि। स्मार्त्तकर्मपरित्यागो राहोरन्यत्र सूतके १५०

पाष्ठ

कः श्रौतं कर्माणि तत्कालं स्नानं शुद्धिमवाप्नुयात्। इति। ग्रहणे सत्यग्रहणे निमित्ता
शौचं सर्वेषां जायते। स्नानादौ श्राद्धादिकर्मणि विधिकारा न भवति। तदुक्तं ब्रह्मांडपुराणे।
आशौचं जायते नॄणां ग्रहणे चन्द्रसूर्ययोः। राहुस्पर्शे नियोः स्नानादौ दानादौ कल्प
तनरइति। ग्रहणकालस्य सर्वस्यापि पुण्यत्वेऽपि स्पर्शकालः स्नानादिकर्मसु श्रेष्ठः।
म: मध्यकालो मध्यमो मोक्षकालश्चाधमः। तदाह व्यासः। स्पर्शमात्रे तु राश्चत्त्रप्यन्ति पितरस्त
था। मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः। आह आत्रेयः। त्रीं कालांश्च आद्यमध्यकनी
५० यसा इति। शास्त्रतोगतेऽपि ग्रहणमेघाच्छादनेनादिनादर्शनाभावादास सति स्नानादिकं न
कार्यं। राहुदर्शन एव स्नानादिविधानात्। तदाह मार्कंडेयः। चंद्रवायदि वा सूर्यं ह
ष्ट्वा राहो महाग्रहो। अदृश्यं कथितं पुण्यं तत्रार्थकं तु विशेषत इति। अतत्र ग्रहणदर्शन
स्यांकं व्यापार एव न तु शास्त्रतोऽवगतिः। तथा सति रात्रौ सूर्यग्रहणे दिवा चंद्रग्रहणे च शा
स्त्रतोवगतस्नानं विधेयं स्यात्। तत्र निषिद्धं षड्विंशन्मते। सूर्यग्रहो यदा रात्रौ दिवा

द्यदस्मथा। तत्र स्नानं न कुर्वीत दद्याद्दानं न वंचकः इति। अतश्च येषां जन्मराशौ य
दणं भवति सोऽप्येकवारं ग्रहणं दृष्ट्वा मत्स्यपुराणोक्तविधिना स्नानादिकं कुर्यात्। ग्र
हः पुनर्न पश्येत्। विधिश्च यस्य राशिं समासाद्य भवेद्ग्रहणसंप्लवः। तत्र स्नानं प्रवक्ष्या
मि मंत्रौषधिसमन्वितं। चंद्रोपरागं संप्राप्य कृत्वा ब्राह्मणवाचनं। संपूज्य चतुरो विप्रान्
शुक्लमाल्यानुलेपनैः। पूर्वमेवोपरागस्य समानीयौषधादिकं। स्थापयेच्चतुरः कुं
तान्व्रणतः सागरानिव। गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात्। राजद्वारप्रदे
शाच्च मृदमानीय निक्षिपेत्। पंचगव्यं पंचरत्नं पंचत्वक्पल्लवं। रोचनं पद्मकं शंखकुं
कुमं रक्तचंदनं। श्रीखंडस्फटिकं तीर्थाम्बु सितसर्षपगुग्गुलं। मधुकं देवदारुं च विष्णु
क्रांतां शतावरीं। बलां च सहदेवीं च निशाद्वितयमेव च। एतत्सर्वं विनिक्षिप्य कुंभेष्वा
वाहयेत्सुरान्। सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः। आयांतु यजमानस्य दुरित १३१
क्षयकारकाः। योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः। सहस्रनयनश्चंद्रग्रहपीडां

व्यपोहतु। योऽसौ बिंडुधरो देवो मुखः सर्वदेवानां सप्तार्चिरमितद्युतिः। चंद्रोपरागसं
भूतामग्निः पीडां व्यपोहतु। यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः। यमश्चंद्रोपरागोत्थां
ग्रहपीडां व्यपोहतु। रक्षोगणाधिपः साक्षात् नीलांजनसमप्रभः। खड्गहस्तोऽतिजोदष्ट्र
ग्रहपीडां व्यपोहतु। प्राणरूपो हि लोकानां सदा कृष्णमृगप्रियः। वायुश्चंद्रोपरागोत्थां
ग्रहपीडां व्यपोहतु। योऽसौ बिंडधरो देवः पिनाकी वृषवाहनः। चंद्रोपरागपापानि
विनाशयतु शंकरः। त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्माविष्णुरुद्राश्च
दहंतु मम पातकं। एवमावाहयेत्कुंभान् मंत्रैरेभिश्च वारुणैः। एतानेव तथा मंत्रान्स्व
र्णपट्टे विलिखयेत्। ताम्रपट्टेऽथवा लिखितान्वा वस्त्रे तथैव च। मस्तके यजमानस्य निद
ध्युस्ते द्विजोत्तमाः। कलशान् द्रव्यसंपूर्णान् नानारूपसमन्वितान्। ईदृशीश्चास्नापयेत्कुं
नपीठोपरिस्थितां। एवं मंत्रैश्च यजमानं द्विजोत्तमाः। अभिषेकं ततः कुर्युर्मंत्रै
र्वरुणपूर्वकाः। ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः। आचार्यं वरयेत्पश्चात्।

सूर्यपद्मं निवेदयेत्। आचार्याय दक्षिणां दद्याद्गोदानं च यथाशक्तितः। अत्र कद्रुब्रह्मखंडे
तदृष्टेन विशेषतः। इत्युक्त्वा स्वगोदानि ब्राह्मणान्पिंडाकिः गंधमाल्यैश्च दीपैः पूज
येद्वस्तुद्वये। होमं च विप्रकुर्वीत तिलव्याहृतिभिः श्रद्धया। निवृत्ते ग्रहणे सर्वं ब्राह्म
णेभ्यो विशेषतः। दानं च शक्तितो दद्याद्दीक्षादानमनादितं। सूर्यग्रहे सूर्यनाम सदा
मंत्रांश्च कीर्तयेत्। अनेन विधिना यस्तु ग्रहणस्नानमाचरेत्। न तस्य ग्रहणदोषः क
दाचिदपि जायते इति। अत्रापि स्वदंन रूपीठापरिस्थितमित्यककृत्वास्तुकग्रहणं दृष्ट्वा
पश्चाद्यथादर्शनं न संभवति तथास्थानव्यमित्यर्थः। चंद्रग्रहणात्पूर्वं यामत्रयेन
भुंजीत। सूर्यग्रहणात्तु पूर्वं यामचतुष्टये नो भुंजीत। तदुक्तं महाभारते। अर्वाग्यामत्र
यादिंदोर्ग्रहणाद्भुक्तिमाचरेत्। चतुर्यामादधश्चैव राहुग्रस्ते दिवाकर इति। वृद्धवसिष्ठो
ऽपि सूर्यग्रहे नाश्नीयात्पूर्वं यामचतुष्टये। चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरान्वि
नेति। बालवृद्धातुरविषये तु मत्स्यपुराणे विशेष उक्तः। अपराह्णे न मध्याह्ने मध्य १७२

ह्ने न तु संगवे। भुंजीतैव संगवे स्यान्न पूर्वं भुक्तिमाचरेदिति। वृद्धवसिष्ठोऽपि ग्रहणं
तु भवेदिंदोः प्रथमादधियामतः। भुंजीतावर्तनात्पूर्वं पश्चिमे प्रथमादधः। अस्यार्थः
रात्रेः प्रथमयामत्रयोपरि चंद्रग्रहणं चेत्तदावर्तनान्मध्याह्नात्पूर्वं भुंजीत। रात्रेः
पश्चिमयामे चेद्रात्रिप्रथमयामादधो भुंजीतेति। चंद्रस्य ग्रस्तोदये पूर्वेद्युर्दिवा भुंजीत
दिवैव ग्राससंभावितत्वात्। पर्वणि रात्रिभोजनस्य निषिद्धत्वात्। सूर्यग्रहे च पूर्वदिवा
भुंजीत। तथा ग्रस्तास्तमये तु परदिने तयोर्विमुक्तिं ज्ञात्वा स्नात्वा भुंजीत। तदा
ह मार्कंडेयः। चंद्रस्य यदि वा नाथ यस्मिन्नहनि ग्रहणं च भवेत्तस्मिन्न पूर्व
नोऽननं ततः। नाचरेन्नाद्य देवैव तथैवास्तमुपागतो यावत्स्यान्नोदयस्तस्य नाश्नी
यात्तावदेव हि। मुक्तिं दृष्ट्वा तु भुंजानः स्नानं कृत्वा ततः परमिति। चंद्रसूर्ययोस्तथैव
ग्रस्तावस्तमुपागतौ तस्यान्यस्मिन्दिने यावदनयोरुदयो न स्यात्तावन्न भुंजी
त। तयोरुदये वा मुक्तिं दृष्ट्वा स्नानं कृत्वा भुंजीतेत्यर्थः। दृष्ट्वेति ज्ञानोपलक्षणं। मनुरपि। अस्तके
तो मुक्तिं दृष्ट्वा स्नानं कृत्वा भुंजीतेत्यर्थः।

योऽस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनि। भुंजीतेति वाक्यशेषः। विष्णुधर्मोपि। अहोरात्रं न
भोक्तव्यं चंद्रसूर्यग्रहे तदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति। इद
मपि ग्रस्तास्तमयविषयं। सूर्यस्य ग्रस्तास्तमयविषये ग्रहणात् पूर्वस्मिन्नहनि अ
हन्यहोरात्रे रात्रौ चेद्ग्रहो दिवा च न भोजननिषेधः। चंद्रस्य ग्रस्तास्तमये ग्रहण
रात्रिमहःशेषं च अहोरात्रौ। एतच्च सर्वं पितृवनेषु विमुक्तिं दृष्ट्वा लिङ्गाचेयथा। न
मुदयानंतं तत्तु व्यापारण्वा। तदाह वृद्धगौतमः। चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि
पूर्वतः। रात्रौ विमुक्तिं विज्ञाय स्नात्वा चाश्नीत नेतरमिति। अतश्च मेघाच्छाद
नेन विमुक्त्यदर्शने निष्फलत्वं ज्ञात्वा स्नात्वा तां भुंजीत। असमर्थस्य निषिद्धकालभोज
ने प्रायश्चित्तमाह कात्यायनः। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यतीति। तस्मि
न्नेव दिने तूक्तं। त्रिरात्रेण व ... विवर्जयेद्य ... वारे चूडामणिसंज्ञिते १७२
अनंतफलमेव। तदाह व्यासः। सूर्यवारे रवेर्ग्रासः सोमवारे विधोर्ग्रहः। चूडा

मणिरिति ख्यातस्तत्रानंतफलं भवेत्। वारेष्वेतेषु यत्पुण्यं ग्रहणं चंद्रसूर्ययोः। तत्
पुण्यं कोटिगुणितं ग्रहे चूडामणौ स्मृतमिति। ग्रहणात्पूर्वं त्रिरात्रमेकरात्रं वा उपो
ष्य स्नानदानादिके कृते महाफलं भवति। तदुक्तं गालवेन। यस्त्रिरात्रमुपोष्यैव ग्रहणे
चंद्रसूर्ययोः। स्नात्वा दद्याच्च विधिवन्मोदते ब्राह्मणैः सदा। एकरात्रमुपोष्यैव स्नात्वा दद्यात्स्व
शक्तितः। कंचुकादिव सर्पस्य निःसृतिः पापकोशतः॥ इति श्रीसूर्यसिनमदंडविरचिते नि
र्णयामृते श्राद्धनिर्णयप्रकरणे। ग्रहणनिर्णयः॥ छ॥ श्रीमत्पंडितपुण्यनाथसुधीः॥ छ॥ अथ
श्राद्धे ग्राह्याणि निषिद्धद्रव्याण्युच्यंते। तत्र विष्णुः॥ शाकैः श्यामाकैः प्रियंगुनीवारैश्चुक
गोधूमैर्मासं प्रीयंत इति। अत्र मुद्गा हरिताः। तदुक्तं वायुपुराणे। श्यामाकोद्दालका नामान
विविल्मय इति सुताः। प्रसातिका प्रियंगुश्च मुद्गाश्च हरितास्तथेति। प्रसातिका धान्यभेदात् त
था एतान्यपि सामानि स्युः। श्यामाकानां गुणो द्विकाः। कृष्णा माषास्तिलाश्चैव श्रेष्ठाः स्युर्य
वाः शालयः। महायवा व्रीहिसर्षपक्वमधूलिकाः। कृष्णाः श्वेता लोहिताश्च ग्राह्याः स्युः श्राद्धक

नीला। यवशालयो यवभेदाः शालिभेदा महायवा वेणुयवाः। मधुलिका यावनाल
विशेषः। तथा श्वेतालोहिता श्वेति मधुलिका। श्यामाक इति कल्पतरौ। स्मृतिमंजर्यां तु
षष्टिकाः शालिभेदाः श्यामाकौ तथा च। बिल्वामलमैकमृद्वीकपनसाम्रादिदाडिमीमोचख
पारेवताचोटखर्जूराणां फलानि चेति। नव्यं पारेवतं लतभेदः। नन्नावंकरोतिकाविद
अनालकंदस्तथा बिसं तमालं शतकंदं च तथा वंशातकं दकमिति। काविदाडस्त्व
तकांचनारसदृशः कंदविशेषः। तालकंदो वा शनकंदश्च तावरी। शीतकंदशाल्लूकौ वंन
थावो कालेयं कालशाकं वस्तुकर्क्षा। माषकाशं दधिक्षीरं श्रासंवेत्रांकुरस्तथा। कालेयादि
काः शाकभेदाः। कद्धलंकाकणाशालकुवंचमवचा। अलाबुग्रीवकं चारुकर्कंधुमधु
साकर्यं इति। मोचं कदलीफलं। अलाबुपीदकौ च विनिकर्कंधुविशेषणं। तथा चाविकंक
तं नालिकेरं शृंगाटकपरूषितं। पिप्पली मरिचं च पटोलं बृहतीफलं। एवमादीनि चा
न्यानि स्वादूनि मधुराणि च। नागरं तत्र वेदयं दीर्घमूलकमेव चेति। परूषं डलोफकं १५४

कंदविशेषः। अत्रोक्तानि धान्यानि नामान्यप्रसिद्धानि देशविशेषप्रसिद्धानि तत्तद्दे
शवासिभ्योऽवगंतव्यानि। अत्र त्रिवमादीन्यन्यान्यनुक्तत्वादामनो नोक्ताः। पितुश्चपि
यतमानि स्वादूनि अनिषिद्धानि प्रियानीत्यर्थः। अथ वर्जनीयानि। तत्र शंखः। दुष्टएतास्तु
यतमानि स्वादूनि। ब्रह्मांडपुराणेपि। द्विपिन्नं परिद
रसं शिग्रुफलं चयं मधुकं तथा। कूष्मांडाश्ववर्ज्ये इति। पिण्याकं माथिकं चैवत
युंचलये वा शावलेहितं। शर्करा पीटपाषाणकेशोद्भास्तु पक्तं। राजमाषास्तथा चैवव
थातिलवणं च यत्। सिद्धाः कृताश्च ये नद्याः प्रत्यक्षलवणीकृताः। राजमाषास्तथा चैवव
ज्यासिद्धिः प्रत्यक्षलवणे इति। द्विरावर्तनं संचारकादिसंस्कारार्थं डीरकादिप्रक्षेपणयत् पुनःप
क्रौ। अत एव पाकादेव संस्कारः कार्यः। छिन्नस्पर्शाकादेः पुनरग्निसंयोगानिषिद्ध इत्यर्थः।
यप्राप्त छिन्नानामेव संस्कारयोग्यत्वं स्मरणादीनां तेषां न दोषः। अत अयस्याय यावता याक
सिद्धिस्तावदेवाग्निसंयोगः कार्यः नाधिक इत्यभिप्रायः। यस्तु सिद्धेषु यः पश्चात् प्रत्यक्षल
वणप्रक्षेपः। कृतश्चैतां हराः। तथा च। आविकं मार्ग मोष्ट्रं च सर्वमेकशफं च यत्। माद्वि

षं वा मरिचं चैव पयो वल्मीं विजानते इति। शंखोपि। पिप्पलीं मरिचं चैव तथा वै पिंडमूलकं सि
तं निरसं सर्वं विशाक्षं च विवर्जयेदिति। नख्यादिषु भूषणे। मधुकं रामठं चैव कर्पूरं मरिचं गुडः।
श्राद्धकर्मणि शस्तानि सैंधवं त्रिपुटं तथेति। हिंग्वादीनां प्रशस्त्यानिषेधनात् विरोध इति चेन्न स
त्ये। हिंगुनिषेधस्य प्रत्यक्षविषयादन्यत्र संस्कारार्थं प्राशस्त्यमित्यविरोधः। हिंगुद्रव्येषु गा
के भिन्नतिवर्ज्यं प्रकरणव्यासोक्तेः। पिप्पलीमरिचयोः संस्कारार्द्रद्रव्यद्रव्यवाचाकादिषु
निषिद्धयोर्निषेधः। प्रत्यक्षस्तु निषेध इति। अथाप्युपहतद्रव्याणां शुद्धिप्रकरणं वांई
यस्य विप्रकरणमारभ्यते। तत्रादौ सर्वद्रव्याणां भूम्यधिकरणत्वात् भूशुद्धिरुच्यते। न
त्रापहतत्वस्य द्विरूपत्वं भवति। तदाह यमः। खननात् पूरणाद्दाहात् तद्विवर्षणाल्लेपना
त् गोनिराक्रमणात् कालात् भूमिः शुद्धतिस्र निरिति। कालादिति यावता कालेनामे
ध्यगंधलेपादिक्षयो भवति स कालो ग्राह्यः। याज्ञवल्क्योऽपि भूशुद्धिर्मार्जनाद्दाहात् काला
ङ्गोक्रमणादपि। सेकाद्युल्लेखनाल्लेपाद्गृहं मार्जनलेपनादिति। अत्र द्रव्यदर्पणे नवप्रा १७५

द्यपि शुद्धस्य वचनं प्रतिदिनं तस्य मार्जनलेपनप्राप्त्यर्थं। इदं समग्रमपि मार्जना
दिकं दुष्टदेशे तु निःसमस्तैः पुनरुपहतविषये प्रत्येकमुत्पादिकं। अथ यथोपहत्य
तु सा तेन मार्जनादिसमस्तमध्ये द्वित्रादिकं यथायोग्यं। अशुद्धिहेतुः। दुष्टभूमि मि
नानि देवलोक्तानि। यत्र प्रसूयते नारी म्रियते दह्यते यथा वा। चंडाली धूषितं यत्र कौ° ५
यत्र मूत्रादिसंगतिः। एवं कलौ क्रम लब्धविष्ठामूत्रमेध्यसः प्रतिष्ठिताः। शूकरखरो
ष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत्। अंगारतुषकेशास्थि भस्माद्यैर्मलिनाभवेदिति। अस्या
र्थः। नारी प्रसवादिति शूद्रादिसंगति पर्यन्तैर्निमित्तैर्मूत्रमेध्यस्य भवति। शूकरादिस्पृ
ष्टा दुष्टा। अंगारादिसंयुक्ता मलिना इति त्रिविधा गौध्यभूमिः। तत्रामेध्या भूशुद्धि
र्नेवोक्ता। पंचधा वा चतुर्धा वा मूत्रमेध्यविशुध्यतीति। यत्र मनुष्यदाहः। तत्र चांडालानां
एवं विधमेध्यस्तु वः पंचभिर्दहनगंधादता घ्र पनयन क्रमागोक्रमणासकोप्ये
ष्ठितिः। एवं विधमेध्यस्तु वः पंचभिर्द्ग्राहादिसंगतिर्वा। एवं विधमेध्य
खनाः स्वक्रियच मनुष्या जायंते म्रियंते वा। अत्यंतविष्ठादिसंगतिर्वा।

यानुमेः दोषवर्जितैः काष्ठादिभिः पूर्वोक्तैरवयवैः शुद्धिः। दुष्टादिविषयेनासंप
वादुष्टा भूमिनात्रिविधा भूमिस्तत्र शुध्यते मलिनाकदुष्टायाश्च वल्लेखनगोक्रमणसेका
न्तरवपनैः दाहस्पासेको दग्धेरवनाम्पा वा शुद्धिः। मलिनायाः शेषवा। तथा चात्र विशेष उक्तः।
गोचर्ममात्रमसंमृष्टमसंमृष्टं वा यत्र लेपनं दुष्यतीति। संमृष्टं तत्स मार्जनं शोगोप्रथि
व्याः गोचर्ममात्रे प्रदेशे पातितो बिंदुरुदकबिंदुः शोधयतीत्येकोर्थः। अथ गोरबिंदुग्
पुच्छस्पृष्टोदकं पुसेके एकेन बिंदुना गोचर्ममात्रभूभागः शुद्धो भवतीत्यर्थः।
यत्रैकादश गावः प्रविशंति तावान् भूभागो गोचर्म। गृहशुद्धिस्तु संवर्तेनोक्ता। उच्छ
ष्टिं प्रवक्ष्यामि अंतस्थशववर्जिते। प्रोत्सृज्य मृन्मयं भांडं सिद्धमन्नं तथैव च। गृहादपनये
त्सर्वं गोमयेनोपलेपयेत्। गोमयेनोपलिप्य छागेनाघ्रापयेद्बुधः। ब्राह्मणैर्मंत्रपूतैश्च हिर
ण्यकुशवारिणा। सर्वमभ्युक्षयेद्वेश्म ततः शुध्यत्यसंशयमिति। बोधायनेन तु विशेष
उक्तः। घनायाः संरूपघाते तूपलेपनं। सुषिरायाः कर्षणं चेति। कुड्यस्यावपघाते तन्नि १९६

विषयं। आपस्तंबवचनं तु स्वल्पोपहतविषयमित्यविरोधः। एवमन्यत्रापि न्यूनाधिका
शौचकल्पाः स्वल्पाधिकोपहतविषयत्वेन व्यवस्थापनीयाः। बोधायनेनापि विशेष उक्तः।
तैजसानां मूत्रपुरीषशुक्रासृक्कुणपमभिरुपहतानामावर्त्तनमल्पसंसर्गे तु परिलि
खनं। स्पर्शमात्रोपघाते तु त्रिःसप्तकृत्वो भस्मना परिमार्जनं। अतैजसानामेवं दुष्टानामुत्स
र्ग इति। अग्निसंयोगेन द्रवीकरणमावर्त्तनं। कांस्यस्य भस्मना परिमार्जनं नियतं। अन्येषामपि
सौवर्णादितैजसानां यावद्वयेन वारिणा शुद्धिरिष्यते। इत्थं च बौधायनेन भस्मना
परिमार्जनमित्युक्तं वाच्यं भस्मादिसहितेन वारिणा शुद्धिर्ज्ञातव्या। स्मर्यते ह्यपि। भस्म
ना शुध्यते कांस्यं सुरया यन्न लिप्यते। सुरामूत्रपुरीषाभ्यां पैस्तु शुध्यते तापलेखनैरिति।
सुरादिग्रहणं शुक्रशोणितादीनामप्युपलक्षणार्थं। तथा चोत्तमश्रवास्तेनं चैव तन
वेदामिषलेपनं। आमिषेण तु यल्लिप्तं पुनर्दाहेन शुध्यतीति। शंखेनापि। शूलकोऽपि
तांडस्यसुरामद्य द्रतस्य त्रिःसप्तमार्जनाच्छुद्धिरित्युक्तं कांस्यस्य तापनमिति। कांस्यपुनः

तस्य तापनाच्छुद्धिर्माडिनाम्ना प्रतिमाऽदनिमुदकप्रक्षालनमावर्त्तेति। अधिकोपहतौ तु वि
शेषः। स्मृत्यर्थसारे प्रोक्तः। सूतिकाप्रसवविण्मूत्ररजस्वलादत्तानि प्रदेशव्यापीनि ताम्रा
यघघावस्रददपीति। तद्वयं यावदग्निप्रक्षेपणं सदतया वत्ता अग्निप्रक्षेपणेन तत्रपति
तावत्प्रक्षेप्यमित्यर्थः। बौधायनोऽपि। तैजसानां मूत्राद्युपघाते पुनःपूरणं गोमूत्रे वा सप्त
रात्रं परिवासनमिति लेपननिर्देशाच्चाकौ पुनःकरणं। अथ गोमूत्रे वास इति व्यवस्था।
आदित्यपुराणे। सुवर्णरूप्यशंखाश्मशुक्तिरत्नमयानि च। कांस्यायस्ताम्ररैत्यादित्रपुसी
समयानि च। निर्लेपानि विशुध्यंति केवलेन जलेन तु। शूद्रोच्छिष्टानि पात्राणि त्रिधा क्षारास्त्र
वागिरिति। अत्रापि क्षाराम्लवारिनिर्देशात्त्र्यो मार्जनमिति। कांस्यं घ्राता तत्तपनेन शुध्यंति
दयाग्निः क्षाररसिकः कथा तु। द्विजातिरुक्तो उच्छिष्टसंस्पर्शे तु शंखेन विशेष उक्तः। अम्लक
त्रविशांत्वसत्त्वममार्जनाच्छुचिः। शुद्धर्थेन तु यजुर्के सत्वनि सत्रमार्जनं। अथो प्रक्षिप्य
ष्टकूर्याद्भस्मोपच्छाल्पयन्त ततः गोसंगे नैव संस्पृष्टं तत्पात्रं शुचितामियादिति। कांस्यपा १५८

तद्दाणं। सूर्यरश्मिप्रदेशोऽग्निकालानिमर्षणं चेति। क्लिन्नक्लमिकीटाद्याक्रांतामन्यतोमेध्यम
दमाहृत्यंछादयेदित्यर्थः। इति भूमिशुद्धिः। अथ पात्रशुद्धिः। तत्र हारीतः। अग्निंकाकवनरडतत्रां
शक्खुकीनां तद्गुणसर्जनस्नेहवसोपहतानां यवगोधूमकलमामाषमसूरमुद्गगोमयतुषै
घातनं चाम्ललवणाद्यैस्ताम्राणां। भस्मकांस्यानां शाणसातैलसिकताघर्षणैः काष्ठायसा
नां त्रिलाघर्षणं मार्जनं निर्मलिमयानामिति। अत्र तद्गुणवर्जनमिति। गंधमपकर्षणं। स्नेह
वस्त्रेपिहताऽइति रुच्छिष्टादिस्नेहेन विवर्णं यथा न भवति। तथोपहता इत्यर्थः। यवादिभूसा
निर्विकल्पितानि। सर्वेषां स्नेहदेव। स्पर्शिकर्षणार्थं चादेवोदकस्पर्शसर्वत्र शोधनद्रव्येयो
गोपेक्षिताः। यत्तु याज्ञवल्क्यवचनं। सोवसरिाजताज्ञानाष्टदपात्रग्रहानाम्। शाकरज्जुमू
लफलवासाविदलचर्मणां। पात्राणां चमसानां च वारिणा शुद्धिरिष्यते इति। सोवसंक्षि
वर्णविकाराः। राजतं रजतविकारः। अश्मं शंखशुक्तिमुक्ताफलादि। ऊर्ध्वपात्रं यज्ञियालूषला
दि। ग्रहणं जादयः। अस्मात् पदादि। स्तनाईकादि। विदलं वेणुदलादि। एत विकारकत्रा

दीनि वमज्ञादीनां तद्विकारस्थापात्राणि प्रोक्षणपात्राणि चमसाः सोमरसादयः एतेषां वा
रिणा प्रक्षालनाच्छुद्धिरिति। एतद्यापदन्तम्पर्शमात्रविषयं। हारीतवचनं च सस्नेहलेपाधिकप
दृतमित्यविरोधः। तथा च मनुः। निर्लेपं कांचनं भांडमद्भिरेव विशुध्यति। अब्जमश्ममयं चै
व राजतं चानुपस्कृतमिति। अनुपस्कृतमनुल्लीखितं सखिरवादिरवातघृतच्छिष्टावस्थारहित
मित्यर्थः। सस्नेहपात्रेषु विशेषो याज्ञवल्क्येनोक्तः। चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन
वारिणा। चरुर्मृन्मयी चरुस्थाली। एतान्यपि लेपरहितान्येवोष्णेन वारिणा शुध्यंति। शुद्धे
न वारिणाप्यनुष्ठानोत्तनैवोक्तं। स्फ्यशूर्पाजिनधान्यानां मुसलोलूखलानसामिति। स्फ्यं य
ज्ञाग्रहतकाष्ठछुरिका। अनः शकटं। आपस्तंबोपि गंवाप्यानानि कांस्यानि शुद्धिः
नियानि वा शुध्यंति दशभिः क्षारैः श्वकाकोपहतानि चेति। क्षारो भस्म। दशवारान्तु भस्म
ना मार्जितानि शुध्यंतीत्यर्थः। यत्तु शंखवचनं सूत्रगत्रकुनिहतखावमृष्टं निर्लिखेत्। आप
द्मुखावमृष्टं पात्रं न शुध्यतीति। ह्लमःशकुनिःकाकः। निर्लेपनं तक्षणं। इदमधिकोपहत १९३

अविषयेषु। अंगिरसा विशेष उक्तः। गंडूषं पादशौचं च यः कुर्यात्कांस्यभाजने। षण्मासं
भूमौ निक्षिप्य षण्मासं पुनराकारमादिशेत्। अत्र षण्मासं तु विनिक्षिप्य फलं चान्यत्सक
लमपि कांस्यस्यैव। अतश्चोपहतकांस्यं दोषानुसारेण समासादिकालं तु विषाकं सान्य
द्भावाकृत्यत्र स्मृतौ नामादितं शुध्यतीति तथा चोलोद्दानां दाहनाच्छुद्धिर्भस्मना गोमयेन चोदक
नातूखननाद्वापि शैलानां भस्मापि श्या कादनानां तत्तु तक्षणाच्छुद्धिर्मृन्मयानां लररपि तक्ष
णं दारुशृंगास्थ्नामिति। संहृतपात्रविषये तु हारीतः। यानातापो संहतानां तु पात्राणां य
द्येकमुपहन्यते। तस्यैव शोधनं प्रोक्तं न तु सामान्यशुद्धिरिति। मृद्भांडानामत्योपहतौ
याज्ञवल्क्यः। पुनः पाकान्महीमयमिति। महीमयोपहतौ तु परित्याग एवेति तत्र मनुः। मद्यैर्मू
त्रपुरीषैर्वा ष्ठीवनैः पूयशोणितैः। संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयमिति। प्रतिपात्रशुद्धिः।
तत्रशुद्धिः। आसिक्तस्यान्नस्य यन्मात्रमुपहन्यते तन्मात्रमुद्धृत्य शेषस्य कंडनप्रक्षाल
ने कुर्यात्। इति बोधायनः। पिपीलिकयः ब्राह्मणादक्षिणाक मूलफलानि चान्नमात्रस्यापदा

राद्यानिस्तुषीकरणेनवेति। इदमल्पद्रव्यविषयं। बहुद्रव्यविषये का आतपेन विशेष
उक्तः। प्रोक्षणापर्यग्निकरणावगाहनैश्चैदियकाधूमानां विमर्शनिप्रोक्षणैः फ
लीकृतानां निघर्षणदलनप्रोक्षणैः ग्रामीधान्यामिति। अस्यार्थः। अवगाहनं प्रक्षाल
नं। अत्र प्रोक्षणादीनि सर्वाणि सर्वत्र दोषाल्पत्वमहत्त्वापेक्षया योज्यानि न यथासंख्यं।
कंडनेन शूककर्तता निरस्ताः कुंदकणाश्च तंडुलाः फलीकृता उच्यंते। तेषामल्पानां विमर्श
नं पाणिभ्यां निर्मलीकरणं। बहूनां प्रोक्षणं। ग्रामीधान्यानि मुद्गादीनि। तेषामेकत्रूप
द्रावाणां निघर्षदलनं विमर्दनं चेति। तत्राल्पानां दलनं। अनेकगुरूपाणां प्रोक्षणं शु
द्धिहेतुरिति। यत्तु तंडुलांस्तु परित्यजेदिति तदत्यंताल्पपरिणामविषयं। आदित्यपुराणे
विशेष उक्तः। यद्दानैर्वस्तु उत्पन्ने दग्धे च पक्वमात्र एव। अतोऽपसृजेताश्रीः दितिरूर्ध्व
स्य संग्रहः। मृन्मयं नाववरूढानां अंत्यधान्यं विचितिष्ठतां। यवमाषतिलादीनां न दोषं मुनय ऊचु
र्व्रीहीनां ततः संक्रमेणांमोस्थानेष्ठाने च दुष्यति। न च प्राणिवधः यच्च केवलं दृष्टदीपनी। तत्र १७९

द्रव्याणि सर्वाणि स्पृष्टानि यादविचारयन्नु इति। सिद्धान्नविषये तु मनुना विशेष उक्तः।
पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतं। दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति। पक्षिज
ग्धं नखमध्ये न लिखितं। अत्र वधूतं यस्योपरि वासो वक्त्रान्तपादिनिरुक्तं द्विप्योद्विरूप्यतं। अत्र
वक्षुतं यस्योपरि क्षुतं कृतं। मृत्प्रक्षेपेणैकदेशे भस्मना पिप्रदग्धेनार्थः। तथा च याज्ञवल्क्यः। स
लिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये इति। पाकानंतरमेवं चेत्केशकीटादिदूषितं मृदादि
निक्षिप्य शुध्यति। तेः मद्रुपकं तु परित्याज्यमेवात्र तच्च नियमतोऽप्यंके शकीटावपनमिति गौत
मवाक्यस्यायमर्थः प्रायः। वसिष्ठेन विशेष उक्तः। देवद्रोण्यां विवादे यज्ञप्रसंगेषु महोत्सवे का
के। श्वमिथ्यसंस्पृष्टमन्नं तन्न विवर्जयेत्। तत्तन्मात्रमन्नमुद्धृत्य शेषसंस्कारमर्हति। इति देव
केः। ... देवद्रोणी देवयात्रा। प्रसन्तेषु वज्रपंजाविसर्वेऽस्मि यज्ञ। अत्र देवयात्रादीनां बहून्ननिष्पाद्यत्वा
द्रोणी देवयात्रा। प्रसन्तेषु वज्रपंजाविसर्वेऽस्मि यज्ञ। अत्र देवयात्रादीनां बहून्ननिष्पाद्यत्वा
त्तद्बहुकार्येषु द्रव्यबाहुल्यं विदितव्यं। तदाह पाराशरः। पक्कद्रोणादिकं वन्नंकाकश्वाद्युपघा
तितं। ग्रासमुद्धृत्य तन्मात्रं यच्च लालाहतं तं नवेत्। दमोदकेन चाप्यक्ष्यं तेन तांबुनाथवा।

अग्निहोत्रालापसंस्पर्शाच्च सुवर्णमधुसर्पिषां। ब्राह्मणानां ब्रह्मघोषेण हुतं नो ह्ययं चतकर्वेत्॥
इति। शेषं परंचाशद्धिकं पलत्रानद्यो यद्धुक्तं मदग्निर्वचनं। अन्नामिकाह्निकं पक्वश्च
काकाघकप्रशान्तिं केशकीटावपन्नं च तदप्यवं क्षिप्यतीति। क्वी तस्यापि विक्विष्ट एव
मनीषिभिरिति। तदल्पधनविषयं। संस्कारविषयविशेषावसिष्ठेनोक्तः। द्रवाणां प्लावनेन
ववघानां प्रोक्षणेन चोक्तागेन मुखसंसृष्टमक्लेन तच्चितामिथातु। इति। घनापर्पटकादयः।
द्रवाणामिव गोरसविषयं। तदादर्शनः। अपरं घृततिलानां प्लावनं गोरसस्य चोनां ऊनि
प्लावयेदद्भिः शाकमूलफलानि चेति। घृतादीनामिति अपणासंनवेसजातीयद्रव्यप्ला
वनेन शुद्धिः। मनुनात्तु द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतं। प्रोक्षणं संहतानां तु दार
वानां च तक्षणं। इत्युक्तं। अत्र चोत्पवनप्लावने विकल्प्येते। किंच। प्रस्थमात्रपरिमाणा
नाशुत्पवनं सर्वतोगस्य स्थितस्य किंचिदंशस्यापनयनमिति। मध्यमनियुक्तचाज्ञानोधि
कपरिमाणानां प्लावनं ततोन्यूनपरिमाणानां त्याग एव इति गम्यते। आकरनांडस्थित १८०

स्पगोरसादेर्न दोषः। तदुक्तं। आधूमरदोषे तु नयेत्पात्रात्पात्रांतरं ध्रुवं। घृतं च पायसं
क्षीरं तथैवेक्षुरसो गुडः। शूद्रभांडस्थितं तक्रं तथा मधु न दुष्यति। पायसं पयसानि हविं दधीय
नापि। आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः। म्लेच्छभांडस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृ से
ता इति। एतच्चाकरभांडविषयं। अनाकारपिंडजाणाधिकान्नापवनसमर्थघृतादिविषयमिति।
ततानस्यापि देशकालाद्यपेक्षया अपणादिभिः शुद्धिः। तथा च बोधायनः। देशं कालं तथात्मा
नं द्रव्यं द्रव्यप्रयोजनं। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति। ज्ञातातपोपि। गोकुले कं
डशालायां तिलचक्रेक्षुयंत्रयोः। अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु चेति। कंडशाला
यद्रशाला। रवापि। नियसिनां गुडानां च लवणानां तथैव च। कुसुंभकुसुमानां च ऊर्णाकर्पा
सयोस्तथा। शेषास्तु कथितास्तु शुद्धिरित्याह भगवान्मनुरिति। नियसादिषु प्रकृतयः इदमपि च
ल्पपरिमाणविषयं। बहुपरिमाणेषु बोधायनेन विशेषाभिधानात्। तथा बहूनां ऊर्णकर्पा
सखुडलवणानां सर्पिषां कठिनीकृतानां चंडालस्पर्शे ब्राह्मणानवशुद्धिरिति। अल्पत्वेऽपि

यागएवात्रापिदेशकालापेक्षयापरित्यागः।कृच्छ्रसंधूम्रादिषुविष्णुनाविशेषउक्तः।भूम्यस्य
तृणकाष्ठानांशृंगालवायसैः।स्पर्शनेविहितंशौचंसोमसूर्यांशुमारुतैरिति।तथाप्रोक्ष
णेनशुष्कमितिवाशेषापिपुष्पफलानांनिष्क्रान्तानांप्रक्षालनमभ्युक्षणमित्येकोपसा
नामद्भिःप्रक्षालनंसक्तुपक्वान्नानामुत्सर्गइति।विष्ठारेयामकुक्कुटादिभिरवधूतंपादावकी
संमित्यर्थः।बौधायनोपि।असंस्कृतायांभूमौन्यस्तानांप्रक्षालनंप्रासादोपहतानामभ्यु
क्षणमेवंहुडसमिध्ममसंस्कृतायाममेध्यपदतामेकपुरुषोद्धार्यतामिति।हुडा
समिध्येयान्नियत्वेनप्रसिद्धपलाशादिव्यतिरिक्तअमावादीनां।व्यासो।पिशय्याकर्दमतो
यानिनावःपथितृणानिचमारुतेनशुध्यंतिपक्वेष्टकचितानिचेति।मनुनाप्युदकस्पो
च्छिष्टादिस्पर्शेविशेषउक्तः।यथा।उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तःकथंचन।अनिधायैव
तद्द्रव्यमाचांतःशुचितामियादिति।इतिअमध्यशुद्धिः।अथजलशुद्धिः।तत्रदेवलः।अविगंध
रसोपेतानिर्मलाःपृथिवीगताः।अक्षीणाश्चैवगोपानादापःशुद्धिकराःस्मृताइति।अथ। १८२

गोपानादितिगोपानयोग्यपरिमाणात्तदादत्तुव्यासहृदत्ती।भूमिष्ठमुदकंमेध्यंवैतृष्ण्यंय
गोर्भवेत्।अव्याप्तंवेदमध्येनतद्वद्देवशिलागतमिति।अल्पजलाशयादौकृतोदकविषयेदे
वलएवविगंधइतिवाक्यानंतरमाह।उद्धृतावाप्रशस्तास्युःशुद्धाःपात्रैर्यथाविधिएकरात्रो
षिताआस्युर्नदोषःसमुद्धृताइति।अतएवबृहदुदकात्तडागादेरुद्धृतानांरात्र्युषितानां
मपर्युषितोदकांतरासत्त्वेनदोषः।अपर्युषितसत्त्वेरात्र्युषितानांकर्मयोग्यत्वंनास्ति।
महाजलाशयविषयःसएवाह।अदोषाणितडागानिनदीवापीसरांसिच।चंडालाद्यशुचि
स्पर्शेतीर्थतःपरिवर्जयेदिति।तीर्थमुदकावतरणमार्गः।तीर्थेचंडालादिस्पर्शेतद्वर्जयि
त्वान्यतोजलंग्राह्यमित्यर्थः।वापीकूपादिविषयेहारीतः।वापीकूपतडागेषुमानुषय
दिग्धीयेत।अस्थिचर्मविनिर्मुक्तेदूषितंखरादिभिः।उद्धृत्यतज्जलंसर्वंशोधनंपरिमार्ज
नमिति।चर्मविनिर्मुक्तेचिरकालवासादिद्वीसिरित्यर्थः।देवलोपि।उद्धृत्यैवोदकंसर्वंपंच
पिंडान्मृदस्त्वथेति।बृहस्पतिनाविशेषउक्तः।मृतपंचनखात्कूपादत्यंतोपहतास्तथा।

आपः समुद्धरेः सर्वाः शेषं वस्त्रेण शोधयेत्। वह्निप्रज्वालनं कृत्वा कूपे पक्वेष्टकां क्षिपेत् पंच
गव्यं न्यसेत् पश्चान्नवतोयसमुद्भवमिति। घृत्पात्रिरका लेतुहारीतः। घटानां शतमुद्धृ
त्य पंचगव्यं क्षिपेत्ततः। श्वशिः श्वपाकचांडालदूषितस्य विशोधनमिति। आपस्तंबस्तु विशे
षमाह। उपानत्कुलेष्वविण्मूत्रस्त्रीरजोमद्य एवं चापि विदूषिते कूपे कुंभानां षष्टिमुद्ध
रेदिति। स्थावरस्थवल्पजलाशयेषु कूपवदेव शुद्धिः। तदाह विष्णुः। जलाशयेष्वथोल्पेषु स्था
वरेषु महीतले कूपवत्कथिता शुद्धिर्महत्सु च न दूषणमिति। शातातपोपि। अन्त्यैरपि
कृते कूपे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यत इति। यमेन तु
विशेष उक्तः। चंडालभांडसंस्पृष्टं पीत्वा कूपगतं जलं। गोमूत्रयावकाहारस्त्रिरात्रेण व
शुध्यतीति। नदीनां चांडालभांडादिस्पर्शेपि न दोषः। तदाह स एव। नदीवेगेन
शुध्यतीति। चर्मकोशस्य काषायद्रव्येण शोधनाच्छुद्धिः। तदाह काश्यपः। दृतीनां रंजनं
शुद्धिरिति। अन्यचर्मकोशगतमथनादपि न पर्यंतं। दाह यमः। प्रपाश्चरणे घटगंधकूपे १०२

द्रोणपांडजलं कोशगता प्रथापरा। ऋतेपि शूद्राद्र दपेयमाऊः आपज्जलः कांक्षिन्नवश्यपिबेत्तत्तदिति।
द्रोणपांडजलं न पेयं। तत्तु प्रपादिकं यद्यपि शूद्रव्यतिरिक्तब्राह्मणादिसंबं
अस्यार्थः। अनापदि प्रपादिप्रपेयमित्यर्थः। द्रोणी सर्वसाधारणी। पाषाणादिकृता पात्री
धिर्भवति। आपद्यथ्यरण्यगतं तन्नवोदकं दशरात्रेण शुध्यति। तडके अज्ञो गावामदिपद्यबाल
कात्रोदिति। तडागादिगतं तन्नवोदकं दशरात्रेण शुध्यतीति नित्यं नवोदकमिति। जलमात्रं च स्वकीयमेव चम्य
पात्रप्रसूतिकाः। दशाहत्रेण शुध्यतीति। आत्मशय्यासनं वस्त्रं जायापत्यं कमंडलुः। शुचीन्यात्मन एतानि परे
शुद्धं तदाह बौधायनः। आत्मशय्यासनं वस्त्रं जायापत्यं कमंडलुः। शुचीन्यात्मन एतानि परेषा
षामशुचीनि तदिति। हारीतस्तु स्वानुपपन्नोद्घर्षं चयनं ह्यविशयनमिति। चांडालपतितशय्यादि
संस्पर्शे सचैलं स्नानमेवं बोद्धेति। अयमर्थः। स्वीयशय्याद्यलाभे परकीयस्य दनेकेबला
दीनां तद्यायाप्यायोक्तवांप्यतः पतितादिशय्यादिस्पर्शे सचैलं स्नानं विधीयत इति। एतच्च
बलादापतितशय्यादिष्वकारप्राप्तवेदितव्यं। अथ वस्त्रशुद्धिः। तत्र व्या
सः। वस्त्रं मृदं तत्साद्भिरद्भ्यु वैदलमेव चारक्षादिकं चानिडषंत्याऽपत्तन्मात्रमेव चेति विदलस्य

पादिः ॥ यमोऽपि ॥ यदि मूत्रपुरीषाभ्यां रेतसा रुधिरेण वा ॥ चैलं समुपहन्येत त्रिः शुद्धिः प्रक्षालनैः
यैस्तु तत्तु यदं नसानस्य घ्रेतवस्त्रं चोपहतं द्वौ छेदनं तस्य दाहो वा यन्मात्रमुपहन्यत इति ।
अत्र छिन्नदग्धयोरपि परिधानं प्रत्याज्यचातु छेददाहाभ्यां शुध्यतीति ॥ परिधानमन्यं तंतु लेशोत्त
मवस्त्रविषयं ॥ दरिद्रस्योत्तमेष्वपि छेदादिना शुद्धिः ॥ राशीकृतानां शुद्धानां बहूनाम
ध्यायावंति वस्त्राणि चांडालादिनिस्पृष्टानि ॥ तान्यस्पृष्टापेक्षयाल्पानि चेत् तदा तान्येव
प्रक्षालयेत् ॥ शेषाणि बहूनि प्रोक्षयेत् ॥ अनेन वाक्ति प्रायेणायाज्ञवल्क्यः ॥ प्रोक्षणं संहता
नां च बहूनां धान्यवाससामिति ॥ स्मृत्यंतरेऽपि ॥ वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे ॥
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हतीति ॥ अत्र चोपस्पृष्टं प्रोक्षणाविधानात् ॥ उद्धृत्यस्यो
पहतं तस्य प्रक्षालनादिभिः शुद्धिरिति गम्यते ॥ तदा राशौ निहितानि सर्वाण्यपि स्पृष्टानि ॥ तदा
प्रोक्षणादेव शुद्धिः ॥ यदा तु स्पृष्टानि बहूनि अस्पृष्टानि अल्पानि ॥ तदा सर्वेषां प्रक्षालनं न देव
शुद्धिः ॥ तदाह मनुः ॥ अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससां ॥ प्रक्षालनेन त्वल्पानामद्भिः १८३

शौचं विधीयत इति ॥ राज्ञो वकुचं चैवं पुरुषयाम्यन्नारीधिकं चैवं बौधायनेन ॥ अनोकाधार्यदा
रुशिलेषु मिसमेष्वनेकाधायपयोर्द्रुक्षिजल्याः अल्पाशौचयमुक्तं ॥ तन्नैचन्यायेन त्रयां
तारप्रपिहात य्यो याज्ञवल्क्येन विशेष उक्तः ॥ सोषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशि
कं ॥ सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा ॥ सगौरसर्षपैः क्षौममिति ॥ सोषैः सक्षारमृत्ति
कः ॥ कौशिकसर्षपादि ॥ अंशुपट्टं वल्कलं तंतुजं तैः कुतपः पर्वतच्छागलोमजः ॥ इयं शु
द्धिरधिकापद्यातो ॥ अतु प्रक्षालनमेवाप्रक्षालनेन विनाशएवस्यात् ॥ शुद्धेश्चद्व्या विना
शानिवेष्टव्या तु ॥ अत एव देवलः ॥ कर्णकौशेयकेतपपट्टक्षौमदुकूलजाः ॥ अल्पशौचा भवं
त्येते शोषणप्रोक्षणादिभिः ॥ तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः ॥ तूलिकाद्यु
पधानं च पुष्परक्ताम्बरं तथा ॥ शोषयित्वातपे किंचित् करैः संमार्जयेत्पुनः ॥ पश्चात्तु वारिणा प्रो
क्षयेत् ॥ इति ॥ पुष्परक्तमि
ध्यविनिर्णुंडीनकर्मणि ॥ तान्यथातिं मञ्जिष्ठादीनि यथावत् परिशोधयेत् ॥ अतश्च यस्तु प्रक्षालनेन विनश्यद्रागं भवति ॥ तदा
ति प्रक्षालनासहरागरक्षोपलक्षणं ॥

तपत्रोषणादिना शोध्यौ। चर्म्मांजिकादीनां क्षालनेन विनश्यतीति। ततः क्षालयेत्तत्रा
पक्षे वापि। अतो पदतंघैलमवगादू तत्र क्षालयेत्। दशमुनिस्पृष्टमप पुनः प्रक्षाल्यपा
दौ वाचम्य प्रयतो भवतीति। आचार्यविवेकः। वस्त्रमदितस्पनानेरूर्द्धस्पर्शे विगादूः। अथ धा
न्येतु प्रक्षालनमिति। शंखलिखितौ। अदत्तानां प्रोक्षणप्रक्षालनमिति। अदत्तं चांडली
सं। प्रवृत्ताश्च। तलानाम्बुपदूतानां स्वछेदनं। गंधलेपापनयनं। तस्मात् छेदनं वा तांतवा
नां वा संसाम त्युक्षणादिति। छेदनं कथनं। शंखश्चुशायायां नास्तवयानांसंहृतवछो
चमिति। शयनादीनां संहृतशब्दवाच्यचासंहृतराशीभूतद्रव्यवत् प्रोक्षणेन शुद्धिरि
त्युक्तं भवति। तथाहांगिराः। शयनासनयानानि रोमवस्त्राणि यानि च। चावस्त्राणि नानि स
र्वाणि संहृतानि प्रचक्षतमिति। मनुः। चैलवच्चर्मणां शुद्धिर्वैदलानां तथैव च। शाक
मूलफलानां च धान्यवच्छुद्धिरिष्यते। इति। अंत्यः तरपि। पक्षिपवित्र चर्म चामर चणवे
णवनक्कलानां चैव लच्छुरिति। अत्र पवित्रं दर्भ प्रमयानां क्षणमिति क्षणराडस्यालो। १८५

निधीयते। भूतस्पृश्यत्वादीनामिति वस्त्रादिशुद्धिः। अत्र मनुः। ज्ञानं तपोऽग्निराहारो वायुः
कर्मार्ककालौ च शुद्धेः कर्तृणि कर्म्मिणां। सर्वेषामेव शौचानां अर्थशौचं परं स्मृतं। योऽर्थे
शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः। क्षांत्या शुध्यंति विद्वांसो दानेनाकार्यकारिणः।
प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः। मृत्तोयैः शोध्यते शोध्यं नदी वेगेन शुध्यति। रज
सा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः। अद्भिर्गात्राणि शुध्यंति। विद्यातपोभ्यां भूतात्मा
बुद्धिर्ज्ञानेन शुध्यतीति। अथ अपवादाः। तत्र बृहस्पतिः। पादौ शुचिर्ब्राह्मणानां अजा
श्वस्य मुखं शुचि। गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषितामिति। अत्र उपहत ब्राह्मण
६ चरस्पृष्टस्य शुद्धिमित्यर्थः। एवं ब्राह्मणव्यतिरिक्तचरणस्पर्शे दोषप्रसक्तौ भवतीति। तथा
अदुष्टाः संतता धारा वातोद्धूताश्च रेणवः। स्त्रियो वृद्धाश्च बालाश्च न दुष्यंति कदाचनेति।
बृहस्पतिरपि। दोहको यंत्रकारश्च रुहस्य गोदोहनी यंत्रविनिःसृतानि। बालैरनुष्ठी
तानि प्रत्यक्षदृष्टानि शुचीनि तानि। यंत्र विनिःसृतानि इक्षुरसादीनि स्त्रीनिर्वा

पु.२८ लाके श्वरथ्याप्रसर्पणादिनिमित्तैर्यं आचमनप्राप्तिरत्राचमनस्य बाधार्थं वचनमस्या
रूपिपाकादीनिहतानि तानि श्रुचिनिःस्रुतानीति प्रत्यक्षतो ज्ञानान्यपि स्पर्शपाकादी
निकर्माणि शुद्धानीत्यर्थः। मनुरपि। नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितं। ब्रह्मचारिग
तं भैक्ष्यं नित्यं मेध्यमिति स्थितिरिति। ब्रह्मचारिपदं भिक्षुकोपलक्षणं। भिक्षादत्तस्थितं
सिद्धान्नं रथ्योपसर्पणोपघातेन नाशुद्धं भवतीत्यर्थः। तथा च। आपूपाः सक्तवो धानास्त
क्रं दधि घृतं पयः। एतत्पण्यगतं सर्वं चांडलपात्रे चेद्वेदिति। अत्र सक्तुपूपादीनां ग्र
त्विवेसच्यपि आपणीयान्यत्र द्वापि इति। शंखवचनात्। सिद्धान्नास्तु न दध्यात्। शंखोपि
नारीणां चैव वत्सानां शकुनीनां शुनां मुखं। रतौ प्रस्रवणे वृक्षे मृगयायां सदा शुचिरिति।
तथा च। आकराः शुचयः सर्वे शकुनिः फलपातने। श्वा मृगव्याहरणे मेध्यं वत्सी सुखं च।
वारुणी स्त्रीमुखं शुचिरिति। पीतमद्याया अपि ब्राह्मण्या यस्याः सुरायाः शुचि प्रवर्गंधरसा वा १८५
दिविवर्जितं मुखं रतिसंगमे शुद्धमेवेत्यर्थः। आकरास्सर्वे सुराकरव्यतिरिक्ताः। तदाह पैठी

नसिः। आकराः शुचयः सर्वे वर्जयित्वा सुराकरमिति। यमोऽपि। अदुष्टं कांचनं गावः स्त्रीमुखं
कृतपंडरीं न दूषयति विद्वांसो यज्ञेषु च समं तथा। मुखतो गौरमेध्या तु मेध्यं तु मुखतस्त
थाप्सुष्टता गौरजश्चाश्वः सर्वतोऽश्च विद्वांसो यज्ञे सुष्टुतश्च तथा। तथा च मक्षिका विप्रुषः छाया
गौरश्वः सूर्यरश्मयः। रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशत्तु इति। अत्र मक्षिकाग्रह
णमवर्जनीयस्पर्शानां दंशादीनामुपलक्षणार्थं विप्रुषः। अविज्ञाताकाराः। छायारजश्च नि
षिद्धव्यतिरिक्तानां तथा च। वसिष्ठः। तस्य यन्मासं सुविज्ञानं मनुरब्रवीत्। क्रव्यादैर्हतस्या
त्येवं चांडालाद्यैश्च दस्युभिरिति। क्रव्यादाः श्वपनादयः। दस्यवो वा व्याधाः। अत्रिरपि मधुप
र्के च सोमे च अप्सु प्राणाहुतीषु वा नोच्छिष्टस्यानवद्योषास्त्वत्रेस्य वचनं यथेति। अद्भिस्तु
तोऽनानंतरममृतापिधानमसीत्यमृतीकरणार्थं या आपो मुखं तत्ताः सोममधुपर्कादिषु मं
त्राचारणविषये उच्छिष्टदोषो नास्तीत्यर्थः। षड्भिः शंमनेऽपि। तांबूले च भुक्तस्नेहावशिष्टके।
दंतलग्नस्य संस्पर्शान्नोच्छिष्टस्तु भवेन्नर इति। अग्निः पत्रे मूले पुष्पे तृणकाष्ठमये तथा।

सुगंधिलेपक्षयाद्भवेन्नोच्छिष्टस्तु नवै द्विजः। इति याज्ञवल्क्योपि। मुखजा विप्रुषो मेध्यास्तथा
चमनबिंदवः। श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः। उच्छिष्टेन स्पृष्टो द्रव्यहस्तो द्रव्य
मवादनिधायैवाचम्य शुध्यति। तथा च मनुः। उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचनेति।
अनिधायैव तद्द्रव्यमाचांतः शुचितामियादिति। अत्र उच्छिष्टेन इत्याचमनादेर्हं प्राय
श्चित्तं च शुक्लः पुरुषस्य चातो द्रव्यं च तद्यतोऽन्यानि दानि। अत्रामणिबंधपाणिप्रक्षाल्या
चमनमित्यक्षकाद्यमाधृत्याचमनं तु संतनुवतीसिमन्वाना केचिदाहुः। शरीरेनस्य
भूमिमात्रं द्रव्यस्याविवक्षितं। अतो देशांतरगत्ससंगादो द्रष्टव्यं। एवीवावमेदिति।
अयमत्र प्रायः। यथैवं शुरूपाशोचादशुचं द्रव्यं तथैव चाचसंबंधं शुल्कविर्नवतीति गौ
तमस्तु निधायाचमेदित्याह। तत्र विरोध इति चेत् नगरीयेद्रव्यं निधायाचामेदन्यदंग
स्थं तु चाचामेदिति। यच्च यान्मे च विशेषः। याज्ञवल्क्योपि। मुखजा विप्रुषो मेध्यास्तथा
चमनबिंदवः। श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिरिति। अत्राचमनबिंदवश्च १८६

परस्याः पतद्भिरुदकबिंदुभिर्नुच्छिष्टनिपातो द्विर्यदि स्पृशाति मानदाः आचमनं न वेदियथः।
स्पृशंति बिंदवः पादौ य आचामतयः परान्। न तो मंडेस्तु समाइयानातेर प्रयतो नरः। परानावा
मयतः आचामतीति। अन्येन सागपिन्नद्वादुतत्वा आचमनपिता अशुचिः। तथा च मनुः। पा
द्यम आचमिके स्पृशमाड इवदिति। अत्रापि हतस्तु जलवा आचमनममी पृष्ठेन बिंदवः। पा
दास्पृशंतीत्यादात्रापि पादव्यतिरिक्तांगस्य विवक्षितत्वाद्यथः। गौतमेन विशेष इत्यर्थः।
त्रयः। मानुष्या विप्रुषच्छिष्टं कुर्वंतीत्यवदंग निपतंतीति। तथा बौधायनः। धिसर्पिपयः होइनांड
दो घ्राने विघ्रतो मार्जारस्तु च दर्वीचमारुत एव सदा शुचिरिति। स्मृत्यंतरेपि। अजाश्वमुखतो मे
ध्यं गावो मेध्यास्तु पृष्ठतो मार्जारस्तु क्रमेलोऽस्य दृष्टं नास्य गपादि ए मार्जारस्य शुचिस्तक
र्मकालादन्यत्र स्नानविधानात्। उपघातस्तु देदमनुत्रा। त्रीणि अप्रस्तापवित्राणि ब्राह्मणा
नामकल्पयतु। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते। अदृष्टमाजनं नं दुष्यतइति न
पुनस्त्रियमार्जारा को नरकालेकार्या। मार्जना विद्धा लादोषान इति मेधातिथे रति प्रायः। इ

तिशुध्य एवाहः॥ इति श्रीसूर्यसेनमहेंद्रविरचिते निर्णयामृते द्रव्यशुद्धिप्रकरणं॥ श्रीमत्तू
पेंद्रितृपनाथः सुधीः॥ छ॥ अथेदानीमाशौचप्रकरणमारभ्यते। तत्राशौचं द्विविधं सूतकं
मृतकं चेति। जननिमित्तं सूतकं। मरणनिमित्तं मृतकमिति। तत्रादौ जननाशौचमुच्य
ते। तत्र स्रावपातप्रसवरूपत्वेन त्रिविधं। तत्र गर्भधारणान्मासचतुष्टयाभ्यंतरे गर्भस्य च्यु
तिः स्रावः। पंचमषष्ठयोः पातः। सप्तमादिषु प्रसवः। तदुक्तं स्मृत्यंतरे। आचतुर्थाद्भवेत्स्रा
वः पातः पंचमषष्ठयोः। अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेदिति। तत्र मासत्रयादर्वा
क् गर्भस्रावे मातुस्त्रिरात्रमाशौचं न पित्रादीनां। पाते तु मातुर्गर्भसमाससंख्यानिशा
आशौचं पितुस्त्रिरात्रं सपिंडानां चोतत्स्नानमरीचिः। स्रावे मातुस्त्रिरात्रं स्यात्सपिंडानां
च वर्जनं। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति। स्रावे पितुः स्नानादेव शुद्धिः।
स्नानमात्र एव शुकपक्षस्यति। हृदयवसिष्ठस्मरणात्। गौतमोऽपि। स्रंसने गर्भस्य यदं नवे
ति याज्ञवल्क्योऽपि। गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणं। अत स्रावइति पतने। १८३

यत्तु यत्न वचनं। अजातदंते तनये गर्भच्युते तथा। सपिंडानां तु सर्वेषामेकरात्रमशौचक
मिति। एतच्चयुग्मवत् पित्रादिविषयं। सद्यः शौचं सपिंडानां गर्भस्य पतने सतीत्यादियत्
राणवचनं। मासचतुष्टयाभ्यंतरद्रवरूपस्य गर्भस्य पतने द्रष्टव्यं। इदं गर्भस्रावा
शौचं सर्ववर्णसाधारणं। यत्तु मरीचिवचनं। गर्भस्रावे यथामासमचिरे तूत्तमे त्रयः। रा
जन्ये तु चतुरात्रं स्याद्विश्यपंचाहमेव तु। अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तितेति। उत्तम
ब्राह्मणे चिरमासत्रयाभ्यंतरे गर्भस्रावे चतूरात्रमित्याद्यविवहितार्थे रात्र्यादी
नां संपातेऽपि तथा एतन्मतस्नानाशौचविशेषो कोविरोध इति चेत्। अत्रोच्यते। एवं स
ति शूद्रस्य स्रावे अष्टाहेन शुद्धिरुक्ता। पंचमासि गर्भपाते न्यूनानि निशा इति। पंचा
हमाशौचं भवेदत्र पाताशौचात्स्रावाशौचाधिक्यं प्रसज्येत। अत एवाह जातूकर्ण्ये तु चतुरा
त्रमित्यादिवाक्यविशेषविवक्षितार्थमवांगीकर्तव्यं। अथवा गुणवद्दुर्गुणवद्विषयत्वेन
न्यूनाधिककालकल्पना व्यवस्थापनीयेति। इदं पारिजातकाराणां मतं। वयं च वमन्याम

दे अविरतत्वमेवयत्र यद्दति ब्राह्मणविषये मासत्रयात्पूर्व गर्भस्रावे दिनत्रयमाशौचमु
क्तं।तत्प्रसंगादात्मानं घातयेद्यस्तु तस्य स्नपनत्रयाणां तुल्यं।तस्य त्रिरात्रमाशौचमित्यादि वि
षये यत्र ब्राह्मणस्य त्रिरात्राशौचं।तत्र क्षत्रियादेश्चतुरात्रादिकमिति विशेषणपरिभा
ष्यते।इयं परिभाषा गर्भस्रावेपि माघसांद्धीदिति स्रावे मातुस्त्रिरात्रं स्यादिति।मरीचिव
चः।वाक्यांतरप्रारंभः।अन्यथा पुनरुक्तत्वेन वा व्यर्थत्वाद्वाक्यांतरमनारंभणीयमेव स्यात्।तु
ल्यस्पर्शेनाप्येवमेव परिभाषा तत्र त्रिरात्रं विप्राणामाशौचं संप्रदर्शयन्नो तत्रस्थ दे
५ क्षत्र द्वादशाहं षड्रात्रं क्षत्रवैश्ययोरिति।अत्र क्षत्रियादीनां षण्नवद्वादशाहस्तूक्तो न तद्व्यापवि
षयमगुणविषयं वा।मरीचिना उपंचाष्टादशमुक्तं।तद्गुणविषयमापद्विषयं वा वेदितव्य
मिति।सप्तमासप्रभृति प्रसवरूपजाहद्वादशादिकं यथावर्णमाशौचं संपूर्णं कार्यं।जनना
शौचे जनननिमित्तमस्पृश्यत्वमाचतुर्दशाहादिकं पितुः सचेलस्नानमस्पृश्यत्वं।तथा च संवर्तः। १८८
स्नान जाते पुत्रे पितुः स्नानं सचेलं तु विधीयते।माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति।सपिंडा

व ५ वैश्य ५।

न न

नां जनननिमित्तमस्पृश्यत्वं नास्त्येवेत्याहांगिराः।सूतके सूतिकावर्ज्यं संस्पर्शो न निषिध्यते न
ति सूतिकाया देवपित्र्यादिकार्येषु पैठीनसिना विशेष उक्तः।सूतिकां पुत्रवतीं विंशतिरात्रेण
कर्माणि कारयेत्।मासेन स्त्रीजननीमिति।जननाशौचे प्रथमषष्ठदशमदिवसेषु दानप्रति
ग्रहादिकाराष्ट्रौ।तदाह व्यासः।सूतिकावासनिलया जन्मदा नाम देवताः।तासां यागनिमि
त्तं तु शुद्धिर्जन्मनि कीर्तिता।प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा।त्रिष्वेतेषु न कुर्वीत सूतकं पु
त्रजन्मनीति।वृद्धयाज्ञवल्क्योपि।तत्र सर्वं प्रतिग्राह्यं कृतान्नं जनने न हयेतु न हर्षिचापिता
मोदात्तु द्विजश्रेष्ठां जायताम्वरेत्।मार्कंडेयोपि।रक्षणीया तथा षष्ठी निशा तत्र विशेषतः।रा
त्रौ जागरणं कार्यं जन्मदानां तथा बलिः।पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः।रात्रौ जा
गरणं कुर्युर्दशम्यां चैव सूतके।इति जननाशौचं।अथ मृताशौचमुच्यते।तत्र मृते जाते जात
स्पर्शनात् प्राङ्नाभिच्छेदनान्नाभिच्छेदनादूर्ध्वं शिशुमरणे मृते जाते च सपिंडानां निमित्ते सद्यः शु
द्धिः।जनननिमित्ताशौचं सर्वेषां सुस्पर्शं।तदुक्तं स्मृत्यंतरे नाभिच्छेदनादूर्ध्वं शिशुमरणे

दंतजननिमित्ताशौचं तच्चान्यथा। वर्षे सर्वेषां सपिंडानां मध्ये वा मरणनिमित्ते सद्यःशुद्धिरिति। पा
रस्करोपि। गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत्। सपिंडानां प्रसवनिमित्तस्य विद्यमान
त्वादिति। मिताक्षरायां बृहन्मनुरपि। दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौचं
न कर्तव्यं सूत्याशौचं विधीयत इति। अत्र सर्वत्र दशाहग्रहणं उपलक्षणं। तदुक्तं स्मृत्यंतरे।
अंतर्दशाहोपरतस्य सूतकाद्विनिर्वाशौचमिति। हारीतोपि। जातमृते मृतजाते वा सपिं
डानां दशाहमाशौचमिति। अत्र जातमृत इति नाभिच्छेदनादूर्ध्वं मृते तदाह जैमिनिः। याव
न्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति। यत्तु बृ
हस्पतिवचनं। जाते मृते मृते जाते कुलस्य सद्यःशौचमिति। इदं मरणनिमित्ताशौचवि
षयं नाभिच्छेदात्पूर्वं शिशुमरणे पित्रादीनां जनननिमित्ताशौचे त्रिरात्रं मातुः प्रसवमर
णनिमित्ते सद्यःशुद्धिः। तदाह बृहन्मनुः। जीवन् जातो यदि ततो मृतः सूतक एव तु। सूत
कं सकलं मातुः पित्रादीनां त्रिरात्रकमिति। तत्र छेदनं तरमेव नाभिच्छेदात्पूर्वमित्यर्थः। यत्तु १८८

स्मृत्यंतरे पिंडजीवन्नूढा तोयदिष्ट्या सद्य एव विशुध्यतीति। एतत्प्रेताशौचाभिप्रायं। अत्राप्य
ग्निहोत्रार्थं स्नानोपस्पर्शनात्सद्यःशौचमिति। नामकरणात्तु प्राक्मरणे सद्यःशौचं प्राक्नाम
करणात्सद्यःशुद्धिरिति। सद्य इति मातापितृव्यतिरिक्तविषयं। तयोस्तु त्रिरात्रं तदाह कश्यपः।
बालानामदंतजातानां त्रिरात्रेण शुद्धिरिति। तथा बिज्ञिकादिन्निसंबंधस्तु अनुरुधसदृधस्य
दमिति। मातापित्रोरुपनयनपर्यंतं त्रिरात्रमेव। सपिंडानां तु नामकरणादनंतरं अग्निदानादि
संस्कारस्तु ते एकरात्रं। अकृते सद्यःशुद्धिः। तदुक्तं स्मृत्यंतरे। अदंतजाते तनये शिशौ गर्भचक
ते तथा। सपिंडानां तु सर्वेषां एकरात्रमशौचकं। याज्ञवल्क्योपि। आदंतजननात्सद्य आचौलान्नै
शिकी क्रिया। त्रिरात्रं व्रतमौ देशाद्दशरात्रमतः परमिति। नामकरणादूर्ध्वं अग्निदानादिकम।
पितिकल्पेन कुर्यात्। तदाह मनुः। नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया। जातदंतस्य वा कु
र्यान्नाम्नि वापि कृते सति। अत्रोदकक्रियेत्युदकक्रियायां अग्निदानपूर्वकत्वात् अग्नि
दानस्याप्युपलक्षणं। संस्कार इत्यग्नीमेवात दादलोपाद्धि। इत्यग्नीमेवादकं उदकं दद्याद्भूमि

संस्कारमेवचेति॥ संस्काराकरणे पक्षे निखननमेवा तत्र कोंकनद्विवर्षप्रेतं घृताक्तं निखनेत्
त्रिःयमगाथागायमानोयमसूक्तमनुस्मरन्नुप्रथमवर्षे अकृतचूडस्य चूडाकरणानंतरं अ
ग्निसंस्कारस्यावश्यकत्वात् त्रिरात्रमेवा कनद्विवर्षप्रेतं गर्भपतने वा सपिंडानां त्रिरात्रमेव नि
मित्तस्मरणात्तु वर्षत्रयादूर्ध्वमकृतचूडस्याप्यग्निसंस्कारनियतत्वात् त्रिरात्रमाशौचं नात्रिव
र्षस्य कर्तव्या बांधवैरुदकक्रियेति मनुना त्र्यून त्रिवर्षस्य संस्कारनिषेधेन त्रिवर्षादूर्ध्वमच्यु
तचूडानां अजातचूडानां कन्यानां मरणे सद्यः शुद्धिः न दातापि संभवः अजातचूडायां कन्यायां
सद्यः शुद्धिः जातचूडानामप्रिवाग्दानात् पूर्वमेकाहेन शुद्धिः तदा ह याज्ञवल्क्यः अदत्तसु
तकन्यासु बालेषु च विशोधनमिति अदत्ता वाग्दानरहिता कन्या तन्नामाशौचविषये त्रि
षु पुरुषमेव सापिंड्यं तदाह वसिष्ठः अदत्तानां तु स्त्रीणां सपिंडानां त्रिपुरुषी ज्ञायत इति रू
वाग्दानादूर्ध्वं विवाहसंस्कारात्पूर्वमपि स्त्रीणां त्रिरात्रमाशौचं तदाह मरीचिः वारिपूर्वं
प्रदत्ता तु या नैव प्रतिपादिता असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति या केवलं १८०

मार्ह कुबेर

प्रतिपादिता वाग्दत्ता वारिपूर्वं न च प्रदत्तेत्यर्थः तस्याः पितृपतिपक्षयोरित्यर्थः विवा
हानंतरमाशौचविशेषस्तु विष्णुनोक्तः असंस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणयो
तु पितृगृहे स्याचेत्तदैकरात्रं त्रिरात्रं वा एकरात्रं प्रसवे त्रिरात्रं मरणे इत्यर्थः इदं वया
वस्थात्मकमाशौचं सर्वसाधारणं तदाहांगिराः अविशेषेण वर्णानामर्वाक् संस्कारक
र्मणः त्रिरात्रात्तु भवेच्छुद्धिः कन्यास्वह्नो विधीयत इति कृष्णस्यांगापि अविशेषेण सर्वेषां व
र्णानामनुपूर्वशः त्रिरात्रात्तु भवेच्छुद्धिरिति इति त्रियोवस्थाकृताशौचं अथ कृतसंस्काराणां व
र्णविशेषेणाशौचविशेषवचनानि तत्र विप्रस्य मौंजीबंधनानंतरं मरणे संपूर्णाशौचं क्षत्रि
यस्य धनुर्ग्रहणानंतरं वैश्यस्य प्रतोदग्रहणानंतरं शूद्रस्य वस्त्रग्रहणानंतरं तदाह हा
रीतः मौंजीबंधनाद्यनंतरं ब्राह्मणादिषु वर्णेषु संपूर्णाशौचनिमित्तं न वर्तीयथः
अतस्त्र ब्राह्मणादीनां मौंजीबंधनाद्यनंतरं दादपिंडोदकदानासंस्कार संपूर्णाशौचं कच
व्यामिति कृतं विप्रं पश्चिमनम्परघारणनिर्दिष्टं क्षत्रियमुत्तरारणाद्वैश्यं पूर्वेणा शूद्रं द

दार

क्षिणेनोत्पादमनुः दक्षिणेन सुसंतोषौ द्वैविध्यं पुरुषाग्रणानि दूरतः (क्षत्रियसुतः)
प्रतिमो नरः पूर्वैस्तु यथा यो द्विजन्मनः शूद्रो दासादि कर्म पुत्रादिभिः कार्यं तदु
क्तं स्मृतिसंग्रहे पुत्रः पौत्रश्च तत्सुतः पुत्रिकापुत्र एव च इति अत्र तु अत्राप्यनघा
दयादि धा पुत्रवचनेन तथा याज्ञवल्क्यनाम्ना। औरसो धर्मपत्नीजः तत्समः पुत्रिका
सुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः
स्मृतः। कानीनः कन्यकाजातो मातामहसुतः स्मृतः। अक्षतायां क्षतायां वा जातः पौन
र्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रि
मः स्यात्स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सो
पि विद्धोऽपविद्धसुतः। पिंडदोंऽशहरश्चैषां पूर्वाभावे परः परः। सजातीयेष्वयं प्रोक्तः
स्तनयेषु मया विधिः। इति सवर्णा धर्मविवाहोढा तस्यां जात औरसः मुख्यः तथा आ
सुरादिविवाहोढा अनुलोमविवाहोढायां सवर्णा सापिंडा तीभिरशाद्दवाच्याः अत्राप्य १९१

यं क्रं भः कालादर्शे प्रोक्तः पुत्रकाः पुत्रश्च यत्राद्यधर्मविग्रहः पुत्रिकायाः पुत्र एकः यथा।
अत्राहं कोप्रदास्यामि तुभ्यं कन्यामलंकृतां। अस्यां यो जायते पुत्रः स मम पुत्रो भवेदिति।
पुत्रिकैव पुत्रश्चापरः। तदभावे क्रीतः। तदभावे कृत्रिमः। तदभावे दत्तः। तदभावे अपवि
द्धः। तदभावे पत्नी। पत्न्यभावे गूढजः। तदभावे कानीनः। तदभावे पौनर्भवः। तदभावे स
होढजः। तदभावे सोदर इति। नत्तु कानीनव्य
ढाः। यद्बृहस्पतिवचनं पुत्राभावे पत्नी स्यात्तदभावे तु सोदरः। अधिकारस्य स्मृतिसंग्रहोक्त
लिखितपुत्राभावविषयं। कानीनादीनां च तु संपत्त्यभावे अधिकारः श्रोत्रियश्चाप्स्मृता
चानुतथा कानीनगूढसहोढजस्तु न दैवैर्वृतनयाश्चयापन्ना तदभावे तत्सुतः। तदभावे असोदरः।
द्वित तदभावे धनहारी दौहित्रः। तदभावे सोदरो भ्राता। तदभावे असोदरः। तदभावे तत्सुतः। तदभावे सपिंडः।
तदभावे तत्पुत्रः। तदभावे माता। तदभावे असोदरः। तदभावे शिष्यः। तदभावे ऋत्विक्। तदभावे आ
तदभावे सोदकः। तदभावे मातुः सपिंडाः। तदभावे नृपतिः। ब्राह्मणजातीयेन पुरुषेणोत्प
चार्यः। उपनीय सकलवेदाध्यापयिता। तदभावे नृपतिः।

द्व्यं दद्यात्कारयेदिति। तत्र वाक्यानि। तदाहस्तु मंत्रः। मातुः पितुश्च कुर्वीत सम्यक्तनयौरसः
स्मृतः। पितृमेधिकसंस्कारं मंत्रपूर्वकमाचरेत् इति। स्मृतिसंग्रहे। पुत्रपौत्रश्च तत्पुत्रः पुत्रि
कापुत्र एव चेति। तथा चापुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तत्समं नियोधनदायश्च दौहित्र
ततो भ्राता च तत्सुत इति। तथा। भ्रातुः सोदरा भ्राता कुर्याद्दाहादि तत्सुतः। ततस्त्वसोदरो
भ्राता कुर्याद्दाहादि तत्सुतः। ततस्तु सोदरो भ्राता तदभावे तत्सुत इति। तथा। ज्येष्ठस्य वा
धवं प्रेतं पिता भ्राता तथाग्रजः। जननी चापि संस्कुर्यात् मदनरत्ने यथा यवेत्तु। न तु। न च माता
न च पिता कुर्यात् पुत्रस्य पैतृकं। नाग्रजश्च तथा भ्राता ब्राह्मणां च कनीयसामित्यादि वा
क्यै माता पित्रोः पुत्रस्यौर्ध्वदेहिक निषेधस्तयोः कथमधिकार इति चेत्। निषेधस्य पुत्रा
द्यधिकारि सद्भाव विषयत्वात्। विधानस्य तद्विहीन विषयत्वं च। तदाह बौधायनः। यद्यस्ति
द्वेन कुर्यान्मांसपिंडीकरणं विना। गयायां तु विशेषेण ज्यायानपि समाचरेदिति। कुर्या
त्तां माता पितरौ विशिष्टाः कांख्यापनोऽपि। अनुजा अग्रजा वा पिता वा कुर्वीत संस्क्रियां। १०२

वतस्तु सोदरस्तु तत्क्रमेण तनयस्त्रयोरिति। स्मृतिसंग्रहेपि। पत्नी भ्राता च तज्जः श्वपि
ता माता तथा स्नुता। तथा। भगिनी भागिनेयश्च सपिंडः सोदकस्तथा। असंनिधाने पूर्वेषां पुत्रा
रः पिंडदाः स्मृता इति। मार्कंडेयपुराणेपि। सरस्तु रुसन्द बंधोश्च सरवाय श्वसुरस्य वा जा
मातास्ने दत्तः कुर्याद्विखिलं पितृमेधिकमिति। सर्वाभावे तु प्रतिकारयेत्तस्य रिक्थिनः। तज्ज्ञा
तीयेनरैः सम्यक् दाहाद्याः सकलाः क्रियाः। सर्वेषामेव वर्णानां ब्राह्मणो नृपतिर्यतः। स्कं
दपुराणे। सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकमिति। अत्र स्त्रिय इति पत्नी व्यतिरिक्ताप
त्नी तु धर्मविवाहोढा वा नासुरादिविवाहोढा। सा उक्ता स्त्रीमात्रमेव। तदाह शातातपः। धर्म्ये वि
वाहेकूढाया सा पत्नी परिकीर्तिता। सर्वाधिकारिणी ह्येषा यत्पूर्वे धर्मकारिणीति। क्रयक्रीता
तु या नारी न सा पत्नी विधीयते। न सा दैवे न पित्र्ये स्यात् दासीं तां मुनयो विदुरिति। गौतमोपि।
पुत्राभावे सपिंडा मातृसपिंडाः शिष्याश्च दद्युः। तदभावे ऋत्विगाचार्यौ वेति। विष्णुपुराणे
विशेष उक्तः। पूर्वाः क्रिया मध्यमतास्तथान्यास्त्रिप्रकाराः। क्रियास्त्वपाः स्मासात्तु वंश्यपुत्रे।

अकृतदन्तानां मध्ये तु या दादाद्याः क्रियाः स्मृताः। ताः पूर्वमेव मासि मासे एकोद्दिष्टं संज्ञि
ताः। प्रेतपितृत्वमापन्ने सपिंडीकरणादनु। क्रियंते याः क्रियाः पित्र्याः प्रोच्यंते ता नृपोत्तराः। पि
तृमातृसपिंडेषु समानेषु तिलैस्तथा। तस्य तातगतेर्विप्रराज्ञा वा धनहारिणां। आद्य
दयः क्रिया कार्याः पुत्राद्यैरेव चोत्तराः। न दौहित्रैर्न चानिरश्रेष्ठकार्याः पित्रादिति। शश्वेति।
अपुत्रायाः स्त्रियाः सपत्नीपुत्रः पतिर्वा और्ध्वदैहिकं कुर्यात्। तदाह मनुः। बह्वीनामेकप
त्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति। कात्यायनोऽपि।
विद्यमानौरसः पुत्रोऽप्यन्याइर्ध्वदैहिकं न दद्यात्। सपत्नीजः सोदराद्यास्तथा हृतास्तथा।
हृतातनत्रकारणं अरस्सवदेवश्चार्थी। तेषामभावे तु पतिः। तदभावे तु सपिंडक इति। स्त्री
णामपि नार्यां पिंडं पतिर्दद्यात् भर्त्रे नार्यपि तथैव च। वस्त्रादयस्तु पार्वे च तदभावे तु सोद
र इति। सपत्नी वा कुर्यात्। तदुक्तं स्मृत्यर्थसारे। पुत्राभावे मिथो दंपती सपत्न्यश्चेति। अ
नूढाश्च भार्याः सदना स्तेनिधनमुच्यते। न तु विना रामार्जं असंनिधानं विज्ञान दद्यांतर १०३

स्त्रियाचेन्नवति। अन्यथा पुत्रादावधिकारिणि देशांतरस्थिते मृतस्य दारादिकर्माणां
लोप एव स्यात्। तथा च सति। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽह्नि यो द
द्यात्स दशाहं समापयेदिति। वचनमप्यनुपपन्नमेव स्यात्। न तेन तथा सावेद्या ह्यासंनिध
नवचनमेवांगीकार्यः। अनुपनीतोऽपि पुत्रः अकृतचूडश्चेत्तु पितुरग्निदानं समंत्रकं लब्धो
त्तरकर्मणि अर्थे नियोक्तव्यः धर्मपत्नी वपन्नः एवमेव तदाह कात्यायनः। असंस्कृतेन
पन्याचु अग्निदानं समंत्रकं। कर्तव्यं मृतवत्सर्वं कार्यं दद्यमेव हि। वर्षत्रयादूर्ध्वमकृतचू
डोऽपि सर्वं मंत्रवत्कुर्यात्। तदाह मनुः। नत्वपेतोऽपि कुर्वीत मंत्रवत्पैतृमेधिकं। यद्यसौ
कृतचूडः स्याद्यदि स्यात्त्रिवत्सर इति। न त्वकृतचूडस्तु कुर्वीत नोदकं पिंडमेव च। स्वधाकार
प्रयुंजीत वेदोच्चारणं न कारयेदिति। तथा च। कृतचूडोऽनुपनीतस्तु पित्रोः श्राद्धं समाचरेत्। इति
निषेधात्कथं तत्र चूडस्य पंचमं वर्षात्पूर्वमधिककरणाधिकार इति चेत्। सत्यं। एतद्वचन
द्वयं प्रथमवर्षचूडाकरणाद्युतविषयं। तथा च मनुः। नह्यस्मिन्युज्यते कर्म किंचिदामौ

लिबंधतात्॥ नाग्निव्याहरये ब्रह्मघ्नानि नयनात् तदिति॥ घधननिनयनं प्रेतकर्मनेसम
र्थबालाक पुत्रे तद्वर्नंतराधिकारिणि समर्थः सर्वं किं मंत्रवत् किं न क्रियत इति चेत्॥ मद्यांस
तिपुत्रे निषेधात्॥ तथाह्य घ्नश्रुतः॥ पुत्रे पुवन्नमानेषु मान्यं विकारयेत्स्वधां॥ अत्र तु कल्या
घ्न पुत्रस्य श्राद्धं कुर्यन्निनालिक इति॥ ब्रह्मचर्यापिमातापितोपाध्यायाचार्याणामौ
र्ध्वदैहिकं कुर्यात्॥ तदाह याज्ञवल्क्यः॥ आचार्य पित्रुपाध्यायान्निर्हृत्यापि व्रती व्र
व ती॥ सकटान्नं चाश्नीयात् पिलो न चाले सह संविशेत्॥ इति॥ व्रती ब्रह्मचारी॥ व्रते तु पन्य
न न निमित्ते नैव्रचर्या ह्॥ अनातं तत्र तप तस्य अर्थः॥ सकटान्नं मा शौचान्नं॥ माता
पितृव्यतिरिक्त विषयो॥ स एव दानब्रह्मचारिणः कुर्युः पतिता सा श्वेति॥ उदकमिति
पिंडदानस्याप्युपलक्षणं॥ मनुरपि॥ आदिष्टी नोदकं कुर्यादाव्रतस्य समा
पनात्॥ समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेत्॥ क्लीबाद्याश्रपि क्रियादानि त्वं
तिह इमन्त्रः॥ क्लीबाद्या नोदकं कुर्युः स्तेना व्रात्या विधर्मिणः॥ गर्भभर्तृद्रुहश्चैव सु १९४

राप्यश्चैव योषित इति॥ अज्ञातिसंस्कारश्चौनकेन विशेषस्तत्र॥ अज्ञातिदादप्र
थमे तृतीये पंचदशादि पिंडानू॥ अष्टौ द्वितीयेदिने संचयनं अस्थां चतुर्थदिवसे च
कुर्यात्॥ इति स्ववेक्षि सपिंडाद्यधिकारिणि पितृतानां पाषंडादीनामौर्ध्वदैहिकं
न कार्यं॥ तदाह याज्ञवल्क्यः॥ पाषंड्यनाश्रिताः स्तेना भर्तृघ्न्यः कामगादिकाः॥ सुराप्य
आत्मत्यागिन्यो नाशौचोदकभाजना इति॥ पाषंडवेदबाह्यलिंगधारणं॥ अवि
कारस्मति आश्रमविशेषरहिता अनाश्रिताः॥ ब्रह्मस्वव्यतिरिक्तो न मद्द्रव्या
पहारिणः स्तेनाः॥ पाषंडादिमरणस्याशौचादिनिमित्तत्वाभावात् सपिंडैरुदका
दिन कर्तव्यमित्यर्थः॥ अंगिराश्च॥ चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दं
ष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां॥ मनुरपि॥ वृथासंकरजातानां प्रव्रज्यासु
च तिष्ठतां॥ आत्मनस्त्यागिनां चैव निवर्तेतोदकक्रियेति॥ आत्मत्यागिषु विशेषो
गौतमेनोक्तः॥ प्रायानाशकशस्त्राग्निविषोद्बंधनप्रपतनैश्चेच्छतामिति॥ एतेषां

रीरत्यागादिषु उत्पन्नदोषले द्विश्चावर्षानंतरं नारायणबलिं कृत्वा सर्वमौर्ध्वदे
हिकं कुर्यात्। तदुक्तं। आत्मनस्त्यागिनां नाशि पतितानां तथा क्रिया। तेषामपित
यागंगातोयसंस्थापनं मतमिति। षट्त्रिंशन्मते। पिंडो ब्राह्मणदत्तानां च पतिता
नां तथैव च। कुर्याद्वसंवत्सरात् कार्या सर्वमिवौर्ध्वदेहिकमिति। वृद्धयाज्ञवल्क्यः। पि
नारायणबलिः कार्यो लोकगर्हाभियां नरैः। तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद
न्मनुरिति। आयुषः अनित्यत्वात् न्यायानुसारतो द्विगुणं प्रायश्चित्तं विधाय ना
रायणबलिं कृत्वा संवत्सरादर्वागपि कार्यं। अन्यथा कर्मलोपः संपद्यते। आहिता
ग्नेस्तु विहितमार्गेण मृतस्य विषये गिरसा विशेष उक्तः। वितानं प्रक्षिपेदप्सु आवस
ष्प थ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमानो वृथा मृत इति। आहिताग्निर्ब्राह्मणो वि
षयेऽपाराशारः। चांडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि। आहिताग्निर्मृतो वि
शेषेणात्मघातकः। दहेत् ब्राह्मणं विप्रो लोकाग्नौ मंत्रवर्जितं। दत्वास्थीनि पुनर्द १९५

ग्ध्वा क्षीरेण क्षालयेत्ततः। स्वनाग्निना स्वमंत्रेण पृथगेतत् पुनर्दहेदिति। एवं निंदितमृत्यु
नामृतानामन्न तत्प्रायश्चित्तानां छेदेनौर्ध्वदेहिकं स्वचाप्रायश्चित्ते न शुद्धेन वा। तदु
क्तमाम्नायोश्चाग्निमुदकं स्नानं स्पर्शनं वहनं कथा। रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण
शुध्यति। संवर्तोपि। एषामन्यतमं प्रेतं यो दहेत दहेत वा। कटोदकक्रियां कृत्वा कृच्छ्रं
सांतपनं चरेदिति। उक्तनिमित्तैः प्रमादेन मृतानां चाशौचं कार्यं। तदाहांगिराः। अथ
कश्चित्तु प्रमादेन म्रियेताग्न्युदकादिभिः। तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिये
ति। शास्त्रोक्तमार्गेणात्मघातविषये विशेषस्त्वापस्तंबादिषूक्तः। यथा। वृद्धः शौचस्मृ
तेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः। तस्य त्रिरा
त्रमाशौचं द्वितीये त्वस्थिसंचयः। तृतीये तूदकं तथा चतुर्थे श्राद्धमाचरेदिति। सर्पहते
तु विशेषः स्मृत्यर्थसारे प्रोक्तः। तस्य नागव्रतं कार्यं। तत्संवत्सरं नागदष्टानां पंचमीमार
भ्य पंचम्यामुपवासः कार्यः। यद्वा चतुर्थ्यामेकभक्तं पंचम्यां नागं कनकं वा पिष्टं दारुमयं मृन्म

यं वा। नागं पंचफणं कृत्वा गंधैः करवीरैः शतपत्रैर्जातिकुसुमैः अनंतं वासुकिं शेषं
पद्मं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालिकं तक्षकं कपिलं पंचम्यां संपूज्य प
श्चाद्ब्राह्मणान् घृतपायसमोदकैर्भोजयेत्। संवत्सरांते त्रिवर्षं पूज्यमद्ब्राह्मणभो
जनं। सौवर्णनागदानं गोदानं च कुर्यादिति। भविष्यत्पुराणे। सुवर्णभारनिष्पन्नं
नागं कृत्वा तथा गवं। व्यासाय दत्वा विधिवत्पितुरानृण्यमाप्नुयादिति। नारायणबलि
कृत्वा श्राद्धादिकं च कुर्यात्। नारायणबलिश्च स्मृत्यर्थसारे एवं प्रोक्तः। कस्यांचि
च्छुक्लैकादश्यां विष्णुं वैवस्वतं यमं च यथावदभ्यर्च्य तत्समीपे मधुघृताप्लुततिलमिश्रा
न् पिंडान् विष्णुरूपेण प्रेतमनुस्मरन् प्रेतस्य नामगोत्रमुच्चार्य दक्षिणाग्रेषु दर्भेषु द
क्षिणाभिमुखो दद्यात्। गंधपुष्पैरभ्यर्च्य पिंडप्रवाहणांतं कृत्वा नद्यां प्रक्षिपेत्। न पत्न्यादिभ्यो
दद्यात्। ततस्तस्यामेव रात्र्यामयुग्मान् ब्राह्मणान् मंत्र्यापरेद्युः प्रातः तन्मध्याह्ने वि
ष्णुमभ्यर्च्य एकोद्दिष्टविधिना ब्राह्मणपादप्रक्षालनादि तृप्तिप्रश्नांतं कृत्वा पिंडपितृय १९६

ज्ञवदवनेजनाद्यवलेपनांतं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय चतु
रः पिंडान् दत्वा नामगोत्रसहितं प्रेतं संस्मृत्य विष्णोर्नाम संकीर्त्य पंचमं पिंडं दद्यात्। ततो
विप्रानाचांतान् दक्षिणादिभिस्तोषयित्वा तन्मध्ये ब्राह्मणं चैकं प्रेतबुद्ध्या संस्मरन्नुत्त
हिरण्यादिभिरतिशयेन संतोष्य पवित्रपाणिर्विप्रः प्रेताय तिलादिसहितमुदकं द
पथि वा शूद्रनैस्तद्दत्तं दीतेति। पुत्राद्यौर्ध्वदेहिकाधिकारव्यतिरिक्तैर्बंधुदारादुहित्रिः
प्रकारा अपि दाद्याः क्रियाः कार्याः। तदुक्तं स्कंदपुराणे। मलमेतन्मनुष्याणां यद्द्रवि
णं यत्नकीर्तितं। तच्छूद्रमलमादत्ते दुर्विधं ज्ञातिनामपि। त्वपि क्लिष्टास्यानिर्दिष्टा निःक्र
तिः पावनी परा। श्राद्धदत्तं नान्यस्य कुर्यात्तु पिंडोदकक्रियेति। दायाद्यग्रहणाभावे
पुत्राद्यैरावश्यकाधिकारिभिर्निःक्रि प्रकारा अपि क्रिया कार्याः। तदाहुर्विश्वामित्राः पत्नं
बो पुत्रः पितुर्विज्ञा सा वै दद्यादिति। मार्कंडेयोपि। पुत्राभावे तु पत्नी माता तथा
पिता। विप्रा वा केपि शिष्यश्च कुर्वीरन्नौर्ध्वदैहिकमिति। अथ नारायणविषयविशेषः

श्र

स्मृत्यर्थसारे प्रोक्तः। सहदहने तु पिंड आद्यादोपाके कं काले कं कर्त्रैकं चन वदितं तत्रा
न्वारोहणं द्विधा कल्पितं। मत्री त्रि प्रेत ब लवयं तद्च्चारोहणं। अन्वारोहणं पश्चात्तु सारी
ते न फलातिशयं दर्शितं। यथा। मातृकं पैतृकं चैव यत्र चैव प्रदीयते। कुलत्रयं पुना
ति भर्तारं या नारी यानुगच्छतीति। शंखांगिरसावपि। तिस्रः कोट्योर्द्धकोटी च यारोमाणि च मा
नवे। तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छतीति। तथा। व्यालग्राही यथा व्यालं बिला
दुद्धरते बलात्। एवमुद्धृत्य सा नारी तेनैव सह मोदते। तत्र सा भर्तृपरमा स्तूयमाना
प्सरोगणैः। क्रीडते पतिना सार्द्धं यावदिंद्राश्चतुर्दश। दाहीतापि मृते भर्त्तरि या नारी स
मारोहेद्धुताशनं। सारुंधतीसमाचारा स्वर्गलोके महीयते। यावच्चाग्नौ मृते पत्यौ स्त्री ना
त्मानं प्रदीपयेत्। तावन्न मुच्यते सा हि स्त्रीशरीरात्कथंचनेति। तथा। ब्रह्मघ्नो वा सुरा
पो वा मित्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या। अयं च सर्वासां
स्त्रीणां अगर्भिणीनां अबालापत्यानामाचंडालं साधारणो धर्मः। न ब्राह्मणानुगमनं त १९७

स्त्रियां ब्राह्मणं ब्राह्मणशासनात्। या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत्। सा स्वर्गमा
त्मघातेन नात्मानं न पतिं नयेत्। इत्येवमादि वाक्यैर्ब्राह्मण्या अनुगमननिषेधकथ
सर्वस्त्रीणां साधारणो धर्म इत्युच्यते। सच्चानिषेधः पृथक्चित्यारोहणविषयत्वात्।
तदुक्तं पुराणे। पृथक्चितिं समारुह्य न विप्रा गंतुमर्हतीति। अन्यासां चैव नारीणां स्त्रीध
रमृ र्मोयं परमः स्मृत इति। देशांतरमृते तु विशेष उक्तः। देशांतरमृते पत्यौ ब्राह्मण्या हि निश्च
सहानुगमनं न वश्यं वा इतरासामप्यज्ञानात्वेपि पतिपादुकादिकं किमपि चिह्नं गृहीत्वा
विज्ञानावपि सवति। पृथक्चित्यमनुगमनादिति। अस्थीनां शरीरांगत्वेन तत्प्रत्यादि
कवाचित्यारोहणमेव। तथा अन्वारोहणविधिश्च स्मृत्यर्थसारे प्रोक्तः। अन्वारोहणं
सर्वजातिस्त्रीणां पतिव्रतानां प्रशस्तं। आत्मनाशबुद्धिः सर्वपापक्षयादनेकोद्धारणं
प्र च। अनेकसुवर्गफलं दंमोक्षदं च। आयुरारोग्यमैश्वर्यपुत्रमित्रादिसंपत्प्रदं च
दुःखदारिद्र्यवैधव्यादिनाशकरमित्यादि पुराणस्मृतिषु श्रूयते। तच्चान्वारोहणं ग

न्निर्हापानिषिद्धं। ब्राह्मणगन्निर्हापा ब्रह्महत्यासमं। क्षत्रियगन्निर्हापा क्षत्रियादिवध। एवांसवर्ण
वर्णस्थियापश्चात्सादेकचित्यारोहणं कार्यं। ब्राह्मणा एकचित्यारोहणमेव न पृथक्कृचि
त्यारोहणं कार्यं। क्षत्रियादिस्त्रियात्र वर्णादशांतरमृतं पृथक्कृचित्यारोहणमपि। अस
वर्णस्थियाः पृथक्कृचित्यारोहणमेव कार्यं। अन्वारोहणं करिष्यामीति संकल्प्य पत्नीं
मृतस्य चितिमारुह्य सर्वं प्रयोगं कारयेत्। यद्वा संकल्प्य प्रयोगे कृते दह्यमाने भर्तरि
नद्याग्निं प्रविशेत्। चितिभ्रष्टा च या नारी मोहाद्विचलिता प्राजापत्यं चरेत्। संघातमरणे
च विशेषस्तत्रैवोक्तः। यस्यास्त्री पुरुषमरणे एवं एकस्मिन्दहनकाले प्राप्ते संबंधस्त्री
नां समानधर्मिणां पश्चात्सहदहनं स्यात् उदकपिंडादिकं पितृपूर्वं कृत्वा पश्चात्स्त्रीपिंडं
कार्यं। असवर्णानां समानधर्मिणां पत्नीनां सहदहनं उदकपिंडादिकं पितृपूर्वं पृथगे
वा। असवर्णानां सवर्णानां समानधर्मिणां कपालाग्निदग्धानां सहवादादः। उदकादिकं
ज्येष्ठपूर्वं पृथगेवास्तेदा दिवंशा असपिंडद्विजनिर्दहणे मनुना विशेष उक्तः। असपिंडं १९८

द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान्। विशेषः यदि व
सतु। तथा यद्यन्नमत्ति तेषां तु दशाहेनैव शुध्यति। अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसे
दिति। एतत्सजातीयविषयं। विजातीयविषये तु गौतमेन विशेष उक्तः। अवरश्चेद्वर्णः पूर्ववर्ण
मुपस्पृशेत् पूर्वो वापरं तत्र शावोक्तमाशौचमिति। ब्रह्मपुराणे। ब्राह्मणः क्षत्रियावैश्या
द्दीनसंस्कारविशेष उक्तः। ब्राह्मणस्त्वसवर्णिनां न करोति कदाचन। कामान्मोहाद्वा
च्छौचात्तज्जातितां व्रजेत्। विप्रः क्षत्रियादिस्त्रीप्रसूतानां स्वपुत्राणामपि दाहादिकं कुर्या
तो क्षत्रियादिस्त्रीप्रसूतपुत्रास्तु पितुर्ब्राह्मणस्य दाहादिकं कुर्युरिति। तदुक्तं तत्रैव। पुत्राः कु
र्वंति विप्रस्य क्षत्रविट्शूद्रयोनयः। पुरोहितो वा मंत्री वा विद्यमानः सपिंडस्य राज्ञः सत्स्वपु
कोऽशौचं तदा दाहादिसंस्कारं कुर्यात्। तदुक्तं ब्रह्मपुराणे। मृते राज्ञि सपिंडे तु निरपेक्षपु
रोहितः। मंत्री वा तदाशौचं तु चीर्त्वा पिंडक्रियां करोति स इति। अनाथप्रेतनिर्हरणे विशेषमाह
पाराशरः। अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते।

नतेषां नाशुद्धं किंचित्पापं वाशुद्धकर्मणि। उत्लावशादन्नान्नेषां सद्यः शौचं विधीयते।
विधिर्वाप्तिन्रस्पष्टीलिखिते विशेषा मरीचिनोक्तः। स्वगोत्रे वान्यगोत्रे वा योन्नेवच्छिवा सुतः।
पिंडश्राद्धविधानं च दद्धिणा प्राप्तिनिर्वपेत्। वीजिने उततः पश्चात्तु क्षेत्रेजी वति चेत्तु कचि
त् वीजिनदद्यरादौ च म्हतत्पश्चात्तु प्रदीयते। एतद्धयुर्वादिनियोगेन विधिनादवरा उत्पन्न
विषयं। अनियोगोत्पन्नविषये तु नारदः। द्वावायेव नियुक्तायामेकेन बहुभिस्तथा। अरि
क्ताड स्नेमर्ववीजिनामेव ते सुताः दद्य। स्त्रवीजिने पिंडं मानाचेत्तु रुक्तो हि तां अत्र को ने ८
पेतायां तु पिंडदो वोढुर् वचति। बहुपुत्राम्योर्हृदे द्विकमविभक्तेन द्रव्येण सर्वेत्तुमध्या
ज्येष्ठ एव कुर्यात्तु तदाह मरीचिः। सर्वैस्तु मतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं। द्रव्येण विभक्ते
न सर्वैरेव कृतं भवेत्। विभक्तद्भाविरपि अहृद्देहिकोपक्षुक्तं। किंचिद्धनं ज्येष्ठाय निवे
द्ये कीर्तितं द्रव्यमप्यविभक्तमेव भवति। विभक्तेषु द्रव्यसमीकरणेन कस्य कर्तृत्वं षो १९९
डशश्राद्धादौ न सांवत्सरिकादौ। तथा चाह्नकं मिताक्षरायां नवश्राद्धं सपिंडत्वं श्राद्धान्य

पि षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि। अत्र विभक्तधनेष्वपि नवश्राद्धस्या
सपिंडीकरणषोडशश्राद्धान्येकेनैव कार्याणि इत्यर्थः। कैमुत्यसामर्थ्यादेव नवश्राद्धव्यतिरिक्त
श्राद्धेषु विभक्तधनानां पृथक्करणं प्राप्नोति। अत एव विभक्तधनैः सांवत्सरिकादवगिष्ट
थगेव कार्यं। स्मृत्यर्थसारेपि। श्राद्धक्रियाप्रकरण एवोक्तं। भ्रातृपुत्रेष्वेतन्मते ज्येष्ठ
एव दद्यात्तु द्रव्येण विभक्तेन भवेच्चाविभक्तो वेति। उक्तेष्वधिकारिपुत्राद्यसंनिधाने प्रथम
दिवसापक्रांताने वमपुत्रागमनेपि दशाहपर्यंतं पिंडोदकदानादिका क्रिया कार्या।
तदुक्तं ऋष्यपरिशिष्टे। असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेहनि यो दद्या
त्स दशाहं समापयेदिति। प्रथमेहनि यद्दद्याद्दशाहांतं तदेव च इति। दशाहानंतरमेकादशा
हादिकं संनिहितपुत्रादिनैव कार्यं। तदुक्तं प्रथमापक्रांतानां सपिंडीकरणं च संनिहितेना
पित्र्येष्टेनैव कार्यमित्यधिकारिण उक्ताः। संस्कारविधिस्तु शाखाभेदेन भिन्न एवान्यत्रोक्तः। स्वस्व
गृह्यसूत्रोक्त एव ग्राह्यः। रात्रिमृतस्य रात्रावेव दाहः कार्यः। वपनं प्रातः क्रियते। तदुक्तं स्मृति

संप्रदौ रात्रौ दग्ध्वा तु पिंडांतं तच्चावपनवर्जितं। वपनं नेष्यते रात्रौ श्वस्तनी पैवपनक्रियेति।
यत्तु निगमवचनं। संध्यायां च तथा रात्रौ दाहः पाथेयकर्म च नवश्राद्धं च नो कुर्यात्तत्त
त निःष्फलतां व्रजेदिति। एतत्तु दिनमृतस्यालस्यादिना रात्रौ दाहे न कार्यश्चैवं परं वप
नं च गुरुनिपातमृतदिने द्वितीये पंचमे सप्तमे वा कुर्यात्। मृतकांतमृतकनिर्हृत्यर्थं
च कुर्यात्। तदुक्तं। गंगायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ। आधानकाले सोमे च वप
नं सप्तसु स्मृतमिति। गुरोर्मंत्रोपदेष्टा विद्योपदेष्टा च तथा। द्वितीये दिने कर्तव्यं दुर
कर्म प्रयत्नतः। तृतीये पंचमे वापि सप्तमे वा प्रदानत इति। अत्र द्वितीयादिकल्पाः पूर्वे
पूर्वत्रासंभवे ज्ञेयाः। अत्राशक्तस्य मिथ्येवं परा। आपस्तंबस्तु। अनुभाविनां च परिवप
नमिति। अनुभाविनोऽल्पवयसः सपिंडाः पुत्राः पुत्रा इति पारिजाते मिताक्षरायां
तु दौरतनुजाविना मिथ्यनुजाविनः पुत्रा एवोक्ताः। अनल्पदेशाचारानुसारेण व्य
वस्थापनीयं। देवलोपि। दशाहमदनिसंप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्रजाच्या निवा २००

सांसि केशश्मश्रुनखानि चेति। अत्र दशाहमदनीति मृतकोपलक्षणं केशश्मश्रुत्या
गस्य मृतकांतकर्तव्यत्वसाद्द्वयान्मृतकांत एव कर्तव्यत्वं प्रतीयते। वाससां च मृतकांते त्या
गः स्मृत्यंतरे प्रोक्तः। अंते च वाससां त्याग इति। आशौचे सपिंडानां नियमाश्च मनुनोक्ताः। अ
क्षारालवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहं। मांसाशनं च नाश्नीयुरिति। गौतमोपि। अधःश
य्यासनो ब्रह्मचारिण इति। याज्ञवल्क्योपि। क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितावि
ति। अत्र क्रीतलब्धाशनत्वनियमादिनत्रयमेव। तथा च वसिष्ठः। यदानूत्रिदिवा अधःप्रशार
त्र्यहमनश्नंतश्चासीरन्। क्रीतोत्पन्नेन वा वर्तेरन्निति। अत्र त्र्यहमश्नंत इति क्रीतलब्धाना
नावेऽनशनं कार्यं। अन्यथा याज्ञवल्क्यवचननिरोधः स्यात्। त्र्यहात्तु परं क्रीतलब्धाशनेन
नियमः स च नैव कार्यः। स्त्री रजस्वलायाः सूतिकाया अमृतायाः शुद्धिं विना दाहादिसंस्कारं कुर्या
त्। शुद्धिप्रकारश्च मिताक्षरायामुक्तः। सूतिकायां मृतायां च कथं कुर्वंतिया ज्ञिकाः। कुंभे सलि
लमादाय पंचगव्यं तथैव च। पुण्यैरभिरिति मंत्र्यापो वाचा शुद्धिं लभेत् ततः। तेनैव स्नापयित्वा

दाहं कुर्याद्यथाविधिः॥ पंचभिः स्नापयित्वा गव्यैः प्रेतां रजस्वलां। वस्त्रांतरावृतां कृत्वा दाह
येद्विधिपूर्वकमिति। वा। ब्राह्मणवचनेन। ज्वरिताया रजस्वलायाः स्नानाशक्तौ शुद्धिप्र
कारश्चोशनसा दर्शितः। ज्वराभिभूता या नारी रजसा च परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः
स्यात्केन कर्मणा। चतुर्थेहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियं। सा सचेलावगाह्यापः स्ना
त्वा स्नात्वा पुनः स्पृशेत्तु। दश द्वादशकृत्वो वा आचामेत्तु नः पुनः। अंते च वाससां त्यागः त
तः शुद्धा भवेत्तु सा। दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यतीति। अत्र प्रासंगिकं किंचि
ल्लिख्यते। यथोक्तं मिताक्षरायां। शुद्धा भर्तुश्चतुर्थेह्नि स्नानेन स्त्री रजस्वला। दैवे कर्मणि
पित्र्ये च पंचमेहनि शुध्यतीति। पंचमेहनीति रजोनिवृत्तिकालोपलक्षणं। अत्रिणा च विशे
ष उक्तः। रजस्वला यदि स्नाता पुनरेव रजस्वला। अष्टादशदिनादर्वागशुचित्वं न विद्य
ते। एकोनविंशतेरर्वागेकाहं स्यात्तु बाधकं। विंशात्प्रभृत्यूर्ध्वं तु त्रिरात्रमशुचिर्भवे
दिति। यत्तु स्मृत्यंतरवचनं। चतुर्दशादिनादर्वागशुचित्वं न विद्यत इति। ततः स्नानदि २०१

न प्रभृति दिनगणनाभिप्रायमिति वेदितव्यं इति प्रासंगिकं परिसमाप्य प्रकृतमनुसं
धीयते। अथ पंचकमृतदाहविधिः॥ तदुक्तं गरुडपुराणे। आदौ कृत्वा धनिष्ठार्धमेतन्न
क्षत्रपंचकं। रेवत्यंतं सदा दूष्यं अदग्धं न सर्वदा। न वेतु दाहस्तत्र न कर्तव्यो विधादः सर्वजाति
ष्णो न तु तदीयतल्पेषु अदग्धं तं सर्वदा न वेत्तु। पंचकानंतरं कार्यं कर्तव्यं सर्वथान्यथा। पु
त्राणां गोत्रिकाणां तस्य संतापो ह्युपजायते। गृहे हानिर्विवेच्यैव ऋक्षेष्वेषु मृतस्य वा। अत्र
थवा ऋक्षमध्ये तु दाहस्तु विधिपूर्वकः। क्रियते मानुषाणां तु सद्यश्चाकृतिकारणा
तु विप्रैर्नियमतः कार्या। मंत्रैस्तु विधिपूर्वकं। शवस्यात्र समीपे तु देयाः पुत्तलाश्च
तः। दर्भमयाश्चत्वारः ऋक्षमंत्राभिमंत्रिताः। ततो दाहः प्रकर्तव्यः सोऽत्र पुत्तलकैः स
हास्तु सूतकांते तदा पुत्रैः कार्यं शांतिकपौष्टिकं। पंचकेषु मृतो यस्तु न गतिं लभते नरः। ति
लान् गां च दक्षिणां चैव तदुद्देशाद्घृतं ददेत्। विप्राणां दीयते दानं सर्वविघ्नविनाशनमि
ति। अत्र पत्नी न मृताशौचे अस्थिसंचयनं कृत्वा सति भ्रात्राशौचकाल विगागनाचोवि

नामंगलस्य शोभि वृत्तौ। न दाहादेव लः। दशाहादित्रिरात्रेणाहात संचयनं क्रमात्।
अंगस्पर्शनिमित्तं इति वसिष्ठोक्तं तच्च दर्शितः। अनुपनीतविषये च क्षत्रियसंचयनाभावेपि
आशौचत्रिरात्रानागास्पृश्यत्वं आशौचकालाद्विज्ञेयं स्पर्शनं त्रिरात्रतः। शूद्रविट्क्षत्रवि
प्राणां यथाशास्त्रप्रचोदितमिति। उपक्रांतसंस्कारश्चादशाहमध्ये दर्शपाते सान्तु
न विष्णुपुराणे दर्शितः। प्रवृत्ताशौचं तं चस्तु यदि दर्शः प्रपद्यते। समाप्योदकं पिंडान्
नमात्रं समाचरेत्। आशौचसमाप्तिपर्यंतमिति विशेषः। कृष्णपक्षे गोत्राशौचमंतरादर्शो
यदि स्यात्सर्वविसर्जितं। समाप्तिप्रेततंत्रस्य कुर्याद्दिव्यादिगौतमः। पैठीनसिरपि। आद्यं दे
वेशाकर्तव्या प्रेतपिंडोदकक्रिया। द्विरेदवेदन्यत्कुर्वाणः पुनः श्राद्धं समंत्रकं तदिति। ए
कप्रोक्तः। न च हीनसंज्ञद्वितीयानापि दृश्यमानिति। एवं चेत् द्वितीयौ एवं सामान्यतः प्रा
प्तो मातापित्रादिविषये विशेषो गालवेनोक्तः। पित्रोराशौचमध्ये तु यदि दर्शः समा
पतेत्। तावत्तेनैव तंत्रं पर्यवसाय दातुं परमिति। यत्तु गौतमवचनं अंतर्दर्शादंतदर्श २०२

अंतंत्रं सर्वं समापयेत्। पित्रोस्तु यावदाशौचं दद्यात्पिंडं जलांजलिरिति। एतत्प्रदातूर्ध्व
वं दर्शापातविषयं। परिहृता। तत्तु गौतमवचनं। पितृविषयत्वेनान्यदातूपरमिति गा
लववचनस्यार्थ उक्तः। पित्र्याशौचेपि दर्शापाते समाप्तिरुत्तरत्र स्यादुचिता। किंतु ना
न्याशौचमध्य इति पितृव्यतिरिक्तविषये उत्तरतंत्रस्यावश्यकसमाप्तिदर्शनार्थं नतु
नः पितृविषयेपि नियमार्थमिति। तत्र गालववचनं। यदि प्रदर्शनार्थमेव स्यान्नियमार्थं
तदात्प्रदातूपरमिति विशेषनियमं नानिश्चीयते यतोऽत्र तत्र पितृविषये प्रदातूर्ध्वं दर्शा
पातपिंडादिसमाप्तिः। अन्यदातूर्ध्वं दर्शापाते यावदाशौचपिंडादि कार्यमिति। गालव
गौतमवचनयोश्चैवं व्यवस्थयैवाविरोधः। युक्तश्चायमर्थः। यद्यपि तत्रैवानुवृत्तपितृवाविषयं। नियामक
मिति गालववचनस्य नियामकत्वमंगीक्रियते तथाप्यस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचार
न्न चिंतयेत् शिष्टाचारात्। याज्ञवल्क्यवचनस्याकस्तु तेष्वकृत्वा शिष्टाचारप्रामाण्य
देवपत्र देशे प्रदातूपरं दर्शपाते पितृविषयेपि उत्तरतंत्रसमाप्तिस्त्वविषयं गाल

वचनं। यस्मिन्देशेत्र दातपरमपि दशाप्रातेसंपूर्णाशौचपर्यंतपिंडांजलिदानादि
प्रवृत्तिः। तद्विषयं गौतमवचनमिति। देशाचारतेदाद्यवस्थाकल्पनीयेति सर्वमनव
द्यं। पूर्वदेशकालादिवसनकाष्टवद्दग्धपूर्वधनानां संस्कारप्रारंभे दिनादिनियमः
स्मृत्यर्थसारे प्रोक्तः। यथा। आशौचदिनमध्ये तु पुनः संस्कारे तु दृष्टबाधनया द्वि
नं संस्वं शोध्यं। कालं नातिक्रियमाणा प्रेतकार्ये तु दिनं शोध्यमेव। संवत्सरादूर्ध्वं प्रे
तकार्ये त्वयनकालाश्रयानुं तत्रापि शुक्लपक्षश्रयानुं तत्रापि नंदात्रयोदशीत्रि
दिनं च वर्जयेत्। शुक्रशनैश्चरवारौ वर्ज्यौ न क्षत्रे तु भरणी कृत्तिका श्लेषा धनिष्ठादि
पंचकं त्रिपुष्कराणि चातिदुष्टानि दिनानि। सर्वथा वर्ज्यानि। व्यतीपातपरिघवैधृतयोगेषु।
विष्टिकरणेषु। चतुर्थीषष्ठीमष्टमीद्वादशीनां सहितेचंद्रे चातिदोषः। रोहिणी पुनर्वसु पूर्वा
त्तरा चित्रा विशाखा चानुराधा पूर्वाषाढा उत्तराषाढा त्रिपुष्कराणि च दुष्टानि
संज्ञवे वर्ज्यानि। शिष्टान्युत्कृष्टानि। यात्राणि। सर्वथा दिनशुद्धय संभवे तानि दुष्टवार २०३

नक्षत्रादिग्राह्यमिति। इत्यधिकारिस्वरूपं निरूप्येदानीमुपनीतादीनां वर्णिनां ले
देनाशौचकालभेदो निरूप्यते। ब्राह्मणविषये तावदाह मनुः। दशाहं शावमाशौचं
सपिंडेषु विधीयते। जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति। मदायुराश्व
लायनेन तद्विषय एव विशेष उक्तः। द्वादशरात्रं वा मदायुरुक्तं दानाध्ययने विवर्ज
यन्निति। मदायुरुष्टाहं पंचतानवोक्तं। पुत्रानुत्पाद्य वेदार्थं यादयिवाहः त्रिचयोदश
तिसमदायुरुमिति। क्षेत्रादिविषये। याज्ञवल्क्यः। क्षत्रस्य द्वादशाहानि विशः पं
चदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिन इति। पाकयज्ञादिशुश्रूषादि
रतस्य मासार्धं पिंडमाशौचं। इत्थमाशौचानंतरं कृतक्रिया ब्राह्मणाद्यः। उदकादि
स्पृष्ट्वा शुध्यति। तदाह मनुः। विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधे। वैश्यः प्रतो
दं रश्मीन्वा यष्टिं शूद्रः कृतक्रिया इति। कृतक्रियः कृतस्नान इत्यर्थः। इदं च सर्वं प्रसु
क्तमाशौचं सर्वमियं यदि सूनाधिककालविध्ययकवाक्यानि कविरूवेषु। ततश्चान्या

पद्मनाभदीक्षितेन तु एवद्दूषणमेव दूषितं येन देशाचारतो वा व्यवस्थानीयानीति। दृ
यं दशाहादिसंख्योदयात् उत्तरं कालमहोरात्रादवक्ति जाते आशौचे तद्दिनप्रवृ
त्त्येकरात्रिं तत्र धर्मविन्नेत्यथ प्रथमतो गृह्येन यद्याशौचं तदा पूर्वदिनप्रवृत्तीव सूर्योदया
त् पूर्वदिनप्रवृत्तीच्यपरां तदाह कश्यपः। उदिते तु यदा सूर्ये नारीणां दृश्यते रजः। ज
ननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी॥ अर्धरात्रावधिः कालः सूतके तु विधीयते। सू
तकं त्वाशौचापलक्षणं तथा। रात्रिं कुर्यात्त्रिभागं तु द्वौ भागौ पूर्व एव तु। उत्तरां
शः प्रभातेन युज्यते ऋतौ सूतके इति। तथा। रात्रावेव समुत्पन्ने मृते रजसि सूतके। पू
र्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति। अत्र देशाचारतो व्यवस्था कल्पनीया। आ
शौचस्य दशप्रकारा दक्षेणोक्ताः। सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा। षड्द
शद्वादशाहाश्च पक्षो मासस्तथैव च। मरणांतं तथा चान्यद्दश पक्षास्तु सूतक
इति। अत्र दशाहादिपक्षा ब्राह्मणादिषु तथैव विषया उक्ताः। मरणांतिकं विष २०५

यस्तु दक्षेणोक्तः॥ अस्नात्वा चाप्यहुत्वा चाप्यदत्वा चाश्नन्नथ द्विजः। एवंविधस्य विप्रस्य
सर्वदा सूतकं भवेत्। व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा। क्रियाहीनस्य मूर्खस्य स्त्री
जितस्य विशेषतः। व्यसनासक्तचित्तस्य पराधीनस्य सर्वदा। श्राद्धत्यागविहीनस्य भस्मां
तं सूतकं भवेदिति। अत्र सद्यःशौचं ऋत्विगादीनां याज्ञवल्क्येनोक्तं। ऋत्विजां दीक्षितानां च
यज्ञियं कर्म कुर्वतां। सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा। दाने विवाहे यज्ञे च संग्रा
मे राष्ट्रविप्लवे। आपद्यपि च कष्टायां सद्यःशौचं विधीयत इति। ऋत्विजो वरणसंस्कृताः क
र्हविशेषाः। दीक्षया संस्कृता दीक्षिताः। यज्ञियं कर्म कुर्वतामिति विधानाद्यज्ञकर्मण्ये
व सद्यःशुद्धिः। सत्रिग्रहणेन सततदानाभ्यासात्तु ल्पतया अन्नसत्राद्यालक्ष्यते। मुख्या
नां तु सत्राणां दीक्षितग्रहणेनैव सिद्धेः। व्रतिग्रहणेन कृच्छ्रचान्द्रायणादिप्रवृत्ताः। स्नात
कव्रतप्रायश्चित्तव्रताद्याश्चर्यन्ते। विवाहादावारब्धे एवं राष्ट्रविप्लवे स्फोटकादिनिरूप
सर्वे राष्ट्रभयादौ। संग्रामे संग्रामोद्यतस्य राज्ञः सन्नाहविधौ। प्रास्थानिकशांतिकहो

मादौ च। कष्टायामापदि व्याध्यादिनिजपुत्रकृच्छ्रविष्टायां दुरितग्रामनाथे कमीलि
तथा। संकुचितवृत्तेश्च कृत्स्नं परिश्रांतमातापित्रादिबहुकुटुंबतत्पूरणोपयोगिनि प्रति
ग्रहे सद्यः शुद्धिः। इयं च सद्यः शुद्धिः शावं विना तत्कर्मशामो न भवति। अथ श्रान्तिकस्या
तद्विषया। यस्त्वेकाहपर्याप्तसंचितधनः तास्यैकाहः। यस्तु दोषप्रयोगयोग्यस्य सवन
स्य त्र्यहः। यश्चतुरहपर्याप्तधनः कुंभीधान्यधनः तस्य चतुरहः। कुसूलधान्यस्य दशा
हइति। एवं यस्य यावत्कालमन्नपानावस्थस्य तेनावकालमाशौचं नापदुपाधिकं वा
दाशौचस्येति। मिताक्षरायां। स्मृत्यंतरेऽपि। नित्यमन्नप्रदस्यापि कृच्छ्रचांद्रायणा
दिषु। निवृत्ते कृच्छ्रे दोषो मा भूदादौ ब्राह्मणादिकं भोजनेऽपि हीतनियमस्यापि तस्य नान्य
स्य कस्यचिदिति सद्यः शुद्धिरिति वाक्यशेषः। तथा च। निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्ध
कर्मणि। निमंत्रणाद्धि विप्रस्य स्वाध्यायाद्विरतस्य च। देहे पितृषु तिष्ठत्सु नाशौचं
विद्यते क्वचित्। प्रायश्चित्तप्रवृत्तानां दातृब्रह्मविदां तथेति। इदमाशौचमादिता। २०५

न्दर्दाहदि नमारभ्यानाहिताग्नेर्मरणदिनमारभ्य वेदितव्यं। तदाह पैठीनसिः। अनग्निमत
उत्क्रांतेराशौचादिद्विजातिषु दाहादग्निमतो विद्याद्विदेशस्थे मृते तथेति। अनुलोमक्षत्रा
दिविजातीयसपिंडाशौचे विशेषो बौधायनेनोक्तः। क्षत्रियविट्शूद्रजातीया यस्य विप्र
स्य बांधवाः। तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यत इति। यत्तु हारीतवचनं दशाहाच्छुध्ये
ते विप्रो जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु। इति। एतदाप
द्विषयं। विष्णुरपि। क्षत्रियस्य विप्रशूद्रेषु सपिंडेषु षट्त्ररात्रत्रिरात्राभ्यां। वैश्यशूद्र
सपिंडषड्रात्रेण शुद्धिः। हीनवर्णानामुत्कृष्टेषु सपिंडेषु जातेषु मृतेषु तावदाशौचं
व्यपगमे शुद्धिरिति। आपस्तंबेन विशेष उक्तः। क्षत्रविट्शूद्रजातीनां यदि स्यान्मृतसू
तके। तेषां तु पित्र्यकं शौचं वक्लिकानां तु मातृकमातृकमिति। द्विजानां तु सापिंड्यं त्रिपुरु
षमेवानुक्रमीय एकजाता दशदवः पृथक्क्षेत्राः पृथक्कुजनाः। एकपिंडाः पृथक्शौचाः
पिंडश्चावर्तते त्रिष्विति। पृथक्कुजना भिन्नजातीयाः प्रतिलोमानां तु सूतकं नाप्यव

प्रतिलोमाधर्महीनाइति॥ स्मृतावुक्तत्वात्॥ संग्रामे निमुखप्रहारैर्हतानां गोब्राह्मणार्थं
च हतानां सद्यःशौचं॥ तथा च मनुः॥ उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च॥ सद्यः संतिष्ठते
यज्ञस्तथाशौचमिति स्थितिरिति॥ यज्ञपिंडदानादिरूपः संतिष्ठते समाप्तो भवतीत्यर्थः॥ म
नुरपि॥ डिंबाहवहतानां च विद्युता पार्थिवेन च॥ गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिव
इति॥ स्वकार्यपरिपालनाधिकृतस्य मनुराह॥ परिपालन एवाशौचनिवृत्तिः॥ कृतमुदी
रयान्यस्याशौचनिवृत्तिरिति॥ आशंक्यतेन दोषः॥ सोमाग्न्यर्कानिलेंद्राणां वित्ताप्पत्यो
र्यमस्य च॥ अष्टानां लोकपालानां वपुर्धारयते नृपः॥ इति॥ स्मृत्यर्थसारेपि॥ स्त्रीविप्रा
र्थं गवार्थं च संग्रामे विद्युता हतानां सपिंडानां नाशौचं यत्तु वचनं ब्राह्मणार्थे विपन्ना
नां योषितां गोग्रहेपि वा॥ आहवेपि हतानां च एकरात्रमशौचकमिति निर्णीतं तत्क्षतहते
न कालांतरमृतविषयं॥ तदुक्तं स्मृत्यर्थसारे॥ युद्धहतेन कालांतरमरणे ग्रामस्थानके
ल पतितो यम्रुत्त्वेकाहमिति॥ गोब्राह्मणादिहतानां विधिनात्मघातिनां च यः सपिंडा २०६

षां सद्यःशुद्धिः॥ तदाह व्याघ्रः॥ कक्षः॥ हतानां नृपविप्रैश्च दंडं चात्मघातिनामिति॥
गोतमोऽपि॥ गोब्राह्मणहतानामन्वक्षं राजक्रोधाद्युद्धे च इति॥ समानोदकानां त्रिरात्रमा
शौचं सपिंडेषु विधीयते॥ जनने एवमेव स्यान्निर्गुणं
चार्वीत तदाह मनुः॥ दशाहं शावमाशौचं सपिंडेषु विधीयते॥ जनने एवमेव स्यान्निर्गुणां
शुद्धिमिच्छतामिति॥ जन्मन्येकोदकानां च त्रिराच्छुद्धिरिष्यत इति॥ जननीति मरणास्या
प्युपलक्षणं॥ क्वचिदाशौचविषये जन्ममरणे त्वेतत्कालेन दशाहादात्॥ एकादकाः
सासाप्यकपलक्षणं॥ क्वचिदाशौचविषये जन्मनाम्नोर्ज्ञाते वृत्पर्यंताः॥ तदाह मनुः॥ स
समानोदकाः॥ तत्र सप्तमपुरुषात् ऊर्ध्वं यावज्जन्मनाम्नोर्ज्ञानं वर्तते तथा च स्मृत्य
पिंडता तु पुरुषे सप्तमे विनिवर्तते॥ समानोदकभावस्तु जन्मनाम्नोरवेदने॥ तथा च स्मृत्य
र्थसारे ज्ञातायो तेभृताशौचसोदकानां त्रिरात्रकमिति॥ असगोत्रामातामहाकार्यमातु
लादिविषये तु विशेषमाह बृहस्पतिः॥ त्र्यहं मातामहाचार्यश्रोत्रियेषु वि
लादिविषये तु विशेषोच्यते॥ तत्र बृहस्पतिः॥ त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवे
त्॥ अत्र श्रोत्रियस्तु संनिहितो गुणवान् वावहिताः॥ तदुक्तं श्रोत्रिये उपसंपन्ने त्रिरात्र
मशुचिर्भवेत्॥ मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बांधवेषु चेति॥ उपसंपन्नो गुणयुक्तः॥

असंन्निहितेत्वेकाहमेवतदाहशंखायनः। एकाहंब्रह्मचारिणिसमानग्रामिणिचश्रोत्रि
यइति। एकाचार्योपनीतःसब्रह्मचारी उपनीययोविद्यांप्रयच्छतिसआचार्यः। तस्यपु
त्रादिविषयेमनुनाविशेषउक्तः। त्रिरात्रमहोरात्रंचआचार्येचोपसंस्थिते। तस्यपुत्रेचप
त्न्यांवादिवारात्रमितिस्थितिरिति। याज्ञवल्क्योऽपि। गुर्वन्तेवास्यनूचानमातुलश्रोत्रिये
षुच। असंनिधने। अहरियन्तवर्त्तते। तथाचास्मृत्यर्थसारे। याऽपंचविंशोदिनसदाध्या
यिसहोपनीतानामात्मबंधुपितृबंधुमातृबंधुमातुलशिष्योपाध्यायगुरुतदाचार्यपुत्रमित्र
भागिनेयश्वश्रूभगिनीमातामहदेषुमातृष्वसृपितृष्वसृमातुलानीगुर्वाचार्यपत्नीषुच
मरणेएकग्रामेपक्षिण्याशौचं। अथएवश्रुतेएकग्रामएकाहः। ग्रामांतरेस्नानमात्रमि
ति। आत्मबंधुप्रदर्शनेनोक्तः। यथा। आत्मपितृष्वसुःपुत्राःआत्ममातुःस्वसुःसुताः। आ
त्ममातुलपुत्राश्चविज्ञेयाआत्मबांधवाः। एवंपितुर्मातुरपि। पितृष्वस्रादिपुत्राःपितृ
बांधवामातृबांधवाश्चविज्ञेयाः। हरदत्तेनापिसंस्थितपक्षिणींरात्रिंदौहित्रेभगिनीसु २०९

नीसंस्थितेत्रिरात्रंस्यादितिधर्मोव्यवस्थितः। असंस्थितेपक्षिणीमेवपक्षिणीमितिरात्रि
विशेषणं। तथापित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत्रिरात्रेणशुद्धिःस्यादित्याहभग
वान्यमइति। ऊढानांतुपरिणीतानां। तथाचाश्वशुरयोर्भगिन्यांचमातुलान्यांचमातुले। पित्रोः
स्वसरितद्वच्चपक्षिणींक्षपयन्तिशर्वरीमिति। श्वशुरयोःपित्रोरितिचैकशेषः। तथामातुलेश्वशु
रमित्रेगुरौगुर्वंगनासुच। आशौचंपक्षिणींरात्रिंमृतामातामहीयदीति। यत्तुहरदत्तवसि
ष्ठवचनं। भगिन्यांसंस्थितायांचभ्रातर्यपिचसंस्थिते। मित्रेग्रामांतरेप्रेतेदौहित्रेभगिनी
सुतेबालकेतत्सुतेचैवसद्यःस्नानेनशुध्यतीति। एतद्ग्रामांतरमृतानुपनीतविषयं। तत्रस्मृत्य
र्थसारेउक्तं। अतएवचगूढायाःपुत्राःप्रसवेमातापित्रादिकामकामाशौचंतत्र
स्थायामरणेतेषांत्रिरात्रंऊढांतरमरणेपित्रोरेकरात्रंग्रामांतरमरणेपक्षिणीतिविज्ञ
रपिसंस्कृतासुस्त्रीषुनाशौचंपितृपक्षेतत्प्रसवमरणेचपितृगृहेयदिस्यात्तदातदेकरात्रंत्रि
रात्रंचेति। हरदत्तोक्तासपिंडविषयेहरदत्तस्यासपिंडानांचतत्रैवविशेषउक्तः। असपि

ऊर्ध्वं मृते ऊर्ध्वं पते त्रिरात्रं सपिंडानामेकादशमिति। यत्तु विष्णुवचनं असपिंडे वेश्मनि मृते
एकरात्रमिति। तत् ऊर्ध्वं पत्नीव्यतिरिक्तं तत्पत्न्यादिविषयमिति। वृद्धविष्णुना विशेष उक्तः। आ
ममध्यगतायावच्च ब्रह्मपतिकस्य चित्तौ ग्रामस्य तावदाशौचं निबमिस्य चिनामित्यादिति।
अनौरसच्चैवयदुत्रादिविषयो। याज्ञवल्क्येन विशेष उक्तः। अहोरात्रमित्यनुवृत्तौ। अनौ
रसेषु पुत्रेषु भार्यास्वन्यगतासु चेति। अत्यान्ताक्षि तित्राशौचमिति। एतत्संनिधानवि
षयां संनिधौ तु विष्णुः। अनौरसेषु पुत्रेषु जातेषु त्वप्रसूतेषु चापरपूर्वासु नायासु प्रज्ञाता
... परपूर्वास्विति। परः पूर्वाः पत्नियांसीताः पर
सु मृतासु चेति। अत्र त्रिरात्रमित्यनुवर्तते। परपूर्वास्विति। परः पूर्वाः पत्नियांसां ताः पर
पूर्वा ज्ञियंते। इदमाशौचं पुत्रसंबंधेन यस्या इत्र सम्यवो नार्यासंबंधेन तत्पाखौ सपिंडा
नां तु संघः शुद्धिः। न दाहेनाघातिः। अन्याश्रितेषु दारेषु परपत्नीसुतेषु च गोत्रिणः स्ना
नाच्छुद्ध्यस्त्रिरात्रेणैव तनिति। एतत्संनिधौ। असंनिधौ याज्ञवल्क्यः। कण्वादोरात्रं २०८
मरीचिना तु विशेष उक्तः। सूतके मृतके चैव त्रिरात्रं परपूर्वयोः। एकाहस्तु सपिंडानां त्रिरा

त्रं यत्र वापि पितुरिति। राज्ञि दिने मृते तद्देशवासिनाम सममयपर्यंतमाशौचं। रात्रिमृते सूर्यो
दयपर्यंतं तत्सहमनुः। प्रातराज्ञनिसा ज्योतिर्यस्य स्यादिविषये स्थितः। राज्ञः प्रजापालननिमि
त्तशांतिकपौष्टिकादिकर्मदासदासीशिल्पादीनां स्वामिष्टहकर्मादिकर्मणि सद्यः शुद्धिः।
नित्यनैमित्तिकाकर्म स्वस्ववर्णाश्रमक एवात्र प्रवेताः। कारवः शिल्पिनो वैद्या दासीदासा
स्तथैव च। राजानो राजभृत्याश्च सद्यः शौचाः प्रकीर्तिताः। कारवो रूपकाराद्याः। शिल्पिनाश्चित्र
कारखेलनिर्णेजकाद्याः। दासीदासविषये अंगिरसा विशेष उक्तः। दासीदासश्च सर्वो विय
स्य वर्णस्य योनिवेत्। तद्वर्णस्य भवेच्छौचं दास्यां मासस्य सूतकं। तद्वर्णस्यपिति स्वाम्याशौचेन
स्पर्शत्वात्। दास्यां मास इति। प्रसूतायादास्याः कर्माधिकारस्तु मासावधारवेच्यर्थः। विष्णु
रपि। न राज्ञां राजकर्मणि न व्रतिनां व्रते न च सत्रिणां सत्रे न कारूणां कारुकर्मणि। आज्ञाता
पापिकृत्यकर्मकराः शूद्राः दासीदासस्तथैव च। स्नाने शरीरसंस्कारगृहकर्मण्यदूषिताः।
तथा सद्यः शौचं दासानं दासस्य सदा शुद्धिः। चिकित्सकोयत्‌ कुरुते तदन्यो न नशक्यते। त

स्मार्त्तिकिंसकस्पर्शे शुद्धो भवति॥ अथ देशांतरजनने मरणे चाशौचमुच्यते॥ तत्र दशरात्रम
ध्ये ज्ञातिमरणवार्त्ताश्रवणे सद्य एवाशौचं शेषाशौचकालाच्छुद्धिः॥ तदाह मनुः॥ विगतं तु विदेशस्थं
शृणुयाद्यो ह्यनिर्दशं॥ यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्॥ विगतं मृतं॥ इदं जननस्याप्यु
पलक्षणं दशरात्रस्यैवाशौचकालस्योपलक्षणं॥ अत एव श्रवणानंतरमेवाशौचं दशरा
त्रादिसंख्यास्याशौचोत्पत्तिर्दृष्टा वा ज्ञातीनां ज्ञातिमरणं श्रुत्वा संवासशुद्धो भवतीत्ये
तदपि सपिंडानां मरणवार्त्ताश्रवणानंतरं माघस्पर्शकं सचेलस्नानविधिपरं न चाशौचाभा
वप्रतिपादनपरं॥ मासत्रयेण षण्मासपर्यंतादिषु त्रिरात्राद्याशौचस्यैव वक्ष्यमाणत्वात्॥ प्र
सवे वृत्ते वाशौचं सपिंडानां नास्त्येवातदाह देवलः॥ नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिने
ष्वपि॥ आशौचकालानंतरं मासत्रयपर्यंतं मृतवार्त्ताश्रवणकाले त्रिरात्रं॥ आशौचं तदू
र्ध्वं षण्मासपर्यंतं पक्षिणी॥ ततो नवमासात् पूर्वं एकाहः॥ ततः संवत्सरपर्यंतं स्नानोदक
दानाभ्यामेव शुद्धिः॥ संवत्सरादूर्ध्वं स्नानमात्रेण सपिंडानां शुद्धिः॥ तदाह वृद्धवसिष्ठः॥ २०९

मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा॥ अहस्तु नवमादर्वाक् ऊर्ध्वं स्नानेन शुध्यति॥ अ
त्र स्नानसहचरितमुदकदानं मध्यादिप्यति॥ मनुना संवत्सरानंतरमपि स्नानमात्रस्यो
क्तत्वात्॥ यथा संवत्सरे व्यतीते स्पृष्ट्वैवापो विशुध्यतीति॥ स्पृष्ट्वा स्नात्वेत्यर्थः॥ इदमतीताशौचं मा
तापितृव्यतिरिक्तसपिंडमरणविषयं तद्विषये तु पैठीनसिः॥ पितरौ चेन्मृतौ स्यातां दूरस्थो
पि हि पुत्रकः॥ श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्॥ इति॥ दशाहमिति दशाहोप्युपल
क्षणं॥ सूतकान्नैव दिवसे नाशौचं प्रेतकं॥ यस्यापि कर्त्तृत्वमिति स्मृत्यंतरे तथा चोक्तं मिताक्षरा
यां महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना॥ अतीतेपि कर्त्तव्यं प्रेतकार्यं यथाविधि॥ इति
सापत्नमातृविषये तु दक्षेणोक्तं॥ पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः॥ संवत्सरे व्य
तीते तु त्रिरात्रमशुचिर्भवेत्॥ इति॥ अथ सार विशेष उक्तः॥ मातापितृमरणं दशाहादूर्ध्वं
दूरदेशेपि संवत्सरादूर्ध्वं पुत्रः॥ आमरणश्रवणदिनमारभ्य दशाहादिकं यथावर्णं पूर्व
माशौचं कुर्यात्॥ उदकपिंडदानं चा महागुरुमरणे तु दशाहव्यतीते तु आर्द्रवस्त्रोपवासिना तथे

वाशौचं चौधादिकं कार्यं स्त्रीपुरुषयोः परस्परं चैवं । सवर्णेष्वसमसपत्नीभ्रात्रेवं । दशांतरका
लांतरस्वहीनवयस्यायाः मातुः सापत्न्यास्त्र्यहात्मरणे पुत्रस्य त्रिरात्रमिति । अतश्च दत्तकवच
नमपि हीनवयस्कपुत्रमातृविषय एव योज्यं । दशांतरमृतवती । ताशौचं ज्ञातीनां नास्ति
तदुक्तं स्मृत्यर्थसारे । दशांतरमृतं श्रुत्वा क्लीबवैखानसयतीन् । मृतस्नानेन शुध्यंति
गर्भस्रावे च गोत्रिण इति । तत्पत्न्यादि पुंसनिहितमपि सद्यः शुद्धिः । दशांतरस्वरूपं
द्वमत्र उनोक्तं । मदनपारिजाते वृहस्पतिः । वाचो यत्र विनिर्द्दिष्टं तत्दशांतरमु २
च्यत इति । वृहस्पतिरपि । देशांतरं तत्प्राहुः षष्टियोजनमायतं । चत्वारिंशद्वदंत्यन्ये त्रिंशा
दन्ये तथैव च । एतत्पुत्रे दशादृशांतर...व्यवस्थाकल्पनीयाः । योजनप्रमाणं तु स्मृत्यर्थ
सारप्रोक्तं । तिर्यग्यवोदराण्यष्टौ ऊर्ध्वा वा व्रीहयस्त्रयः । प्रमाणमंगुलस्योक्तं वितस्तिर्द्वाद
शांगुला । वितस्तिद्विगुणा रत्निः स्मृतः किष्कुः स्मृता धनुः । धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशं तु
योजनमिति । इदमतिक्रांताशौचं ब्राह्मणादीनामुपनयनादूर्ध्वं तदुक्तं २१७

स्मृत्यर्थसारे । अतीताशौचं त्र्यहाशौचाधिकं तत्र ब्राह्मणादीनां वर्णानामुपनयनादूर्ध्वं
स्त्रीशूद्राणां विवाहादूर्ध्वं भवतीति । इदं सर्वेषामपि वर्णानां साधारणं । तदाह व्याघ्रपदः
ऊनेवयसि सर्वेषामतिक्रांते तथैव च । उपनीते तद्विषमं तस्मिन्नेवाह्निकालमिति । अस्या
र्थः । वयोवस्थानन्तमाशौचं अतिक्रांते तच्छौचं तस्मिन्नेवोपनीत एव भवतीति नानुपनीतविषयश्
च्ययः । अतिक्रांताशौचं रहिणा वा न द्रव्यस्य । तदाहांगिराः । अतिक्रांते दशाहे तु पश्चाज्ज्ञाना
ति वृद्धौ । त्रिरात्रं सूतकं तस्य न द्रव्यस्य कर्हिचिदिति । दशांतरमृतस्याहिताग्नेः प्रतिकृतिं कृत्वा वास्था
नावपर्णशरेण पिष्टकेन वा प्रतिकृतिं यथाचारं तद्वा दाहः कार्यः । अनाहिताग्नेः प्रतिकृति
दाहे त्रिरात्रमाशौचं । आहिताग्नेर्यथावत्संस्कारः सशौचमस्थ्यभावे तदुक्तं स्मृत्यंतरे । सुरापिष्टे
जलसंमिश्रे व्यस्य यथाग्निनीअसोस्थगायि लोकाय स्वाहेत्यर्ककाष्ठबांधः । एवं पर्णशरं
दद्यात् त्रिरात्रमशुचिर्भवेदिति । वसिष्ठोपि । आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं तद्वात्रा
बवच्छौचमिति । अत्रानाहिताग्नेस्त्रिरात्रमिति पूर्ववदिह । ताशौचपत्नीविषयं । अत्र दत्ताशौ

सविषये तु दशाहादि संपूर्णमाशौचं॥ तदुक्तं स्मृत्यर्थसारे॥ जननी तत्र मृतके उपर्युमिष्टदीक्षा
शौचं पुत्रस्य पत्न्यास्त्रिरात्रं पत्नी पुनःसंस्कार पक्षेप्येवमिति॥ पुनः संस्कारः सपिंड पुत्रेणै
वोक्तं॥ अस्य दीक्षाशौचानां सपिंडानां पुनराशौचं नास्ति॥ प्रोषित जीवद्वाहाग्निकस्य नि
विशेषाद् दूरुस्थानि तोक्तः॥ यस्य न श्रूयते वार्ता यावद् द्वादशवत्सरं॥ कुशपुत्रकदाहेन त
स्य स्यादवधारणमिति॥ एतदपि व्यतिरिक्त विषयमिति गम्यते॥ पितृविषये आहिताग्नेः
न विशेषो निधनात्॥ पितरि प्रोषिते यस्य न वार्ता नैव चागतिः॥ ऊर्ध्वं पंचदशाद्वर्षा
त् कृत्वा तत्प्रतिरूपकं॥ कुर्यात्तस्य च संस्कारं यथोक्तविधिना तत इति॥ अत्रैव स्मृ
त्यर्थसारविशेष उक्तः॥ दूरदेशं तु गते जीवद्वार्ता पुनः पुनः॥ पूर्वालोच्य वडी वं द्वार्ता
यामश्रूयमाणायां पूर्ववयस्के एकविंशत्यब्दादूर्ध्वं मध्यमवयस्के पंचदशाब्दादूर्ध्वं मप
रवयस्के द्वादशाब्दादूर्ध्वं चांद्रायणत्रयं त्रिंशत्कृच्छ्राणि वाऽनुचाप्य पलाशदाहं कृत्वा कुशैर्वा
प्रतिकृतिं कृत्वा दशाहाशौचोदकपिंडश्राद्धादिकं कार्यमिति॥ आद्यादिके तु तत्र यदि जीव २११

न्समागच्छेत्तदा तं घृतकुंडे निधाय जातकर्मादि संस्कारान् कुर्यात्॥ तदाह वृद्धमनुः यदि जी
वन् यदि समागच्छेत् घृतकुंडे निधाय तं॥ तस्य पूर्ववदाचार्यो जातकर्मादि कारयेत्॥ द्वादशा
हं व्रतचर्या त्रिरात्रमथवास्य तु॥ स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः॥ अग्नीनाधाय वि
धिवद् व्रात्यस्तोमेन वा यजेत्॥ अथैन्द्राग्नेन पशुना गिरिं गत्वाथ तत्र तु॥ इष्टिमायुष्मतीं कुर्यादी
प्सितांश्च क्रतूंस्ततः इति॥ शवानुगमने तन्निमित्ताशौचं याज्ञवल्क्येनोक्तं॥ ब्राह्मणेनानुग
न्तव्यो न शूद्रो न द्विजः क्वचित्॥ अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिरिति॥ ब्राह्मणेना
६ सपिंडेन द्विजो विप्रादिः शूद्रो वा मृतो नानुगंतव्य इत्यर्थः॥ अत्र तोऽज्ञानं पावित्र्यार्थं न स्पर्थार्थं इ
यं शुद्धिः समानोदकजातीयानुगमनविषया॥ तथा च मनुः॥ अनुगम्येच्छया प्रेतं ज्ञातिम
ज्ञातिमेव वा॥ स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यतीति॥ अत्र ज्ञातयो मातृसपिंडाः॥ पितृस
पिंडानुगमनस्य दीनवर्णविषयत्वं तु स्मृत्यर्थसारे विशेष उक्तः॥ ब्राह्मणस्य क्षत्रियानु
गमने एकाहं चैमाशौचं॥ वैश्यस्यानुगमने पक्षिणी॥ शूद्रानुगमने त्रिरात्रमाशौचं स्ववा

समुद्रगायां नद्यां स्नात्वा प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। क्षत्रियस्य वैश्या।
नुगमने त्वेकाहं। शूद्रानुगमने पक्षिणी॥ वैश्यस्य शूद्रानुगमने त्वेकाहं। रोदने त्वेवमिति।
यद्यनुवसिष्टमिति। मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे अहोरात्रमाशौचं शा
बन्धुगमने चैवमिति। इदमपि ब्राह्मणस्य क्षत्रियाद्यनुगमनविषयं। शूद्रानुगमने त्वाय
रात्राः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्य
ति। त्रिरात्रे तु ततः सर्व्वा नदीं गत्वा समुद्रगां प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यती
ति। इदमनुनादिसंसर्गासंसर्गिण एव न तु पुत्रादीनां तदाहांगिराः। आशौचं यस्य
संसर्गादापयेद्गृहमेधिनः। क्रियास्तस्य न लुप्यन्ते गृह्याणां च न तद्भवेदिति। असपिं
डं प्रेतस्यालंकरणोद्वहनेन प्रायश्चित्तमुक्तं। अबुद्धिपूर्वादौ सपिंडस्य प्रेतालंकरणे कृते तो
अज्ञानादुपवासः स्याद्दशको स्नानमिष्यत इति। ज्ञानाच्चेत्तद्द्विगुणं। पारस्करः। अ २१२
तस्य बांधवैः सार्द्धं कृत्वा चोपरि वेदनं। वर्जयित्वा अहोरात्रं दानं श्राद्धादिकर्म च। अथाशौ

च संनिपाते विशेष उच्यते। तत्र जननाशौचमध्ये शावाशौचं शावाशौचमध्ये वा जनना
शौचे तस्मिन् समे ततो न्यूने वा सति हि वृद्धिशेषेणैवांतरापतितसूतकस्य निवृत्तिः। तदाह
याज्ञवल्क्यः। अंतरा जन्ममरणे शेषाहोभिर्विशुध्यतीति। शावाशौचमध्ये तस्मिन्मृततान्य
नवाशौचांतरसति पूर्वशेषेणैव शुद्धिः। जननाशौचमध्ये शावाशौचे सति शावाशौचं स
पूर्णं कार्यं। न जननशेषेण शुद्धिः। तदुक्तं शावेन शुध्यते सूतिर्न सूतिः शावशोधनी। अ
गिरसाप्युक्तं। सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकं। तत्राधिकृत्य मृतकं शौचं कुर्या
न्न सूतकं। स्वल्पाशौचमध्ये अधिके सूतके मृतके वा सति न पूर्वशेषेण शुद्धिः। किंतु प्र
कालेनैव। तदाहोशनाः। स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि। न पूर्वेणैव शु
द्धिः स्यात्स्वकालेनैव शुध्यतीति। अत्राशौचपदेन सूतकं मृतकं चोच्यते। अत्र स्वल्पत्वं दी
र्घत्वं च कालकृतमेवाशौचस्य ज्ञेयं। मातापित्राशौचसन्निपाते त्वंगिरसा विशेष उक्तः।
मातर्यग्रे प्रमीतायां अशुद्धौ म्रियते पिता। मातुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणी।

मिति। मात्राशौचस्य मध्ये पित्राशौचे सति पित्राशौचं संपूर्णं कार्यं। पित्राशौचे सति पित्राशौ
चं समाप्य मात्राशौचं पक्षिणीं कुर्यादित्यर्थः। शातातपेन त्वपरो विशेष उक्तः। रात्रिशेषे द्वा
हाच्छुद्धिर्यामशेषे शुचिस्त्र्यहादिति। अस्यार्थः। पूर्वाशौचे रात्रिमात्रावशेषे सति मृतकांतरे पर
णां दद्वयेन शुद्धिः। आशौचांतरात्रिपश्चिमयाममात्रावशेषे सत्यपरस्मिंस्त्रिरहोरात्रे
शुद्धिर्न पूर्वशेषेणेति। यत्तु ब्रह्मपुराणवचनं। आद्यं भागद्वयं यावत्सूतकस्य तु सूतके। द्वि
तीये पतिते चाद्यात्सूतकाच्छुद्धिरिष्यते। अत ऊर्ध्वं द्वितीयांतात्सूतकांतात्तु शुद्धिः स्मृता। एवमे
व विज्ञेयं स्यान्मृतके मृतकांतरमिति। अस्यार्थः। सूतकसंबंधस्य चरमाहोरात्रस्य यदाद्यं
भागद्वयं तत्र तु अविज्ञके अहोरात्रे अहोरूपमंतत्रांतिर्मदने द्वितीयसूतके व्यतीते आ
द्यासूतकाच्छुद्धिः। अत ऊर्ध्वमसमयानंतररात्रिरूपभागद्वये सूतकांतरापाते सति द्विती
यसूतकांताच्छुद्धिरित्यविशेषः। अन्यथा वृद्धवाक्यविरोधः स्यात्। अत्रैव गौतमोऽपि। रा
त्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिरिति। आशौचमध्ये आशौचांतरे सति पिंडदानं पूर्व २१३

वृत्तिः। प्रारब्धे त्वाशौचपिंडे तु मध्ये ज्ञानकं माध्विकर्माणि कार्याणि। शातातपेन विशेष उक्तः।
अंतर्दशाहे जननात्पुनः पश्चात्स्यान्मरणं यदि। प्रेतमुद्दिश्य कर्तव्यं पिंडदानं पूर्ववृत्तितः। प्रारब्धे
शावपिंडे न मध्ये चेज्जननं भवेत्। तथैवाशौचपिंडांस्तु शेषान्दद्याद्यथाविधिरिति। प्रजापतिर
त पि। आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति। उ
क्ताशौचसंनिपाते शुद्धिः। सूतिकामग्निदं विद्यायश्चान्याहरति कामग्निदं दिवा यस्मृति
संग्रहे चात्र। अत्राशौचप्रकरणोक्तान्यधिकाशौचविषये त्वल्पाशौचविषयकानि तानि स
मानोदकादिविषये नव्यवस्थापनीयानि। आशौचविषये अधिकाशौचविषयकानि तानि
गुणवदनापन्नसंनिहितादिविषये च नव्यवस्थापनीयानि न तु विरोध आशंकनीयः। तथा
च स्मृत्यर्थसारे। एवं दशाहत्र्यहस्नानत्रिरात्रपक्षिण्येकाहसद्यःशौचपराणि वाक्यानि योज्या
नि। समानोदकविषयाश्च संकुचितविकल्पापक्षिण्येकाहसद्यःशौचपराणि वाक्यानि यो
ज्यानि। समानोदकविषयाश्च संकुचितविकल्पापक्षिण्येकाहसद्यःशौचरूपाः। आपदि

षयप्रयः॥ येन प्रतिग्रहादिना विनापदि नाशः॥ तद्विषयान् सर्वत्रेति॥ अथाशौचेयकार्यं
वर्ज्यं चोतदुच्यते॥ तत्र धर्मलक्षणाः॥ संध्यामिष्टिं चरुं होमं पिंडयज्ञं समाचरेत्॥ न त्याज्यः सूतके वा
पि तिष्ठत्यज्ञ नाश्वदक्षौ हि जह्नति॥ विष्णुपुराणे॥ सर्वकालमुपासीत संध्यां पार्थिव सूतके॥
२× शौच अशौचस्त्रस्तकाश्रौ [illegible]विविधमा[illegible] [illegible]नेति तद्वति॥ इति संध्योपासनमाशौचे निषिद्धं॥ अ
त्रायमभिप्रायः संध्यायाः प्राणायाममंत्रोच्चारपूर्वकमोपासीतेति॥ पुलस्त्यः॥ अत्रजनस्य
तु प्राणायामवर्ज्यमानसिकमंत्रोच्चारपूर्वकं संध्यामुपासीतेति॥ न सर्वथा त्याज्यं इति प्रायः॥
अह्नमेवार्थं पुनः पुलस्त्य आदाय यथा सूतके मृतके चैव संध्याकर्म समाचरेत्॥ मनसोच्चा
रयेन्मंत्रं प्राणायाममृते द्विजः इति॥ अंजलीप्रक्षेपस्तु गायत्र्युच्चार्यैव कार्यः॥ तदाहपै
ठीनसिः॥ मृतके सावित्र्या प्रांजलिप्रक्षेपप्रदक्षिणं कृत्वा सूर्यं ध्यायेदिति॥ स्मृत्यर्थसारे वि
शेषउक्तः॥ संध्यायां गायत्र्यांजलिदानं कार्यं मार्जनं कार्यं न वा॥ तं प्राणायामाः॥ मन
सा मंत्रमुच्चारयन्मार्जनादिकं च गायत्र्युच्चार्यांजलिदानं दद्यादिति॥ दृष्टिहोमा २१५

दिकं संध्यां सगोत्रेण कारयेत् स्वयं न कुर्यात्॥ तदाह जातुकर्ण्यः॥ सूतके तु समुत्पन्ने स्मार्तं क
र्म कथं भवेत्॥ पिंडयज्ञं चरुं होमम सगोत्रेण कारयेदिति॥ पिंडयज्ञः॥ पिंडपितृयज्ञः॥ श्रावणी
कर्म [illegible]द्युत्पादिकं स्थालीपाकश्चो बृहस्पतिरपि॥ सूतके मृतके चैवत्र्यशक्तौ श्राद्धभोजनेऽप्य
प्रसां वा मासादि निमित्तेसूद्भवये जड्डा पयेदिति॥ यजमानउद्देशत्यागं कुर्यात्॥ नित्याग्नि
होत्रादीनि स्वयमेव कुर्यात्॥ तदाह पारस्करः॥ नित्यानि निवर्त्तेरन्वितानं वर्ज्यं शालाग्नौ
चैकेन्यएतानि कुर्वंतीति॥ अस्यार्थः॥ वितानं वर्ज्यं श्रियान्यानि नित्यानि निवर्त्तेरन्नित्ये
षुः॥ नित्यमपि वितानं न वर्त्तते॥ वितानो नामाग्नीनां विस्तारः श्रौताग्नि तत्र विधीयमानानित्याग्नि
होमस्थालीपाकादीनि तान्यपि न निवर्त्तेरन्नित्ये कश्चाह॥ अतश्चातपाकरणमकरणं वा॥ कर
पर णं वैचेतान्यन्येनसगोत्रा कुर्युरिति व्यर्थः॥ यद्युस्मृत्यर्थसारे उपासनादिः सायं प्रातर्होमौ पार्वण
स्थालीपाकाद्यानि त्यानि मित्तिकाः॥ क्रतिविदितं चाकायेणितत्रो त्रापि द्रव्यत्यागात्मकं प्रधानं
स्वयमेव कुर्यात्॥ अयं दंगमन्येन कारयेदित्यभिप्रायः॥ अतएव अस्रं नवयेत्सर्वदानं दापयेदिति॥

तानेवाह । असंभवे नैमित्तिकान्यपि दर्शपौर्णमासादीनि श्रुत्युक्तानि कार्याणीत्
युक्तं स्मृत्यर्थसारे । ज्ञाताशौचवत्तानि सध्याग्निहोत्रपौर्णमासेष्टिनैमित्तिकाः क्रियाः श्रु
त्वा कार्या एवात्र तत्र नित्याग्निहोत्रव्यतिरिक्तानामपि नैमित्तिकानां श्रौतानां सर्वथैव
न त्यागः । किंचान्येन कारयेत् । कार्यं सर्वमपि वर्ज्यमेव । वैश्वदेव पंच महायज्ञादीनि स्मार्त्ता
नि निवर्त्तन्त एव तदाह संवर्त्तः । विप्रस्य दशाहमाशौचे सीता वैश्वदेवविवर्जिता । पंचयज्ञविधा
नं तु न कुर्यान्मृत्युजन्मनोः । स्वत्पुनर्वचनं दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तन्त इति
तत्काम्यहोमविषयं । नित्यस्नानादिकं कार्यमेवेत्युक्तं स्मृत्यर्थसारे । नित्यस्नानाशौ
चाचमनभोजनं निवर्त्तत इति । नियमास्तु शयनाच्चं च कुर्यादेवेति । इदमाशौचं ज्ञात
मेव दोषापादनं नाज्ञातं तदुक्तं ब्रह्मपुराणे । अपि दातृग्रहीत्रोश्च सूतके मृतके तथा । अ
विज्ञाते न दोषः स्याच्छ्राद्धादिषु कदाचन । विज्ञाते भोक्तुरेव स्यात्प्रायश्चित्तं क्रमादि
ति । अत्र विज्ञाते भोक्तुरिति वदता भोक्तुरेव दोषः स्याद्दोषदृष्टिरित्यन्मतेऽपि तत्रान्या २१५

स्यासत्वं म परिज्ञाते सूतके नैव दोषः स्यात् एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेदि
ति दाता त्वज्ञात्वा वा परिज्ञाते भोक्तुर्दोषमुपावहेदिति । ज्ञातान्यो दातृभोक्त्रोः स्वामिकेना
पि दातृभोक्त्रोरन्यतरेण दात्राज्ञातसूतकान्नभोजने दोषो भोक्तुरेव दातुस्तु सूतकान्न
भोजयितृत्व दोषोऽस्त्येव । नन्वज्ञानदोषस्य यथा सूतकान्नस्यानोद्य वीयमनोक्तं । ज्ञातस्य
त्र दशाहादानि कुलस्यान्नं तु भुज्यत इति । जननं च सूतके मृतके चाकालस्थापनमध्ये
सूतके सति अन्यस्य स्वोदकेनाचामेन शुद्धिर्नातुक्तं षट्त्रिंशन्मतेऽपि भुंजानेषु तु वि
प्रेषु त्वंतरा मृतसूतके अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृता इति । पूर्वसंकल्पितेषु
न्नादिषु न दोषः तदाह बृहस्पतिः । विवाहोत्सवयज्ञेषु त्वंतरा मृतसूतके । पूर्वसंक
ल्पितान्नेषु न दोषः परिकीर्तित इति । अत्र षट्त्रिंशन्मते विशेष उक्तः । विवाहोत्सवयज्ञे
षु त्वंतरा मृतसूतके । परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैरिति । परैः सूतकरहितैः । अ
त एव स्मृत्यर्थसारे । दातृभोक्तृ अनस्पृश्योदिति । आशौचेयापि मरीविनोदाल्लवणमधुमां
सा

सेवं पुष्पमूलफलेषु चोदितं सूर्ययदशनिःशाम्प्रवदातः॥ स्वयं शृतकीयादित्यर्थः॥ पक्वा
पक्वइति॥ पक्वं नत्कडानां॥ अपक्वं तंडुलादिकं चान्नसत्रप्रवृत्ता देवयाज्ञिना न्यस्मि यतः पं
तदाहांगिराः॥ अन्नसत्रप्रवृत्तानां आममन्नदिगर्हितं॥ भुक्त्वा पक्वान्नमेतेषां त्रिरात्रं तु पयः
पिबेदिति॥ व्रतादिषु तु कष्टप्रारब्धव्रतादेस्तु सूतकादिपात प्रारब्धमात्रकरणे॥ आशौचद्यौ
ना॥ अन्यकर्मस्वाशौचमस्त्येव॥ तदाह विष्णुः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे प्रा
रब्धसूतकं नस्यात् अनारब्धे तु सूतकमिति॥ सूतकमिति स्मृतस्यापफलत्वणो॥ व्रतादि
विषये॥ प्रारंभविधिश्चातानवा॥ कः प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥ नांदीमुखं वि
वाहादौ श्राद्धे पाकपरिक्रियेति॥ यज्ञे वरणमिति व्रतानां स्वत्विडां॥ यजमानस्य च तस्मिन्क
र्मणि आशौचाभावः॥ एवं श्राद्धादिष्वपि दाहपाकोत्पादितयां तद्धक्तं स्मृत्यर्थसारे द्वत्ता
नामृत्विजां दीक्षणीयष्ट्यादीक्षितानां यज्ञियं कर्म कुर्वतां॥ अन्नसत्रिणां च तु यत्रानां दाययज्ञा
दिव्रतानां प्रायश्चित्तं च नपूर्वव्रतानां येषां यावत्कपाविस्रावदाशौचं नास्त्येवेति॥ कचित्॥ २१६

प्रारंभ नावे कन्याया अधार्यं वेसन्निहितलग्नांतरां॥ नावाप्नो कूष्मांड मंत्रैर्देवमिष्ट्वा विवा
हः कार्य इति नरादि विष्णुः॥ अनारब्धविशुध्यर्थं कूष्मांडैर्जुहुयाद्घृतं॥ गां दद्यात् पंचगव्या
शीत तत्स्मृति सूतकी॥ अनारब्धे कर्मणि सूतकविशुध्यर्थं॥ यद्देवादेवहेडनमित्यादि कू
ष्मांडसंज्ञकैर्घृतं हुत्वा विप्राय गां दत्वा पंचगव्यं प्राश्य विशुध्यतीति॥ आवश्यके विवाहा
दि मंगलं कुर्यात्॥ इति मंगलं॥ बुधनाम्नः पकारस्य कुलयाम्बुजे तेमां॥ गोपीनारायणनं दं
निर्मितं निर्णयामृतं॥ शुभं॥ इति श्री सूर्यसेन महेंद्र दिरचितेन निर्णयामृते आशौच
प्रकरणं समाप्तं॥ ॥ इति श्रीनिर्णयामृतः संपूर्णः समाप्तः॥ श्रीरस्तु॥ कल्याणं भूयात्॥
॥ अथ निर्णयामृतस्य वंधस्यानुक्रमणिका॥ पतिपत्रं॥ ग्रंथमुखं प्रकरणं॥ राजप्रशस्तिः क
विप्रशस्तिः॥ प्रथमप्रकरणे तिथ्यादिनिर्णयः॥ द्वितीयं श्राद्धप्रकरणं॥ तृतीयं द्रव्यशुद्धिप्रक
रणं॥ तदर्थं आशौचप्रकरणं प्रवर्तक निवर्तक विधिलक्षणं॥ आधोदाहरणे एकत्र का
दिश्रुरूपकालस्य॥ नक्षत्र तिथि निर्णयः॥ नक्षत्र व्रतकाल निर्णयः॥ आयाचित व्रत निर्णयः॥

युग्मतिथिनिर्णयः। शुक्लपक्षकृष्णपक्षयुग्मानि। व्रतारंभे प्रातारंवाप्रारंभलक्षणं। व्र
ताशक्तौ पत्नीपुत्रादिकान्दद्यात्। पित्रर्थे वाक्यभेदा। प्रतिपद्विशेषनिर्णयः। प्रतिपन्निरूक्ता।
चैत्रशुक्लप्रतिपद्युक्तं। भाद्रशुक्लप्रतिपत्। कार्तिकशुक्लप्रतिपत्। प्रतिपद्युक्ता। प्र
तिपदि सिद्धविरुद्धादि। अथ द्वितीयानिर्णयः। चैत्रद्वितीया। श्रावणादिचतुर्मासि शुक्ल
कृष्णपक्षे द्वितीयायामशून्यशयनव्रतं। यमद्वितीया। तृतीयानिर्णयः। चैत्रतृतीया।
वैशाखशुक्लतृतीयायां स्नानव्रतं। भाद्रपदमाघशुक्लतृतीया। चतुर्थीनिर्णयः। चैत्रशु
क्लचतुर्थी। ज्येष्ठशुक्लचतुर्थी। भाद्रपदशुक्लचतुर्थी। आश्विनशुक्लचतुर्थी। माघशु
क्लचतुर्थी। मार्गशीर्षचतुर्थी। लक्ष्यां वरचतुर्थी व्रतं। गणेशचतुर्थी व्रतं। युगचतुर्थी। सि
द्धविरुद्धादि पंचमीनिर्णयः। स्कंदषष्ठी। कौमारिकाषष्ठी। कपिलाषष्ठी। भाद्रपदे चंद्रष
ष्ठी। आश्विनकार्तिकमार्गशीर्षषष्ठी। सिद्धविरुद्धादि। सप्तमीनिर्णयः। चैत्रशुक्लसप्तमी।
आषाढशुक्लसप्तमी। मित्रसप्तमी। अचलासप्तमी। सिद्धविरुद्धा। अष्टमीनिर्णयः। अष्टमी २१७

विद्धोपवास्या। तत्र वैशाखज्येष्ठाषाढाष्टमी। कृष्णजन्माष्टमीनिर्णयः। पारणं दिवैव कार्यं।
दूर्वाष्टमीव्रतनिर्णयः। भाद्रपदशुक्लाष्टम्यां ज्येष्ठाव्रतं। आश्विनभाद्रपदे कृष्णाष्टम्यां म
हालक्ष्मीव्रतं। आश्विने मासि महाष्टमी। महानवमी। नवरात्रनिर्णये नवरात्रकृत्यं। दश
म्यां अपराजितापूजनं। गोष्टाष्टमी। भीष्माष्टमी। बुधाष्टमी। लक्ष्मीसिताष्टमी। बुधाष्टमी
निर्णयः। अष्टम्याः सिद्धविरुद्धादि। नवमीनिर्णयः। वैशाखज्येष्ठाषाढनवमी। नंदानव
मी। महानंदानवमी। अथ नवम्याः सिद्धविरुद्धादि। दशमीनिर्णयः। चैत्रशुक्लदशमी।
ज्येष्ठशुक्लदशमी। दशहरा। विजयदशमी। दशम्याः सिद्धविरुद्धादिकं। एकादश्युपानि
र्णयं कार्यं। एकादशीव्रताधिकारिणः। पुत्रवद्गृहस्थस्यैकादशीनिषेधः। नक्तं हविष्या
न्नं उपवासस्वरूपं। उपवासे पतितादिदर्शननिषिद्धं। उपवासे वर्ज्यं। नियमविधिः काम्योपवा
से नक्तचतुष्टयत्यागः। न तु नित्ये एकादश्यां। अष्टादशनिषेधाः। तत्र सकामनिष्कामस्य
गृहस्थयतीनां भेदेन व्यवस्था। संमतिर्लोकाः। सकामनिष्कामयोः द्वयोर्दशम्यां पारणमपारणं वा।

६० अल्पद्वादश्यां प्रातरेव माध्याह्निकं कर्म कार्यं। अद्भिर्वपारणं। असामर्थ्ये पत्न्यादय उ
पवासं कुर्युः। पित्रमात्रर्थं पुत्रादिरुपवसेत्। सूतके मृतके एकादश्युपवासविधानं। स्त्री
णां रजोदर्शने उपवासविधिः। एकादश्यां तावत्सक्तिमाह। संग्रहश्लोकाः। संतानवृत्ता
दिचतुर्विधमुपोषणं। दधिलक्षणं। विल्वलक्षणं। विद्धेपुष्टविडलीषाढ्यापदा। श्री
न कार्तिकस्य चैकादश्यपः। धरणीव्रतेषु माघफाल्गुननृसिंहद्वादशी। आमर्दकी। वाम
नद्वादशी। जामदग्न्यद्वादशी। रामद्वादशी। वासुदेवद्वादशी। दामोदरद्वादशी। कल्किद्वा
दशी। एकादश्यां सिद्धविरुद्धादिद्वादशीनिर्णयः। श्रवणद्वादशीनिर्णयः। विष्णुशृंखलो
इंद्रध्वजोत्थापनं। वत्सद्वादशी। तिलद्वादशी। द्वादश्यां सिद्धविरुद्धादिकं त्रयोदशी सामा
न्यनिर्णयः। अनंगत्रयोदशी। चतुर्दशीनिर्णयः। कार्तिककृष्णचतुर्दशी। यमतर्पणं दीप
दानं च। चित्राचतुर्दशी। पाषाणचतुर्दशी। माघे आरटंतीचतुर्दशी। शिवरात्रिनिर्णयः। पार २१८
णादिविचारः यामत्रयोर्ध्वगामिन्यां। अथ सिद्धविरुद्धादिपूर्णिमानिर्णयः। वटसावित्रीव्रते पू

र्णिमा पूर्वविद्धैव ग्राह्या। चैत्रपूर्णिमादयः। वैशाखपूर्णिमा। ज्येष्ठाषाढश्रावणपूर्णिमा
सु ग्रंथे उपाकर्मनिर्णयः। उत्सर्गकर्म। श्रावण्यां रक्षाबंधः। श्रावण्यां सावित्रीव्रतं। लोकपालपू
जनं। आश्विनपूर्णिमा। कार्तिकीपूर्णिमा। कोजागरणे व्रतं। कार्तिक्यां व्हलिका नरणे। रोहिणीयो
गे प्रोष्ठीपूर्णिमा। माघीपूर्णिमा। फाल्गुनीपूर्णिमायां। होलिकानिर्णयः। ज्येष्ठपूर्णिमा। अथ सि
द्धविरुद्धादिकं अमावास्यानिर्णयः। वटसावित्रीव्रतं। कार्तिकामावास्यायां दीपोत्सवं लक्ष्मी। मा
घामावास्यादयः। अर्धोदयव्रतं। अमावास्यानिर्णयः। तत्र दिनविभागाय वर्ज्यनिर्णयः। कृ
धमयाः। चैत्रादिमासकृत्यं। अगस्त्यार्घः। चातुर्मास्यव्रतानि। उपनयनकालः। विवाहकाल
विवाहानंतरं पिंडदाननिषेधः। पत्नीद्विरागमकालः। श्राद्धकालाः। अमावास्याश्राद्धविधानं।
तत्र श्राद्धनिर्णयः। कुतपलक्षणं। मृतादिनिर्णयः। श्राद्धप्रदेशाः। श्राद्धकर्तृनियमाः। क्षयाहे पा
र्वणैकोद्दिष्टकल्पः। अपरपक्षे मृतानां दर्शे मृतानां पार्वणमेव सन्न्यासिनां पार्वणमेव। तत्र
नारायणबलिः अष्टकाः पार्वणीमंत्र ऊहविधिः। दाहस्य एकोद्दिष्टं पार्वणमेव कार्यं। एकति

थिमरणे सहगमने द्वयोर्दशाहे कं। तिथिभेदे पृथगेव। संघातमृतानां एककालमृतानां
विशेषः। मातापित्रोः श्राद्धे एकतिथौ पूर्वं पितुस्ततो मातुः। एकस्मिन् दिने एकोनेकश्राद्धानि
कुर्यात्। नित्यदर्शादिक्रियाः। श्राद्धसंपाते दर्शश्राद्धेनैव नित्यश्राद्धसिद्धिः। नित्योदकं तदर्श
मासिकादिपार्वणैकोद्दिष्टसंपाते। श्राद्धविघ्ने। अविज्ञाते मृताहे मृताहे आशौचांतरिते।
मृताहे भार्यारजोदर्शने। कुर्यादित्याद्यभावे श्राद्धविघ्ने तदनंतरदिने कुर्यात् प्राप्तौ। अ
थ श्राद्धकालः। आमान्नहिरण्यश्राद्धे। जीवत्पितृकस्य श्राद्धकालः। जीवत्पितृकर्म
त्र श्राद्धनिषेधः। महालयापरपक्षे। आद्यपक्षे चतुर्दशी श्राद्धं कार्यं न पंचम्यादिपक्षे।
यदा एकस्मिन् दिने महालयश्राद्धं न दानं दादि वर्ज्यं। एककालैकगतानां त्रयोदशी
श्राद्धे पितृपक्षे महालयश्राद्धं अष्टकाश्राद्धं। संन्यासिनां महालये द्वादश्यां पार्वणं। शस्त्र
हतस्य चतुर्दशी। काम्यश्राद्धानि। काम्यनक्षत्रश्राद्धानि। नवश्राद्धं। मासिकश्राद्धनिर्णयः। ऊ
नमासिकादिसपिंडीकरणं कालः। सपिंडीकरणं केन सह। वंशक्रमे मरणे स्त्रीणां सं २१८

योजने विशेषः। पुत्रवृद्धिकाश्राद्धे स्त्रीणां पितामह्यादिभिः पार्वणमेव संयोजनं तत्र एवाधिकारी।
संन्यासिनि मृते आशौचाद्यभावः। विवाहाद्यनंतरं पिंडदानाद्यकरणे संकल्पश्राद्धं। श्रा
द्धे आब्दिकश्राद्धे जीवत्श्राद्धं। संक्रांतिनिर्णयः। रात्रिसंक्रमणे विशेषः। नदीरजोदोषः।
मलमासनिर्णयः। तत्र कर्तव्यं वर्ज्यं च। मलमासमृतानां कुर्यात् श्राद्धं मलमास एव कार्यं। प्रथ
माब्दिकं मलमास एव। अनुवृत्तिका मुख्या। सपिंडी मलमासे न कार्यं। गुरुशुक्रयोर्मौढ्ये द्व
बाल्यवर्ज्यं। ग्रहणकालनिर्णयः। ग्रहणश्राद्धं आवश्यकं। सूतके पि ग्रहणश्राद्धं कर्तव्यं।
जन्मराशौ ग्रहणे अरिष्टहरस्नानविधिः। ग्रहणे भोजननिर्णयः। श्राद्धे ग्राह्यनिषिद्धद्रव्याणि।
भूमिशुद्धिः। पात्रशुद्धिः। धान्यशुद्धिः। जलशुद्धिः। अथ वस्त्रशुद्धिः। देहशुद्धिः। शुद्ध्यपवादः।
आशौचप्रकरणं। जननाशौचं। स्रावपाते चाष्टताशौचं दशाहाद्यंतरा मातापित्रोरुपन
यनपर्यंतं त्रिरात्रमेव सपिंडानां तु नामकरणानंतरं अग्निदानादिसंस्कारे तत एकरात्रं
चौलोत्तरं सद्यःशुद्धिः। ऊनद्विवर्षकन्यामरणे आशौचविशेषः। दंतजननसंस्कारेण वयस्यविशे

षणाशौचं।दाहादिकं पुत्रेणैव कार्यं।पुत्राणां द्वादशविधत्वं।पूर्वताभावे पारषां क्रियाधिका
रः।सर्वाभावे पत्नीति क्रियां कारयेत्।क्रियाणां त्रैविध्यं।नायनिर्णुक्तिसाध्याः।अनुपनी
तानां तत्र तत्र क्रियाधिकारी।आचार्यादीनां ब्रह्मचारी अग्निदिहिकं कुर्यात्।प्रासंगिकाः।
नां क्रियानकार्या।इङ्गामाङ्गदकादु।दुर्मरणमृतानां नारायणबलिः।वृद्धशौचस्मृतेसुप्तिस्स
पद्दितविशेषः।अग्ने व्यग्नारिदहनविषये ब्राह्मण्यानुगमननिषेधः।पृथक्चित्यां।संघातमर
णे।ब्राह्मणस्य क्षत्रियादिसंस्कारनिषेधः।विधवापुत्रस्य वीजेद्वविषयो।सर्वैरनुमति औ० १
रुक्ता।ज्येष्ठपुत्रस्यैवाधिकारः।क्रियास्तु।रात्रिमृते दंसंत्रिदाहः।दिनमृते दिवैव दाहः।वपना
धिकारिणः।आशौचपिंडानां नियमः।रजस्वलायां सूतिकायां श्चमृतायाः शुद्धिः।सूतिता
रजस्वलाशुद्धिः।पंचकमृतशांतिः।आशौचानां स्पर्शदिशादमध्ये दशायाः पातो पुनःसंस्का
रदेभनक्तत्रशुद्धिः दशादं शावमाशौचं।महागुरुविषयो।महागुरुलक्षणं।रात्रावेव
समुपूषत्रे भूलरडसिमृतके।आशौचस्य चत्वारः प्रकाराः।सद्यःशौचादयः।सद्यःशौचमृत्विग्र २२०

दीनां।आदितामेदशदिनमारंभागःसंग्राममृतविषयो।युद्धे तेन कालांतरमरणे।समा
नोदकानां त्रिरात्रं।असगोत्रमातामहाचार्यमातुलविषयो।आत्मपितृबांधवेषु।पित्रोरुपरमे
ऊढानां स्त्रीत्रिरात्रं।मातुलेश्वशुरपरिणीतायाः पितृस्वस्रेमरणे।गृहमृते सपिंडविषये।
अनौरसक्षेत्रजपुत्रादिविषयो राज्ञि मृते।दासदासीवित्पिनां देशांतरजननमरणे आशौ
चं।मासत्रयत्रिरात्रस्नानं।पितरौ चेन्मृतौ स्यातां।सापत्न्यमातृविषयो देशांतरलक्षणं।देशांतरस्थ
तस्याप्रतिक्रिया तिथि।आहिताग्नेः।आपिते जीवितश्रवणे निकर्षणे।अनुगमनाशौचं।हीनवर्णा
नुगमने ब्राह्मणस्य।मातुः पाष्ठिस्त्रियं स्पृष्ट्वा।सपिंडस्य प्रेतालंकरणे।आशौचसंनिपाते सूत
के मृतकं।मातापित्राशौचसंनिपाते।आशौचवर्ज्यकार्यं च।ज्ञातयो चेकायाणि।आशौचं
ज्ञानमवदोषापादकं।मृतकान्नमशौचं।दुर्वसिंकल्पे लेपत्र दिनदोषः।आशौचे याल्पानि
व्रतादिके प्रारंभेषु मृतकपाते प्रारब्धमात्रकरणं।आशौचावनावग्न्यारंभाभावे कन्यायाः
संनिहितलग्नांतराभावे मृतकेपि विवाहः कार्य एव।।निर्णयामृतग्रंथेऽशौचप्रकरणकारमाला।।
समाप्तोऽयं ग्रंथः।।संवतु १५५ वर्षे वैशाख शुदि ... श्री ... लिखितं

[redacted]

ता॥ [redacted]

त्रगक मति मनातिं वि पत्रियादि आसाति । दाधीव त्र पकतें चि नद कैलत्र मिश्च [illegible]

ता तृशा पद्य मसिदिक रणं विश्रा । तथा व. गृ क् ड्यूता ता । श्रा ह्नाग नाचल बतु दे दता ले घडा विध्रि

दक्षेव छ प द ये उबाला नीजो उनै श्रृती । मा यता तक्ष्क मा ष्प स ता विनाहिता । किंना क्रि

मां च रक्ष नृ मृ ने सर्व मु दं कृ मांगदा पायरो २ दात वाऊ रवंग मे ए त्रता सर्व धूक रत्रु रा ।

इति सर्पमृतनीपोथी ॥

[redacted]

२२९